# A Reader in Sanskrit Buddhist Texts

Volume One: Texts
(Devanāgarī)

# 梵語佛典讀本

## 第一冊　文本

（天城體）

Luke Gibson

© 2023 Luke Gibson

All rights reserved

Release date: 15/04/2023

© 2023 Luke Gibson（齊哲睦）

版權所有

發布日期：2023/04/15

# Table of Contents


Preface....1

Suggestions for use ....2

Remarks on the English/Chinese edition ....3

Acknowledgments....3

Introduction....4

Texts....4

1. **Māra's Snare** (*Vinaya*) ....11

2. **The Four Noble Truths** (*Arthaviniścayasūtra*)....17

3. **Śāriputra and the Goddess** (*Vimalakīrtinirdeśasūtra*, ch. 6)....40

4. **The Parable of the Magic City** (*Saddharmapuṇḍarīkasūtra*, ch. 7) ....57

5. **The Parable of the Skillful Doctor** (*Saddharmapuṇḍarīkasūtra*, ch. 15) ....66

6. **Isn't the Tathāgatagarbha the Same as the Ātman?** (*Laṅkāvatārasūtra*, ch. 2) ....75

7. **In Praise of the Teaching** (*Śatapañcāśatka*)....82

8. **Hymn to the Incomparable One** (*Niraupamyastava*) ....92

9. **Hymn to the Mother of All Buddhas** (*Prajñāpāramitāstotra*) ....103

10. **The Buffalo and the Monkey** (*Jātakamālā*) ....112

11. **Encountering Old Age** (*Buddhacarita*, ch. 3)....131

12. **Guarding the Mind** (*Bodhicaryāvatāra*, ch. 5)....139

13. **The Practice of Forbearance** (*Bodhicaryāvatāra*, ch. 6) ....151

14. **Emptiness and the Four Noble Truths** (*Mūlamadhyamakakārikā*, ch. 24) ....160

15. **Elucidating the Buddha's Teaching on Selfhood** (*Abhidharmakośabhāṣya*, ch. 9)....176

16. **Refuting the Mind-Only School** (*Bodhicaryāvatārapañjikā*, ch. 9) ....188

17. **Defending the Mahāyāna** (*Bodhicaryāvatārapañjikā*, ch. 9)....202

18. **Refuting the Nondualists' Notion of a Self** (*Tattvasaṃgrahapañjikā*)....216

19. **Responding to the Realists** (*Viṃśatikā*)....231

20. **On the Tathāgatagarbha** (*Ratnagotravibhāga*, ch. 1) ....242

Editions ....262

# 目錄


序言......6

使用建議......7

中英文編譯說明......8

致謝......8

前言......9

文本......9

一、魔王的繩索 / *Vinaya*《毗奈耶》......11

二、四聖諦 / *Arthaviniścayasūtra*《決定義經》......17

三、舍利弗和天女 / *Vimalakīrtinirdeśasūtra*《維摩詰經》第六品......40

四、化城的譬喻 / *Saddharmapuṇḍarīkasūtra*《妙法蓮華經》第七品......57

五、良醫病子的譬喻 / *Saddharmapuṇḍarīkasūtra*《妙法蓮華經》第十五品......66

六、如來藏與外道之我論 / *Laṅkāvatārasūtra*《楞伽經》第二品......75

七、讚歎聖教 / *Śatapañcāśatka*《一百五十讚佛頌》......82

八、讚歎世尊無與倫比 / *Niraupamyastava*《無可喻讚》......92

九、讚歎諸佛之母 / *Prajñāpāramitāstotra*《般若波羅蜜多讚》......103

十、水牛與猴子的故事 / *Jātakamālā*《本生鬘》......112

十一、王子的厭患 / *Buddhacarita*《佛所行讚》第三品......131

十二、心的守護 / *Bodhicaryāvatāra*《入菩提行論》第五品......139

十三、忍辱的修習 / *Bodhicaryāvatāra*《入菩提行論》第六品......151

十四、空性與四聖諦 / *Mūlamadhyamakakārikā*《中論》第二十四品......160

十五、駁斥補特伽羅論者的問難 / *Abhidharmakośabhāṣya*《俱舍釋論》第九品......176

十六、駁斥唯識論者 / *Bodhicaryāvatārapañjikā*《入菩提行論細疏》第九品......188

十七、辯護大乘 / *Bodhicaryāvatārapañjikā*《入菩提行論細疏》第九品......202

十八、評破外道不二論者之我論 / *Tattvasaṃgrahapañjikā*《攝真實論細疏》......216

十九、駁斥外境實有論者的問難 / *Viṃśatikā*《唯識二十頌》......231

二十、論如來藏 / *Ratnagotravibhāga*《寶性論》第一品......242

校刊本......262

**Preface**

The present reader was created to help remedy the dearth of teaching and independent-study resources for students interested in reading Sanskrit Buddhist literature. This reader offers a selection of twenty short to medium length texts drawn from a variety of sources covering some of the major genres of Sanskrit Buddhist literature, i.e., discourses (*sūtra*), treatises (*śāstra*), commentaries (*bhāṣya*), and *kāvya* ("belles-lettres"), including hymns of praise (*stotra*), court epics (*mahākāvya*), and *jātaka* tales. The reader is made up of three volumes, providing the text, vocabulary, and the ancient Chinese and Tibetan translations.

The vocabulary included in this reader was originally prepared to teach introductory-level reading courses to students who had completed a basic survey of Sanskrit grammar. By providing only stem forms and verbal roots rather than complete inflectional identification and sandhi analysis, my intent is to avoid spoon-feeding information which students should learn to find on their own, while not leaving them entirely to their own devices. The use of vocabulary lists allows students to cover more ground with fewer hurdles, reducing possible feelings of discouragement and speeding up the memorization of a basic set of words, which will make for more fruitful attempts at parsing sentences once they graduate from using a vocabulary and begin relying on dictionaries and their own experience.

While this reader was initially designed as a resource for teaching, it may also be used fruitfully for independent-study by intermediate students who wish to survey a large sample of Buddhist texts in an efficient manner. When more advanced constructions or linguistic points occur in the text, references to relevant comments given in J.S. Speijer's excellent *Sanskrit Syntax* (1886) and a number of other Sanskrit primers have been inserted in the vocabulary lists. These clues together with the consultation of ancient and modern translations should allow students to overcome most difficult passages on their own.

Every effort has been made to avoid mistakes, but this reader is still a work in progress and errors may have crept in, due to a lack of vigilance or knowledge on my part. Corrections, suggestions, or feedback of any kind would be greatly appreciated, as such contributions will help improve future editions.

Please send corrections and suggestions to:

luke.gibson@dila.edu.tw

Luke Gibson

March, 2018

**Suggestions for use**

This reader was conceived as a stepping-stone to be used in class to help students transition away from the textbook's controlled environment while introducing them to the use of more advanced Sanskrit primers. This reader may also be used out of class for independent-study, in which case the student should, at the very least, have completed a basic grammar course or read through and gained a solid grasp of the contents of one of the Sanskrit textbooks suitable for self-study, such as Thomas Egenes' *Introduction to Sanskrit* (2011), or A.M. Ruppel's *The Cambridge Introduction to Sanskrit* (2017).

In the beginning, students may choose to read the text and vocabulary side-by-side, checking for the meaning of new words as they work their way through each sentence. As they become more confident, students are strongly encouraged to first attempt parsing and translating sentences using their own dictionaries, consulting the vocabulary when they become stuck or to confirm their reading.

Students should, as early as possible, develop the habit of reading texts out loud to cultivate a sense for Sanskrit as a language rather than a mere puzzle to be deciphered. Students may refer to the audio recordings created for each text to correct their pronunciation. By paying close attention to the reader's intonation, students will also find clues as to how a sentence should be construed.

The texts in this volume are given twice following a short introduction. The first version uses wider line spacing for students to write down notes, while the second is used for review. Once the hard work of parsing and understanding a text has been completed, students should revisit it regularly, reading it out loud and checking how much they are able to understand without the help of their notes. This last, yet crucial, step in the study of a text helps build familiarity with Sanskrit syntax and is one of the best ways to develop vocabulary. The Anki flashcards that have been created for each text can be used for further vocabulary review.

A number of texts in this reader form pairs which illustrate some of the same linguistic points. These are the two parables from the *Saddharmapuṇḍarīka Sūtra* (texts 4 and 5), the two hymns composed by Mādhyamika masters (texts 8 and 9), the two passages from Śāntideva's *Bodhicaryāvatāra* (texts 12 and 13), and the two sections from Prajñākaramati's commentary on the ninth chapter of the *Bodhicaryāvatāra* (texts 16 and 17). Once one of the texts has been discussed in class, the other member of that pair can be read by students independently for further study and review.

Teachers may also consider giving texts from this reader as reading assignments for independent-study during intersessions to avoid prolonged breaks away from Sanskrit learning and/or in preparation for an upcoming course on a particular genre of Sanskrit literature. Texts 1 through 5

are also suitable as supplementary readings to be used towards the end of a first-year grammar course.

Please consult the reader's webpage for the latest version of all three volumes, audio recordings of each text, Anki flashcards, and other resources.

**Remarks on the English/Chinese edition**

This reader was first created to teach reading courses attended primarily by native speakers of Mandarin Chinese, for whom the challenge inherent in learning a language so different from one's own is compounded by the lack of suitable Sanskrit to Chinese dictionaries. For this reason, the vocabulary was conceived from the beginning to include both English and Chinese meanings, which I have rendered to the best of my ability.

The marginally reduced legibility caused by this somewhat more busy layout is hopefully compensated by the benefits of including both languages side-by-side. Speakers of Chinese will often benefit from being able to consult English meanings, which regularly offer closer equivalents to Sanskrit words and constructions, while other readers interested in learning classical Chinese for the purpose of reading Buddhist texts will pick up Chinese translations of Buddhist terms and various common words.

**Acknowledgements**

I would like to first express my deepest gratitude to Bhikkhunī Dhammadinnā and prof. Teng Weijen (鄧偉仁) for contributing their expertise and providing me with precious advice.

I sincerely thank Bhikṣuṇī Changping (常平) and Chen Tao (陳陶) for going over my translations into Chinese of the vocabulary lists in volume two and helping with the translation into Chinese of the preface and introductions for this reader.

I am grateful to Sebastian Nehrdich for creating the tables for the Tibetan translations in volume three. My sincere gratitude also goes to Bhikṣuṇī Jiangzhong (講鐘) for reviewing those tables and checking for input mistakes in the Tibetan texts.

Finally, this work would not have been possible without the support provided to me by the Dharma Drum Institute of Liberal Arts' Language and Translation Center.

# Volume One: Texts

## Introduction

The texts selected for this reader should be suitable for beginner students, both in terms of the language used and the ideas discussed. Passages abounding in difficult constructions or containing terse philosophical arguments have been avoided. Texts taken from discourses (*sūtra*) were chosen for their overall conformity to the rules of classical Sanskrit. While readers will encounter and gain *some* familiarity with features of Buddhist hybrid Sanskrit, the study of texts which deviate considerably from the rules of classical Sanskrit, i.e., those composed in a language sometimes referred to as "Sanskritized Prakrit" or "mixed Sanskrit", lies beyond the scope of the present book. Students interested in the study of such texts may, having first gained a solid understanding of classical Sanskrit, look to Franklin Edgerton's *Buddhist Hybrid Sanskrit Reader* (1953).

The selection of texts chosen for this reader seeks to offer a cross section of Sanskrit Buddhist literature, including examples of discourses (texts 1, 2, 3, 4, 5, and 6), hymns (texts 7, 8, and 9), Jātaka tales (text 10), epic poetry (text 11), verse treatises (texts 12, 13, and 14), and various kinds of commentarial works (texts 15, 16, 17, 18, 19, and 20). Texts drawn from philosophical works discuss key concepts basic to the major strands of Buddhist philosophy. The arguments or expositions found in those texts should be understandable without prior study of these systems, though some level of familiarity with basic Buddhist ideas is recommended.

Readers should always keep in mind that most of the texts for this reader are only short passages drawn from much larger works. While suitable for the purposes of this reader as more or less self-contained samples of Sanskrit Buddhist literature, these texts and their significance will only be fully appreciated when placed back in the context of the works to which they belong. The present reader only seeks to give students a taste of these different genres, laying the groundwork for future more systematic study.

## Texts

The texts in this volume are based on the critical editions listed at the end of this volume. Changes made to the texts are as follows:

- A header in Sanskrit including the name of the work, the author, and the chapter name has been added at the beginning of each text.
- The use of punctuation (commas in particular) has been harmonized across all texts for the

sake of consistency. Overall, punctuation has been used more liberally than in some editions.

- A number of minor corrections have been made to the texts, typically on the basis of other existing critical editions.
- In prose, sandhi is never applied between a gerund and the following word.
- The verses from the original text in commentaries are highlighted in bold.
- Texts 2, 3, 15, and 18 have been abridged. Ellipses have been inserted to indicate abridgement and, in general, to show if the selected passage is preceded and/or followed by more text in the same chapter.
- Hyphens are used to break lines and not to separate compounds members.

The texts contained in this volume are in no way facsimiles or substitutes for the original editions on which they are based. All copyrights belong to the original copyright holders.

Another version of this first volume with romanized texts is available on the reader's webpage.

# 序言

編譯此《梵語佛典讀本》的目的在於對有志閱讀梵語佛典的讀者有所助益，以期彌補上課及自學資源的缺乏。此讀本中，精選二十篇短中長不等的文本，包括梵語佛教文獻的主要體裁，如經文（sūtra）、論書（śāstra）、注釋書（bhāṣya），以及美文學（kāvya）——包含讚頌（stotra）、長篇敘事詩（mahākāvya）和本生故事（jātaka）等體裁。此讀本共有三冊，分別是文本、詞彙表，以及現存的中、藏文對應譯本。

最初，此讀本是作為梵語佛典導讀課程的教材，對象為完成梵語基礎文法課程的學生。以末學的經驗，學生開始閱讀梵語佛典時，若配合使用這類讀本，可以降低因難解而產生的挫折感。一般而言，學習梵語文獻常見兩種方式，一是初學者完全自行解析文本內容，二是使用具有完整文法解析及連音斷句的教材。而此讀本嘗試在這兩種學習方式之間取得平衡，因此，詞彙表僅提供名詞語幹及動詞字根，幫助讀者在學習上既有所憑藉又保有解析句子的學習空間。讀者使用詞彙表閱讀文本時，更能致力於熟悉語尾變化及文法結構，並能快速累積佛典中常見的詞彙。在此基礎之上，未來讀者以詞典及自己的經驗解析句子時，將更為順暢。

雖然此讀本最初是作為授課教材，但具備梵語中階程度的讀者用於自學也頗見成效。讀者能縮短查詢詞彙所需要的時間，更有效率地閱讀大量佛教文獻。此外，針對文本中較為進階或難解的結構，詞彙表提供 J.S. Speijer 編撰的 *Sanskrit Syntax*（1886）及其他梵語文法書中相關解說的索引，若循此索引，並同時參考古代及現代的翻譯，不易理解之處應當可以迎刃而解。

雖竭盡所能避免錯誤，但深感所學有限，或由於思慮欠周，故可能多有疏漏及謬誤之處。此編譯計畫仍持續進行，請給予指教、建議及回饋，將有助於編譯更臻完善，末學不勝感荷。

請將指教及建議寄到：luke.gibson@dila.edu.tw

Luke Gibson（齊哲睦）

2018 年 3 月

# 使用方法建議

編譯這套讀本的原始構想是作為學生課堂中學習梵語的墊腳石，幫助學生跳脫既定教科書的模式，並引導學生使用更進階的梵語文法書。課堂外，這套讀本也可以作為自學教材，但讀者必須已完成基礎文法課程，或已研讀適合自學的梵語入門書，例如 Thomas Egenes 編撰的 *Introduction to Sanskrit*（2011）或 A.M. Ruppel 編撰的 *The Cambridge Introduction to Sanskrit*（2017）。

剛開始，讀者可以選擇邊研讀文本邊查閱詞彙表。當累積閱讀經驗後，學生應該嘗試透過查閱辭典自行分析及翻譯句子，若遇到瓶頸，或為了確認理解無誤及查找文法書索引，再查詢詞彙表。建議讀者儘早養成朗讀梵語文本的習慣，這將有助於培養梵語的語感。讀者可以利用文本錄音檔來改正自己的發音。通過仔細留意朗讀者的語調，也可以找到解析句子的線索。

第一冊文本中，各文本提供兩種不同的編排方式：第一種編排方式行距加大，方便讀者初次研讀文本時書寫筆記，第二種編排方式使用單行間距，供讀者複習時使用。經過了文法分析並且理解了文本之後，讀者應經常複習。在複習文本時，最好能夠出聲朗讀，並在沒有任何筆記下，看看自己理解多少，這是培養梵語語感的關鍵方法，也是累積詞彙量的最好方式之一。此外，每一文本皆有 Anki 單字卡可供讀者進一步複習詞彙。

這套讀本中，某些文本形成兩個一組，包括選自《妙法蓮華經》的兩個譬喻（文本四、五）、同為中觀論師所撰寫的兩個讚頌（文本八、九）、寂天《入菩提行論》中的兩個段落（文本十二、十三），以及智作慧為《入菩提行論》第九品所作《細疏》中的兩個段落（文本十六、十七）。當其中一個文本已在課堂中研讀過，學生即可自行閱讀另一文本以進一步學習及複習。

授課老師也可以將這套讀本中的文本作為學生於寒暑假期間的指定閱讀，以避免學生過長時間疏於學習梵語，或者事先預習即將學習的梵語體裁（經、讚頌、論書等）。文本一到文本五也適合作為第一學年文法課程後半段的閱讀補充教材。

請查詢讀本的網頁下載最新版本、文本錄音檔、Anki 單字卡及其他學習資源。

## 中英文編譯說明

選修末學講授的梵語課程的學生中，絕大多數人的母語是中文。對他們而言，學習梵語的挑戰不僅來自梵語與自己母語的迴然相異，更且是梵漢辭典的付諸闕如。有感於此，末學即致力編譯中英雙語詞彙表。

雖然中英對照的方式使得版面略顯複雜，但中英對照有其優點。中文讀者可以透過英語的釋義更充分了解梵語詞彙的詞義，而有志於閱讀漢譯佛典的外國讀者，可以從詞彙表中學習漢譯的佛學名相及常用詞彙。

## 致謝

由衷感謝法樂法師（Bhikkhunī Dhammadinnā）以及鄧偉仁教授對此讀本提供寶貴建言。末學完成編譯第二冊詞彙表後，由常平法師與陳陶協助修訂其中的中文翻譯，在此表達最深的謝意，也感謝他們將此讀本的各項前言與文本簡介翻譯為中文。第三冊的梵藏對照表為 Sebastian Nehrdich 所製作，由講鐘法師檢視並校訂，感謝二位的付出。最後，法鼓文理學院語言與翻譯中心對此編譯計畫所給予的支持，末學銘感五內。

# 第一冊　文本

## 前言

此讀本所選用的文本以適用於初學者為考量，儘可能避免具有過多難解的文法結構或艱澀的哲學思辨的段落。此外，從經（sūtra）中擇取的文本大致上符合古典梵語的文法規則。雖然讀者將有機會認識某些佛教混合梵語的文法特徵，但是與古典梵語文法差異很大的文獻，並不列入此讀本的範圍。讀者對古典梵語文法的學習較為深入之後，若想研讀佛教混合梵語的文獻，可研讀由 Franklin Edgerton 所編纂 *Buddhist Hybrid Sanskrit Reader*（1953）。

本冊文本包括經文（文本一、二、三、四、五、六）、讚頌（文本七、八、九）、本生故事（文本十）、長篇敘事詩（文本十一）、論頌（文本十二、十三、十四），及各類注釋書中的內容（文本十五、十六、十七、十八、十九、二十）。這些文本所涉及的義理是佛教主要思想體系中的基本核心概念，所以讀者即使未曾深入學習佛教思想，僅略具佛法基本概念，應可理解其中所論述的義理。

需要提醒讀者的是，這些文本多數雖為完整的故事或講述某一完整的義理概念，但唯有依循整部文獻的脈絡閱讀，才能詳實而精確的理解其中的義涵。此讀本僅提供讀者接觸不同佛典體裁的機會，可作為將來研讀整部佛典的基礎。

## 文本

本冊文本取材於如後所列的校刊本，並作如下修改：

- 每一文本的開始加上梵語文獻名稱、作者及品名。
- 統一標點符號（尤其是逗點）的使用方式。為了有助於讀者閱讀，本冊文本相較於某些校刊本，標注較多的標點符號。
- 參考其他現存的校刊本稍作修訂。
- 在長行部分，連續體和其後單詞之間不使用連音變化。
- 注釋書中的論頌以粗體顯示。

- 在文本二、三、十五、十八中，以省略符號（...）表示所省略的語句。此外，若文本同一品中的前後文未被摘錄，以省略符號表示省略的前後文。
- 文本中的連字號（-）用於需要換行時，不用於組成複合詞。

為了有助於讀者的學習而作如上修改，若讀者需要進一步對文本深入研究，應以如後所列校刊本為依據。所有的著作權歸屬如後所列校刊本的版權擁有者。

本冊另一版本採用天城體的文本，欲使用此版本，請查詢讀本的網頁。

# 1. **Māra's Snare**

(*Vinaya*)

Our first text is drawn from the *Saṅghabhedavastu*, the 17th section of the monastic code (*Vinaya*) of the Mūlasarvāstivāda, one of the early schools of Buddhism in India. As with much of the contents of the remarkably voluminous Mūlasarvāstivāda *Vinaya*, the *Saṅghabhedavastu* does not deal directly with the rules and regulations of the monastic community, but recounts rather the life and practice of Prince Siddhārtha, his awakening, the formation of the early Buddhist community, and various notable episodes and sermons from the Buddha's career. The second half of this text is primarily dedicated to narrating how Devadatta, the Buddha's malevolent cousin, created a schism (*bheda*) in the Buddhist monastic congregation (*saṅgha*) and attempted by various means to kill the Buddha.

The following passage recounts an encounter between the Buddha and Māra, the devil or tempter figure of Buddhism. The incident takes place as the saṅgha is first being established, shortly after the Buddha's own awakening. According to the account given here, the monastic community was then made up of sixty-one Arhats: the five ascetics and former spiritual companions of the Buddha, fifty-five converts from the neighboring town of Vārāṇasī, and the Buddha himself. As the Tathāgata and his disciples are about to set out to spread the teaching far and wide, Māra attempts to reassert his control over the Buddha.

# 一、魔王的繩索

摘自 *Vinaya*《毗奈耶》

第一個本文出自根本說一切有部（Mūlasarvāstivāda）律藏（*Vinaya*）中的《破僧事》（*Saṅghabhedavastu*）。根本說一切有部律藏文獻數量龐大，《破僧事》為其中第十七章。律藏中大部分的文獻並沒有直接涉及僧團的戒條，如《破僧事》一章，描述悉達多太子的世俗生活、出家修行、覺悟成佛，早期教團的形成以及佛陀弘揚佛法的許多故事。《破僧事》後半部分主要描述關於「破僧」的事件：佛陀堂弟提婆達多（Devadatta）造成僧團（saṅgha）分裂（bheda），並以各種方式企圖殺死佛陀。

我們所選擇的文本敘述了佛陀和魔羅（Māra）相遇的故事。這個故事發生在佛陀剛覺悟不久，首次建立僧團的時候。根據《破僧事》的記載，當時的僧團由六十一位阿羅漢組成：最初跟隨佛陀修行的五位比丘、來自瓦拉那西（Vārāṇasī）的五十五位弟子以及佛陀本人。當如來和他弟子們正準備遠行弘法時，魔羅企圖擾亂佛陀。

# विनये

# सङ्घभेदवस्तु ।

…

भगवान्वाराणस्यां विहरति ऋषिवदने मृगदावे । तत्र भगवान्भिक्षूनामन्त्रयते स्म—मुक्तोऽहं भिक्षवः सर्वपाशेभ्यो ये दिव्या ये च मानुषाः । यूयमपि भिक्षवो मुक्ताः सर्वपाशेभ्यो ये दिव्या ये च मानुषाः । ततो भिक्षवश्चारिकां प्रक्रमिष्यामो बहुजनसुखाय लोकानुकम्पायै अर्थाय हिताय सुखाय देवमनुष्याणाम् । मा च वो द्वावेकेन गमिष्यथ । अहमपि येनोरुबिल्वासेनायनीग्रामकस्तेन चारिकां प्रक्रमिष्यामि ।

अथ मारस्य पापीयस एतदभवत्—अयं श्रमणो गौतमो वाराणस्यां विहरति ऋषिवदने मृगदावे । एवं श्रावकान्धर्मं देशयति—मुक्तोऽहं

भिक्षवः सर्वपाशेभ्यो ये च दिव्या ये च मानुषाः। यूयमपि भिक्षवो मुक्ताः सर्वपाशेभ्यो ये च दिव्या ये च मानुषाः। यावदहमपि येनोरुबिल्वासेना-यनीग्रामकस्तेन चारिकां प्रक्रमिष्यामीति। यन्न्वहमस्योपसङ्क्रमेयं यदुत व्याक्षेपकर्मणि।

अथ मारः पापीयान्माणवकवर्णमात्मानमभिनिर्माय येन भगवांस्तेनो-पसङ्क्रान्तः। उपसङ्क्रम्य भगवतोऽन्तिके तिष्ठन्गाथां भाषते—

अमुक्तो मुक्तसंज्ञी सन्किं मुक्तोऽस्मीति मन्यसे।
महाबन्धनबद्धोऽसि न मे श्रमण मोक्ष्यसे॥

अथ भगवत एतदभवत्—मारो बतायं पापीयानुपसङ्क्रान्तो यदुत व्याक्षेपकर्मणि। इति विदित्वा गाथां भाषते—

मुक्तोऽहं सर्वपाशेभ्यो ये दिव्या ये च मानुषाः ।

एवं जानीहि पापीयन्निहतस्त्वमिहान्तक ॥

अथ मारस्य पापीयस एतदभवत्—जानाति मे श्रमणो गौतमश्चेतसा चित्तम् । इति विदित्वा दुःखी दुर्मना विप्रतीसारी तत्रैवान्तर्हितः ।

…

# विनये
# सङ्घभेदवस्तु ।

…

भगवान्वाराणस्यां विहरति ऋषिवदने मृगदावे । तत्र भगवान्भिक्षूनामन्त्रयते स्म—मुक्तोऽहं भिक्षवः सर्वपाशेभ्यो ये दिव्या ये च मानुषाः । यूयमपि भिक्षवो मुक्ताः सर्वपाशेभ्यो ये दिव्या ये च मानुषाः । ततो भिक्षवश्चारिकां प्रक्रमिष्यामो बहुजनसुखाय लोकानुकम्पायै अर्थाय हिताय सुखाय देवमनुष्याणाम् । मा च वो द्वावेकेन गमिष्यथ । अहमपि येनोरुबिल्वासेनायनीग्रामकस्तेन चारिकां प्रक्रमिष्यामि ।

अथ मारस्य पापीयस एतदभवत्—अयं श्रमणो गौतमो वाराणस्यां विहरति ऋषिवदने मृगदावे । एवं श्रावकान्धर्मं देशयति—मुक्तोऽहं भिक्षवः सर्वपाशेभ्यो ये च दिव्या ये च मानुषाः । यूयमपि भिक्षवो मुक्ताः सर्वपाशेभ्यो ये च दिव्या ये च मानुषाः । यावदहमपि येनोरुबिल्वासेनायनीग्रामकस्तेन चारिकां प्रक्रमिष्यामीति । यन्न्वहमस्योपसङ्क्रमेयं यदुत व्याक्षेपकर्मणि ।

अथ मारः पापीयान्माणवकवर्णमात्मानमभिनिर्माय येन भगवांस्तेनोपसङ्क्रान्तः । उपसङ्क्रम्य भगवतोऽन्तिके तिष्ठन्गाथां भाषते—

अमुक्तो मुक्तसंज्ञी सन्किं मुक्तोऽस्मीति मन्यसे ।
महाबन्धनबद्धोऽसि न मे श्रमण मोक्ष्यसे ॥

अथ भगवत एतदभवत्—मारो बतायं पापीयानुपसङ्क्रान्तो यदुत व्याक्षेपकर्मणि । इति विदित्वा गाथां भाषते—

मुक्तोऽहं सर्वपाशेभ्यो ये दिव्या ये च मानुषाः ।
एवं जानीहि पापीयन्निहतस्त्वमिहान्तक ॥

अथ मारस्य पापीयस एतदभवत्—जानाति मे श्रमणो गौतमश्चेतसा चित्तम् । इति विदित्वा दुःखी दुर्मना विप्रतीसारी तत्रैवान्तर्हितः ।

…

## 2. **The Four Noble Truths**

(*Arthaviniścayasūtra*)

The *Arthaviniścaya Sūtra* provides definitions for twenty-seven important items or categories (*artha*) of the Buddha's teaching, such as the four meditative absorptions (*catur dhyāna*), the five aggregates (*pañca skandha*), the seven factors of enlightenment (*sapta bodhyaṅga*), etc. This compendium belongs to the same class of texts as the Pāli *Dasuttara* and *Saṅgīti* suttas, which also offer extensive listings of Buddhist doctrines arranged numerically, anticipating or mirroring the structure of certain Abhidharma texts.

The historical importance of this scripture is attested by the existence of a commentary (*nibandhana*) and both Tibetan and Chinese translations. The quotes and references to the *Arthaviniścaya Sūtra* found in various scholastic works also point to its widespread use as a kind of manual or catechism of the Buddha's teaching. Even today this text can serve as a useful reference work for students who wish to study systematically the Sanskrit vocabulary and expressions used to define key Buddhist ideas.

Our text includes the introductory enumeration of topics (*uddeśa*), the expositions (*nirdeśa*) on the Four Noble Truths (*catur āryasatya*) and the Eightfold Noble Path (*āryāṣṭāṅgamārga*), and the Buddha's concluding words of exhortation. While the *Arthaviniścaya Sūtra* provides the usual definitions of the Four Noble Truths, some of the explanations given in the section on the Eightfold Noble Path depart from the traditional accounts of these teachings found in the Pāli Nikāyas. The section on the Four Noble Truths also includes a well-known simile which has been judiciously interpolated by the compilers of this text.

## 二、**四聖諦**

摘自 *Arthaviniścayasūtra*《決定義經》

《決定義經》解釋了佛陀教法中的二十七個重要名相（artha），例如「四禪」（catur dhyāna）、「五蘊」（pañca skandha）、「七覺支」（sapta bodhyaṅga）等。該文獻類似巴利語的《十上經》（*Dasuttara Sutta*）和《眾集經》（*Saṅgīti Sutta*），都是列出並解釋許多重要的「法數」，即帶有數字的佛教名相。這種經與某些阿毘達摩論書具有相似的結構。

這部經的重要性，從本經存在一部注釋書（nibandhana）以及藏、漢兩個譯本，即可得證。從各種佛教論書對《決定義經》的旁徵博引，也可以看出其作為教義問答手冊而得

到的廣泛傳播。即使在現代，對於有志學習佛教梵語的人，特別是關於佛教名相的梵語表達，《決定義經》也可以作為一本適當的參考資料。

我們所選擇的文本包括以下三個部分：本經所解釋的二十七個名相的列舉（uddeśa），對於四聖諦（catur āryasatya）和八正道（āryāṣṭāṅgamārga）的闡釋（nirdeśa），以及佛陀對聽眾所說的勸勉。《決定義經》提供了關於四聖諦的慣常解釋，但對於八正道的某些解釋，與巴利尼柯耶（*Nikāya*）的傳統解釋則有所不同。四聖諦的文本中還包括一個眾所周知的譬喻，該譬喻應為經文的編纂者所添加。

# अर्थविनिश्चयो नाम धर्मपर्यायः।

नमो बुद्धाय।

एवं मया श्रुतम्—एकस्मिन्समये भगवाञ्श्रावस्त्यां विहरति स्म पूर्वारामे मृगारमातुः प्रासादे महता भिक्षुसङ्घेन सार्धमर्धत्रयोदशभिर्भिक्षुशतैः। तत्र च भगवान्धीरगम्भीरमधुरोदारनिर्दोषस्वरेण भिक्षूनामन्त्रयते स्म—धर्मं वो भिक्षवो देशयिष्यामि, आदौ कल्याणं मध्ये कल्याणं पर्यवसाने कल्याणम्, स्वर्थं सुव्यञ्जनम्, केवलं परिपूर्णं परिशुद्धं पर्यवदातं ब्रह्मचर्यं संप्रकाशयिष्ये, यदुतार्थविनिश्चयं नाम धर्मपर्यायम्। तच्छृणुत साधु च सुष्ठु च मनसिकुरुत, भाषिष्ये। साधु भगवन्निति ते भिक्षवो भगवतः प्रत्यश्रौषुः॥

भगवांस्तानिदमवोचत्—कतमश्चासौ भिक्षवोऽर्थविनिश्चयो नाम धर्मपर्यायः? यदुत—पञ्च स्कन्धाः, पञ्चोपादानस्कन्धाः, अष्टादश धातवः, द्वादशायतनानि, द्वादशाङ्गः प्रतीत्यसमुत्पादः, चत्वार्यार्यसत्यानि, द्वाविंशतिरिन्द्रियाणि, चत्वारि ध्यानानि, चतस्र आरूप्यसमापत्तयः, चत्वारो ब्रह्मविहाराः, चतस्रः प्रतिपदः, चतस्रः समाधिभावनाः, चत्वारि स्मृत्युपस्थानानि, चत्वारि सम्यक्प्रहाणानि, चत्वार ऋद्धिपादाः, पञ्चेन्द्रियाणि, पञ्च बलानि, सप्त बोध्यङ्गानि, आर्याष्टाङ्गमार्गः, षोडशाकारानापानानुस्मृतिः, चत्वारि स्रोतापत्त्यङ्गानि, दश तथागतबलानि, चत्वारि वैशारद्यानि, चतस्रः प्रतिसंविदः, अष्टादशावेणिका बुद्धधर्माः, द्वात्रिंशन्महापुरुषलक्षणानि, अशीतिरनुव्यञ्जनानि। अयं भिक्षवोऽर्थविनिश्चयस्य धर्मपर्यायस्योद्देशः॥

…

तत्र कतमानि चत्वार्यार्यसत्यानि? तद्यथा—दुःखमार्यसत्यम्, दुःखसमुदय आर्यसत्यम्, दुःखनिरोध आर्यसत्यम्, दुःखनिरोधगामिनी प्रतिपदार्यसत्यम् ॥

तत्र दुःखमार्यसत्यं कतमत्? तद्यथा—जातिर्दुःखम्, जरा दुःखम्, व्याधिर्दुःखम्, मरणं दुःखम्, प्रियवियोगो दुःखम्, अप्रियसंयोगो दुःखम्, रूपं दुःखम्, वेदना दुःखम्, संज्ञा दुःखम्, संस्कारा दुःखम्, विज्ञानं दुःखम्, यदपीच्छन्पर्येषमाणो न लभते तदपि दुःखम्, संक्षिप्तेण पञ्चोपादानस्कन्धा दुःखम्। इदमुच्यते दुःखमार्यसत्यम् ॥

तत्र दुःखसमुदय आर्यसत्यं कतमत्? तद्यथा—तृष्णा पौनर्भविकी

नन्दीरागसहगता तत्र तत्राभिनन्दिनी। इदमुच्यते दुःखसमुदय आर्यसत्यम्॥

तत्र दुःखनिरोध आर्यसत्यं कतमत्? यदस्या एव तृष्णायाः पौनर्भविक्या नन्दीरागसहगतायास्तत्र तत्राभिनन्दिन्या अशेषतः प्रहाणं प्रतिनिःसर्गो व्यन्तीभावः क्षयो विरागो निरोधो व्युपशमोऽस्तंगमः। इदमुच्यते दुःखनिरोध आर्यसत्यम्॥

तत्र दुःखनिरोधगामिनी प्रतिपदार्यसत्यं कतमत्? अयमेव सम्यग्दृष्ट्यादिरार्याष्टाङ्गो मार्गः। तद्यथा—सम्यग्दृष्टिः, सम्यक्संकल्पः, सम्यग्वाक्, सम्यक्कर्मान्तः, सम्यगाजीवः, सम्यग्व्यायामः, सम्यक्स्मृतिः, सम्यक्समाधिरिति। तद्यथा कश्चित्पुरुषो ज्वराभिभूतः कुशलसम्मतं दृष्टकर्माणं श्रुतशास्त्रं वैद्यमुपसंक्रम्य ब्रूयात्—ज्वराभिभूतोऽस्मि, अस्योपशमायौषधमुपदिश्यमानमिच्छामीति। स तस्य भिषक्प्राग्निदानमेव पृच्छेत्—किं

त्वया भुक्तं पीतं वेति। आतुरस्तस्य कथयेत्—मया हि दधि त्रपुषं भक्षितमन्नपानं च तक्रं पीतमिति। तस्य स भिषग्विषशोषणमुपदिश्य औषधमुपदिशेत्। एवमेव जात्यादिमहाज्वरसंतापिताः साधवो महाचित्तभिषजं महाकारुणिकं तथागतमुपसंक्रम्य दुःखज्वरापहं धर्मं पृच्छेयुः। तेभ्यो भगवान्निदानं समुदयाख्यमाख्याय आर्याष्टाङ्गमहौषधं शान्तिकरं निर्वाणमुपदिशेत्। क्लेशातुरोऽप्येनं मार्गं भावयन्नचिरात्सर्वदुःखक्षयमवाप्य निर्वाणपुरं गत्वा परां शान्तिमवाप्नोतीति। इदमुच्यते दुःखनिरोधगामिनी प्रतिपदार्यसत्यम्॥

इमानि भिक्षवश्चत्वार्यार्यसत्यानि॥

…

तत्र भिक्षवः कतम आर्याष्टाङ्गो मार्गः? तद्यथा—सम्यग्दृष्टिः, सम्यक्संकल्पः, सम्यग्वाक्, सम्यक्कर्मान्तः, सम्यगाजीवः, सम्यग्व्यायामः, सम्यक्स्मृतिः, सम्यक्समाधिश्च ॥

तत्र भिक्षवः सम्यग्दृष्टिः कतमा? अस्त्ययं लोकः, अस्ति परलोकः, अस्ति माता, अस्ति पिता, अस्ति दत्तम्, अस्ति हुतम्, अस्तीष्टानिष्टसुकृतदुष्कृतानां कर्मणां फलविपाकः, सन्ति लोके सम्यग्गताः सम्यक्प्रतिपन्ना इति। इयं भिक्षवः सम्यग्दृष्टिः। तद्विपरीता मिथ्यादृष्टिः ॥

सम्यक्संकल्पः कतमः? बुद्धत्वादिपरिणामितं शीलं दानम्, न चक्रवर्त्यादिपरिणामितम्। अयं भिक्षवः सम्यक्संकल्पः ॥

सम्यग्वाक्कतमा? इह भिक्षवः पारुष्यानृतपैशुन्यसंभिन्नप्रलापवर्जिता

वाक् । इयमुच्यते सम्यग्वाक् ॥

सम्यक्कर्मान्तः कतमः? कायवाङ्मनसां दशकुशलेषु कर्मपथेषु व्यापारः । तत्र कायिकं त्रिविधम्—प्राणातिपातादत्तादानकाममिथ्याचाराद्विरतिः । वाचिकं चतुर्विधम्—अनृतपैशुन्यपारुष्यसंभिन्नप्रलापाद्विरतिः । मानसं त्रिविधम्—अभिध्याव्यापादमिथ्यादृष्टिभ्यो विरतिः ॥ तत्र प्राणातिपातः कतमः? प्राणी च भवति, प्राणिसंज्ञी च भवति, वधकचित्तं चोत्पादयति, उपक्रमं च करोति । जीविताद्व्यपरोपयति । अयमुच्यते भिक्षवः प्राणातिपातः । अन्यत्र प्रमादाददृष्टाद्वाप्राणिवधः । तत्र अदत्तादानं कतमत्? स्तेयचित्तस्य परद्रव्यस्वीकरणमदत्तादानम् । अन्यत्र मातृपितृभ्रातृस्वजनमित्रद्रव्यस्य स्वल्पस्यानुपरोधिनो ग्रहणं नादत्तादानम् । तत्र काममिथ्याचारः कतमः? परस्त्रीणामुपभोगो भर्तृराजमातृपितृरक्षि-

तानाम्, अथवा अस्थानागम्यादेशाकालेषु विप्रतिपत्तिः । अयमुच्यते काममिथ्याचारः । कायिकमेतत्त्रिविधम् ॥ अनृतं कतमत्? साक्षिप्रश्ने यथाभूताद्वितथवचनमनृतम् । अनर्हतो वा अर्हन्नस्मीति परिहासवर्जम् । इदमुच्यतेऽनृतम् । पैशुन्यं कतमत्? अभूतेन सत्येन वा भेदकरं वचनं पैशुन्यम् । इदमुच्यते पैशुन्यम् । पारुष्यं कतमत्? परदुःखचिकीर्षोरनि-ष्टवचनश्रावणं पारुष्यम् । दुःखमस्य भवत्वित्यनया बुद्ध्या यदनिष्टवचन-श्रावणं क्रियते तत्पारुष्यम् । इदमुच्यते पारुष्यम् । संभिन्नप्रलापः कतमः? तद्यथा—राजकथा, चोरकथा, युद्धकथा, मद्यकथा, द्यूतकथा, स्त्रीकथा, आख्यायिककथा कथनं वा । अयमुच्यते संभिन्नप्रलापः । वाचिकमेतच्च-तुर्विधम् ॥ तत्राभिध्या कतमा? परद्रव्यस्वीकरणेच्छाभिध्या । यान्यस्य द्रव्याणि तानि मम स्युरिति । इयमुच्यतेऽभिध्या । तत्र व्यापादः कतमः?

परजीवितव्यपरोपणावच्छेदनपीडादिचिन्तनम् । अयमुच्यते व्यापादः । तत्र मिथ्यादृष्टिः कतमा? नास्त्ययं लोकः, नास्ति परलोक इति पूर्ववत् । एतन्मानसं त्रिविधम् ॥

तत्र सम्यगाजीवः कतमः? भिक्षोस्तावत्कुहना लपना नैमित्तिकत्वं नैष्पेषिकत्वं लाभेन लाभप्रतिकाङ्क्षा च ॥ तत्र कुहना कतमा? भिक्षुर्दानपतिं दृष्ट्वा पर्यङ्कं बद्ध्वा पथि शून्यागारे वा निषीदति, ध्यायी भिक्षुरयमर्हन्निति लाभसत्कारो मे भविष्यतीति । एवमादिका कुहनेत्युच्यते । तत्र लपना कतमा? इह भिक्षुर्लाभसत्कारनिमित्तमेव, त्वं मे माता, त्वं मे पिता, त्वं मे भगिनी, त्वं मे दुहितेत्येवमन्यान्यपि प्रियवचनानि ब्रवीति । एवमादिका लपनेत्युच्यते । तत्र नैमित्तिकत्वं कतमत्? भिक्षुस्तावत् पिण्डपातं परिभुज्य असकृद्ब्रूते—यादृशोऽयं पिण्डपातस्तादृशोऽन्ये-

षूपासकगृहेषु न लभ्यते । अलाभसत्कारचित्तस्य तु वदतोऽदोषः । इदमुच्यते नैमित्तिकत्वम् । तत्र नैष्पेषिकत्वं कतमत्? भिक्षुस्तावद् यत्र गृहे पिण्डपातं न लभते, दापयितुकामश्च भवति, तत्र ब्रूते—अदानपतयो हि निरयं गच्छन्ति । यूयमप्यदानपतयो व्यक्तं निरयगामिन इति । नरक-भयभीताः पिण्डपातमनुप्रयच्छति । तं च लब्ध्वा परिभुङ्क्ते । इदमुच्यते नैष्पेषिकत्वम् । तत्र लाभेन लाभप्रतिकाङ्क्षा कतमा? भिक्षुस्तावदात्मीयेन धनेन शोभनानि चीवराणि चोपक्रीय उपासकेभ्यो दर्शयति—ईदृशानि वयं वस्त्राणि दानपतिभ्यो लभामह इति । ते लज्जिता यानि वस्त्राणि प्रयच्छन्ति तानि परिभुङ्क्ते । इयमुच्यते भिक्षवो लाभेन लाभप्रतिकाङ्क्षा । अयं भिक्षवो मिथ्याजीवः । अस्माद्विरतिरिति सम्यगाजीवः ॥ इह खलु भिक्षव उपासकस्य मिथ्याजीवः कतमः? विषविक्रयः, शस्त्रविक्रयः,

सत्त्वविक्रयः, मद्यविक्रयः, मांसविक्रयः, अप्रवेक्षिततिलसर्षपपीडनं मिथ्याजीवः। अस्माद्विरतिः। अयमुच्यते भिक्षवः सम्यगाजीवः॥

तत्र सम्यग्व्यायामः कतमः? इह भिक्षवोऽभिवादनवन्दनप्रत्युत्थानाञ्जलिसामीचीकर्म करनीयम्। अयमुच्यते भिक्षवः सम्यग्व्यायामः॥

तत्र सम्यक्स्मृतिः कतमा? इह खलु भिक्षवो भिक्षुः स्त्रियं दृष्ट्वा उत्पन्ने रागे बाह्याध्यात्मिकयोः शरीरयोरशुभाकारेण यथाभूतदर्शी भवति—सन्त्यस्मिन्काये केशा रोमाणि नखा दन्ता रजो मलं त्वङ्मांसमस्थि स्नायुः शिरा वृक्का हृदयं प्लीहा क्लोमक आमाशयः पक्वाशय अन्त्राण्यन्त्रगुणा औदरीयकं यकृत्पुरीषमश्रुः स्वेदः खेडः सिंहाणको वसा लसिका मज्जा मेदः पित्तं श्लेष्मा पूयं शोणितं मस्तकं मस्तकलुङ्ग उच्चारप्रस्रावैः पूर्णं नानाप्रकारस्याशुचेरिति। इयमुच्यते भिक्षवः सम्यक्स्मृतिः॥

सम्यक्समाधिः कतमः? चत्वारि ध्यानानि। इह भिक्षवो भिक्षुर्विविक्तं कामैर्विविक्तं पापकैरकुशलधर्मैः सवितर्कं सविचारं विवेकजं प्रीतिसुखं प्रथमं ध्यानमुपसंपद्य विहरति । स वितर्कविचाराणां व्युपशमादध्यात्मसंप्रसादाच्चेतस एकोतीभावादवितर्कमविचारं समाधिजं प्रीतिसुखं द्वितीयं ध्यानमुपसंपद्य विहरति। स प्रीतेर्विरागादुपेक्षको विहरति स्मृतः संप्रजानन्, सुखं च कायेन प्रतिसंवेदयति। यत्तदार्या आचक्षते—उपेक्षकः स्मृतिमान्सुखविहारीति तृतीयं ध्यानमुपसंपद्य विहरति । स सुखस्य च प्रहाणाद्दुःखस्य च प्रहाणात्पूर्वमेव च सौमनस्यदौर्मनस्ययोरस्तंगमाददुःखासुखमुपेक्षास्मृतिपरिशुद्धं चतुर्थं ध्यानमुपसंपद्य विहरति । इमानि खलु भिक्षवश्चत्वारि ध्यानानि। अयमुच्यते सम्यक्समाधिः ॥

अयं भिक्षव आर्याष्टाङ्गो मार्गः ॥

…

एतानि वो भिक्षवोऽरण्यायतनानि वृक्षमूलानि शून्यागाराणि पर्वत-कन्दरगिरिगुहापलालपुञ्जानि, अभ्यवकाशश्मशानवनप्रस्थप्रान्तानि शय-नासनान्यध्यावसत। ध्यायत भिक्षवो मा प्रमाद्यत। मा पश्चाद्विप्रतिसा-रिणो भविष्यथ। इदमनुशासनम्॥

अस्मिन्खलु धर्मपर्याये भाष्यमाणे पञ्चानां भिक्षुशतानामनुपादाय आस्रवेभ्यश्चित्तानि विमुक्तानि।

इदमवोचद्भगवान्। आत्तमनास्ते भिक्षवः, सा च सर्वावती पर्षत्सदेव-मानुषासुरगन्धर्वश्च लोको भगवतो भाषितमभ्यनन्दन्निति॥

अर्थविनिश्चयधर्मपर्यायः समाप्तः॥

# अर्थविनिश्चयो नाम धर्मपर्यायः।

नमो बुद्धाय।

एवं मया श्रुतम्—एकस्मिन्समये भगवान्श्रावस्त्यां विहरति स्म पूर्वारामे मृगारमातुः प्रासादे महता भिक्षुसङ्घेन सार्धमर्धत्रयोदशभिर्भिक्षुशतैः। तत्र च भगवान्धीरगम्भीरमधुरोदारनिर्दोषस्वरेण भिक्षूनामन्त्रयते स्म—धर्मं वो भिक्षवो देशयिष्यामि, आदौ कल्याणं मध्ये कल्याणं पर्यवसाने कल्याणम्, स्वर्थं सुव्यञ्जनम्, केवलं परिपूर्णं परिशुद्धं पर्यवदातं ब्रह्मचर्यं संप्रकाशयिष्ये, यदुतार्थविनिश्चयं नाम धर्मपर्यायम्। तच्छृणुत साधु च सुष्ठु च मनसिकुरुत, भाषिष्ये। साधु भगवन्निति ते भिक्षवो भगवतः प्रत्यश्रौषुः॥

भगवांस्तानिदमवोचत्—कतमश्चासौ भिक्षवोऽर्थविनिश्चयो नाम धर्मपर्यायः? यदुत—पञ्च स्कन्धाः, पञ्चोपादानस्कन्धाः, अष्टादश धातवः, द्वादशायतनानि, द्वादशाङ्गः प्रतीत्यसमुत्पादः, चत्वार्यार्यसत्यानि, द्वाविंशतिरिन्द्रियाणि, चत्वारि ध्यानानि, चतस्र आरूप्यसमापत्तयः, चत्वारो ब्रह्मविहाराः, चतस्रः प्रतिपदः, चतस्रः समाधिभावनाः, चत्वारि स्मृत्युपस्थानानि, चत्वारि सम्यक्प्रहाणानि, चत्वार ऋद्धिपादाः, पञ्चेन्द्रियाणि, पञ्च बलानि, सप्त बोध्यङ्गानि, आर्याष्टाङ्गमार्गः, षोडशाकारानापानानुस्मृतिः, चत्वारि स्रोतापत्त्यङ्गानि, दश तथागतबलानि, चत्वारि

वैशारद्यानि, चतस्रः प्रतिसंविदः, अष्टादशावेणिका बुद्धधर्माः, द्वात्रिंशन्महापुरुषलक्षणानि, अशीतिरनुव्यञ्जनानि। अयं भिक्षवोऽर्थविनिश्चयस्य धर्मपर्यायस्योद्देशः॥

…

तत्र कतमानि चत्वार्यार्यसत्यानि? तद्यथा—दुःखमार्यसत्यम्, दुःखसमुदय आर्यसत्यम्, दुःखनिरोध आर्यसत्यम्, दुःखनिरोधगामिनी प्रतिपदार्यसत्यम्॥

तत्र दुःखमार्यसत्यं कतमत्? तद्यथा—जातिर्दुःखम्, जरा दुःखम्, व्याधिर्दुःखम्, मरणं दुःखम्, प्रियवियोगो दुःखम्, अप्रियसंयोगो दुःखम्, रूपं दुःखम्, वेदना दुःखम्, संज्ञा दुःखम्, संस्कारा दुःखम्, विज्ञानं दुःखम्, यदपीच्छन्पर्येषमाणो न लभते तदपि दुःखम्, संक्षिप्तेण पञ्चोपादानस्कन्धा दुःखम्। इदमुच्यते दुःखमार्यसत्यम्॥

तत्र दुःखसमुदय आर्यसत्यं कतमत्? तद्यथा—तृष्णा पौनर्भविकी नन्दीरागसहगता तत्र तत्राभिनन्दिनी। इदमुच्यते दुःखसमुदय आर्यसत्यम्॥

तत्र दुःखनिरोध आर्यसत्यं कतमत्? यदस्या एव तृष्णायाः पौनर्भविक्या नन्दीरागसहगतायास्तत्र तत्राभिनन्दिन्या अशेषतः प्रहाणं प्रतिनिःसर्गो व्यन्तीभावः क्षयो विरागो निरोधो व्युपशमोऽस्तंगमः। इदमुच्यते दुःखनिरोध आर्यसत्यम्॥

तत्र दुःखनिरोधगामिनी प्रतिपदार्यसत्यं कतमत्? अयमेव सम्यग्दृष्ट्यादिरार्याष्टाङ्गो मार्गः। तद्यथा—सम्यग्दृष्टिः, सम्यक्संकल्पः, सम्यग्वाक्, सम्यक्कर्मान्तः, सम्यगाजीवः, सम्यग्व्यायामः, सम्यक्स्मृतिः, सम्यक्समाधिरिति। तद्यथा कश्चित्पुरुषो ज्वराभिभूतः कुशलसम्मतं दृष्टकर्माणं श्रुतशास्त्रं वैद्यमुपसंक्रम्य ब्रूयात्—ज्वराभिभूतोऽस्मि, अस्योपशमायौषधमुपदिश्यमानमिच्छामीति। स तस्य भिषक्प्राग्निदानमेव पृच्छेत्—किं त्वया भुक्तं पीतं वेति। आतुरस्तस्य कथयेत्—मया हि दधि त्रपुषं भक्षितमन्नपानं च तक्रं पीतमिति। तस्य स भिषग्विषशोषणमुपदिश्य औषधमुपदिशेत्। एवमेव जात्यादिमहाज्वरसंतापिताः साधवो महाचित्तभिषजं महाकारुणिकं तथागतमुपसंक्रम्य दुःखज्वरापहं धर्मं पृच्छेयुः। तेभ्यो भगवान्निदानं समुदयाख्यमाख्याय आर्याष्टाङ्गमहौषधं शान्तिकरं निर्वाणमुपदिशेत्। क्लेशातुरोऽप्येनं मार्गं भावयन्नचिरात्सर्वदुःखक्षयमवाप्य निर्वाणपुरं गत्वा परां शान्तिमवाप्नोतीति। इदमुच्यते दुःखनिरोधगामिनी प्रतिपदार्यसत्यम्॥

इमानि भिक्षवश्चत्वार्यार्यसत्यानि॥

…

तत्र भिक्षवः कतम आर्याष्टाङ्गो मार्गः? तद्यथा—सम्यग्दृष्टिः, सम्यक्संकल्पः, सम्यग्वाक्, सम्यक्कर्मान्तः, सम्यगाजीवः, सम्यग्व्यायामः, सम्यक्स्मृतिः, सम्यक्समाधिश्च॥

तत्र भिक्षवः सम्यग्दृष्टिः कतमा? अस्त्ययं लोकः, अस्ति परलोकः, अस्ति माता, अस्ति पिता, अस्ति दत्तम्, अस्ति हुतम्, अस्तीष्टानिष्टसुकृ-तदुष्कृतानां कर्मणां फलविपाकः, सन्ति लोके सम्यग्गताः सम्यक्प्रतिपन्ना इति। इयं भिक्षवः सम्यग्दृष्टिः। तद्विपरीता मिथ्यादृष्टिः॥

सम्यक्संकल्पः कतमः? बुद्धत्वादिपरिणामितं शीलं दानम्, न चक्र-वर्त्यादिपरिणामितम्। अयं भिक्षवः सम्यक्संकल्पः॥

सम्यग्वाक्कतमा? इह भिक्षवः पारुष्यानृतपैशुन्यसंभिन्नप्रलापवर्जिता वाक्। इयमुच्यते सम्यग्वाक्॥

सम्यक्कर्मान्तः कतमः? कायवाङ्मनसां दशकुशलेषु कर्मपथेषु व्या-पारः। तत्र कायिकं त्रिविधम्—प्राणातिपातादत्तादानकाममिथ्याचारा-द्विरतिः। वाचिकं चतुर्विधम्—अनृतपैशुन्यपारुष्यसंभिन्नप्रलापाद्विर-तिः। मानसं त्रिविधम्—अभिध्याव्यापादमिथ्यादृष्टिभ्यो विरतिः॥ तत्र प्राणातिपातः कतमः? प्राणी च भवति, प्राणिसंज्ञी च भवति, वधकचित्तं चोत्पादयति, उपक्रमं च करोति। जीविताद्व्यपरोपयति। अयमुच्यते भिक्षवः प्राणातिपातः। अन्यत्र प्रमादाददृष्टाद्वाप्राणिवधः। तत्र अदत्ता-दानं कतमत्? स्तेयचित्तस्य परद्रव्यस्वीकरणमदत्तादानम्। अन्यत्र मातृ-पितृभ्रातृस्वजनमित्रद्रव्यस्य स्वल्पस्यानुपरोधिनो ग्रहणं नादत्तादानम्। तत्र काममिथ्याचारः कतमः? परस्त्रीणामुपभोगो भर्तृराजमातृपितृरक्षि-तानाम्, अथवा अस्थानागम्यादेशाकालेषु विप्रतिपत्तिः। अयमुच्यते

काममिथ्याचारः । कायिकमेतत्त्रिविधम् ॥ अनृतं कतमत्? साक्षिप्रश्ने यथाभूताद्वितथवचनमनृतम् । अनर्हतो वा अर्हन्नस्मीति परिहासवर्जम् । इदमुच्यतेऽनृतम् । पैशुन्यं कतमत्? अभूतेन सत्येन वा भेदकरं वचनं पैशुन्यम् । इदमुच्यते पैशुन्यम् । पारुष्यं कतमत्? परदुःखचिकीर्षोरनि-ष्टवचनश्रावणं पारुष्यम् । दुःखमस्य भवत्वित्यनया बुद्ध्या यदनिष्टवचन-श्रावणं क्रियते तत्पारुष्यम् । इदमुच्यते पारुष्यम् । संभिन्नप्रलापः कतमः? तद्यथा—राजकथा, चोरकथा, युद्धकथा, मद्यकथा, द्यूतकथा, स्त्रीकथा, आख्यायिककथा कथनं वा । अयमुच्यते संभिन्नप्रलापः । वाचिकमेतच्च-तुर्विधम् ॥ तत्राभिध्या कतमा? परद्रव्यस्वीकरणेच्छाभिध्या । यान्यस्य द्रव्याणि तानि मम स्युरिति । इयमुच्यतेऽभिध्या । तत्र व्यापादः कतमः? परजीवितव्यपरोपणावच्छेदनपीडादिचिन्तनम् । अयमुच्यते व्यापादः । तत्र मिथ्यादृष्टिः कतमा? नास्त्ययं लोकः, नास्ति परलोक इति पूर्ववत् । एतन्मानसं त्रिविधम् ॥

तत्र सम्यगाजीवः कतमः? भिक्षोस्तावत्कुहना लपना नैमित्तिकत्वं नैष्पेषिकत्वं लाभेन लाभप्रतिकाङ्क्षा च ॥ तत्र कुहना कतमा? भिक्षुर्दा-नपतिं दृष्ट्वा पर्यङ्कं बद्ध्वा पथि शून्यागारे वा निषीदति, ध्यायी भिक्षु-रयमर्हन्निति लाभसत्कारो मे भविष्यतीति । एवमादिका कुहनेत्युच्यते । तत्र लपना कतमा? इह भिक्षुर्लाभसत्कारनिमित्तमेव, त्वं मे माता, त्वं मे पिता, त्वं मे भगिनी, त्वं मे दुहितेत्येवमन्यान्यपि प्रियवचनानि ब्रवीति । एवमादिका लपनेत्युच्यते । तत्र नैमित्तिकत्वं कतमत्? भिक्षुस्तावत्

पिण्डपातं परिभुज्य असकृद्ब्रूते—यादृशोऽयं पिण्डपातस्तादृशोऽन्येषूपासकगृहेषु न लभ्यते । अलाभसत्कारचित्तस्य तु वदतोऽदोषः । इदमुच्यते नैमित्तिकत्वम् । तत्र नैष्पेषिकत्वं कतमत्? भिक्षुस्तावद् यत्र गृहे पिण्डपातं न लभते, दापयितुकामश्च भवति, तत्र ब्रूते—अदानपतयो हि निरयं गच्छन्ति । यूयमप्यदानपतयो व्यक्तं निरयगामिन इति । नरकभयभीताः पिण्डपातमनुप्रयच्छति । तं च लब्ध्वा परिभुङ्क्ते । इदमुच्यते नैष्पेषिकत्वम् । तत्र लाभेन लाभप्रतिकाङ्क्षा कतमा? भिक्षुस्तावदात्मीयेन धनेन शोभनानि चीवराणि चोपक्रीय उपासकेभ्यो दर्शयति—ईदृशानि वयं वस्त्राणि दानपतिभ्यो लभामह इति । ते लज्जिता यानि वस्त्राणि प्रयच्छन्ति तानि परिभुङ्क्ते । इयमुच्यते भिक्षवो लाभेन लाभप्रतिकाङ्क्षा । अयं भिक्षवो मिथ्याजीवः । अस्माद्विरतिरिति सम्यगाजीवः ॥ इह खलु भिक्षव उपासकस्य मिथ्याजीवः कतमः? विषविक्रयः, शस्त्रविक्रयः, सत्त्वविक्रयः, मद्यविक्रयः, मांसविक्रयः, अप्रवेक्षिततिलसर्षपपीडनं मिथ्याजीवः । अस्माद्विरतिः । अयमुच्यते भिक्षवः सम्यगाजीवः ॥

तत्र सम्यग्व्यायामः कतमः? इह भिक्षवोऽभिवादनवन्दनप्रत्युत्थानाञ्जलिसामीचीकर्म करनीयम् । अयमुच्यते भिक्षवः सम्यग्व्यायामः ॥

तत्र सम्यक्स्मृतिः कतमा? इह खलु भिक्षवो भिक्षुः स्त्रियं दृष्ट्वा उत्पन्ने रागे बाह्याध्यात्मिकयोः शरीरयोरशुभाकारेण यथाभूतदर्शी भवति—सन्त्यस्मिन्काये केशा रोमाणि नखा दन्ता रजो मलं त्वङ्मांसमस्थि स्नायुः शिरा वृक्का हृदयं प्लीहा क्लोमक आमाशयः पक्वाशय अन्त्राण्यन्त्रगुणा

औदरीयकं यकृत्पुरीषमश्रु: स्वेद: खेड: सिंहाणको वसा लसिका मज्जा मेद: पित्तं श्लेष्मा पूयं शोणितं मस्तकं मस्तकलुङ्ग उच्चारप्रस्रावै: पूर्णं नाना-प्रकारस्याशुचेरिति। इयमुच्यते भिक्षव: सम्यक्स्मृति: ॥

सम्यक्समाधि: कतम:? चत्वारि ध्यानानि। इह भिक्षवो भिक्षुर्विविक्तं कामैर्विविक्तं पापकैरकुशलधर्मै: सवितर्कं सविचारं विवेकजं प्रीतिसुखं प्रथमं ध्यानमुपसंपद्य विहरति । स वितर्कविचाराणां व्युपशमा-दध्यात्मसंप्रसादाच्चेतस एकोतीभावादवितर्कमविचारं समाधिजं प्रीति-सुखं द्वितीयं ध्यानमुपसंपद्य विहरति। स प्रीतेर्विरागादुपेक्षको विहरति स्मृत: संप्रजानन्, सुखं च कायेन प्रतिसंवेदयति। यत्तदार्या आचक्षते—उपेक्षक: स्मृतिमान्सुखविहारीति तृतीयं ध्यानमुपसंपद्य विहरति । स सुखस्य च प्रहाणाद्दु:खस्य च प्रहाणात्पूर्वमेव च सौमनस्यदौर्मनस्ययोर-स्तंगमाददु:खासुखमुपेक्षास्मृतिपरिशुद्धं चतुर्थं ध्यानमुपसंपद्य विहरति । इमानि खलु भिक्षवश्चत्वारि ध्यानानि। अयमुच्यते सम्यक्समाधि: ॥

अयं भिक्षव आर्याष्टाङ्गो मार्ग: ॥

…

एतानि वो भिक्षवोऽरण्यायतनानि वृक्षमूलानि शून्यागाराणि पर्वत-कन्दरगिरिगुहापलालपुञ्जानि, अभ्यवकाशश्मशानवनप्रस्थप्रान्तानि शय-नासनान्यध्यावसत। ध्यायत भिक्षवो मा प्रमाद्यत। मा पश्चाद्विप्रतिसा-रिणो भविष्यथ। इदमनुशासनम् ॥

अस्मिन्खलु धर्मपर्यायि भाष्यमाणे पञ्चानां भिक्षुशतानामनुपादाय आस्रवेभ्यश्चित्तानि विमुक्तानि।

इदमवोचद्भगवान्। आत्तमनास्ते भिक्षवः, सा च सर्वावती पर्षत्सदेव-मानुषासुरगन्धर्वश्च लोको भगवतो भाषितमभ्यनन्दन्निति॥

अर्थविनिश्चयधर्मपर्यायः समाप्तः॥

# 3. Śāriputra and the Goddess

(*Vimalakīrtinirdeśasūtra*, ch. 6)

The *Vimalakīrtinirdeśa Sūtra* is an early Mahāyāna sūtra. This scripture, especially beloved in the East Asian Buddhist tradition, is remarkable for having a layman as its main protagonist—a wealthy householder and lay follower (*upāsaka*) of the Buddha named Vimalakīrti. The sūtra is named in reference to the elucidation or teaching (*nirdeśa*) on emptiness (*śūnyatā*) and non-duality (*advaya*) delivered by Vimalakīrti to a large group of monks and bodhisattvas.

At the end of chapter six, Vimalakīrti's instruction to Mañjuśrī, the head of the bodhisattvas, is interrupted by the appearance of a goddess in the layman's house. The ensuing conversation between the goddess and Śāriputra, one of the Buddha's chief monastic disciples (*śrāvaka*), is one of the most intriguing episodes from the whole sūtra. In this exchange, the eminent Śāriputra, traditionally regarded as "foremost in wisdom", expresses the unenlightened Hīnayānist point of view. As the conversation unfolds, Śāriputra finds himself outmatched by the goddess, who displays her eloquence (*pratibhāna*) and magic powers to dispel the great disciple's mistaken notions (*vikalpa*).

# 三、舍利弗和天女

摘自 *Vimalakīrtinirdeśasūtra*《維摩詰經》第六品

《維摩詰經》是早期的大乘佛經，特別受到東亞佛教傳統的喜愛。這部經以在家居士（upāsaka）維摩詰（Vimalakīrti）作為主要說法者。此經主要內容是維摩詰居士對一大群菩薩和僧侶講授關於「空性」（śūnyatā）以及「不二」（advaya）的教法（nirdeśa）。

我們所選取的文本出自《維摩詰經》第六品（漢譯本為第七品）。當維摩詰居士與上首菩薩文殊師利（Mañjuśrī）論說佛法時，室內出現天女散花。這位天女與舍利弗（Śāriputra）隨後進行的對答，是此經最有趣的情節之一。在此對答中，傳統上被認為「智慧第一」的舍利弗代表了小乘行者的立場。隨著對話的展開，天女以其辯才（pratibhāna）及神通力破除這位大聲聞弟子的錯誤分別（vikalpa）。

# विमलकीर्तिनिर्देशे

## देवतापरिवर्तः षष्ठः।

...

अथ या तत्र गृहे देवता प्रतिवसति सा तेषां बोधिसत्वानां महासत्वानामिमं धर्मनिर्देशं श्रुत्वा तुष्टोदग्रात्तमना, औदारिकमात्मभावं संदर्श्य दिव्यैः पुष्पैस्तान्महासत्वांस्तांश्च महाश्रावकानभ्यवकिरति स्म। अभ्यवकीर्णानां च तत्र यानि बोधिसत्वानां काये पुष्पाणि पतितानि तानि धरणितले प्रतिष्ठितानि। यानि पुनर्महाश्रावकाणां काये पुष्पाणि पतितानि तानि तत्रैव स्थितानि, न भूमौ पतितानि। ततस्ते महाश्रावका ऋद्धिप्राति-हार्यैस्तानि पुष्पाण्युत्सृजन्ति, न च पतन्ति।

अथ सा देवतायुष्मन्तं शारिपुत्रमेवमाह—किं भदन्त शारिपुत्र एतानि

पुष्पाण्युत्सृजसि?

आह—अकल्पिकानि देवते एतानि पुष्पाणि। तस्मादहमेतानि पुष्पाण्यपनयामि।

देवताह—मा भदन्त शारिपुत्र एवं वोचः। तत्कस्माद्धेतोः? एतानि हि पुष्पाणि कल्पिकानि। किं कारणम्? तथा ह्येतानि पुष्पाणि न कल्पयन्ति न विकल्पयन्ति। स्थविरः पुनः शारिपुत्रः कल्पयति विकल्पयति च। ये भदन्त शारिपुत्र स्वाख्याते धर्मविनये प्रव्रज्यां कल्पयन्ति विकल्पयन्ति च तेऽकल्पिकाः। स्थविरस्तु कल्पयति विकल्पयति च। ये पुनर्न कल्पयन्ति न विकल्पयन्ति ते कल्पिकाः। पश्य भदन्त शारिपुत्र एषां महासत्वानां काये पुष्पाणि न श्लिष्यन्ति। यथापि नाम सर्वकल्पविकल्पप्रहीणत्वात्। तद्यथापि नाम भीरुकजातीयस्य पुरुषस्यामनुष्या अवतारं लभन्ते। एवमेव

संसारभयभीतानां रूपशब्दगन्धरसस्प्रष्टव्यान्यवतारं लभन्ते। ये पुनः सर्व-संसारक्लेशभयविगताः किं तेषां रूपशब्दगन्धरसस्प्रष्टव्यानि करिष्यन्ति? येषां वासनाप्रहीणा तेषां काये पुष्पाणि श्लिष्यन्ति। तस्मात्सर्ववासना-प्रहीणानां काये पुष्पाणि न श्लिष्यन्ति।

अथ खल्वायुष्माञ्शारिपुत्रस्तां देवतामेतदवोचत्—कियच्चिरनिविष्टा पुनस्त्वं देवते इह गृहे?

आह—यावच्चिरनिविष्टा स्थविरस्यार्या विमुक्तिः।

आह—न चिरस्थिता त्वं देवते इह गृहे?

आह—कियच्चिरनिविष्टा पुनः स्थविरस्यार्या विमुक्तिः?

ततः स्थविरस्तूष्णीमभूत्।

आह—किमिदानीं महाप्रज्ञानामग्र्यः स्थविरस्तूष्णीमभूत्, प्राप्तकालं प्रश्नं न विसर्जयति?

आह—अप्रव्याहारा हि देवते विमुक्तिः। तन्न जाने किं व्याहरामीति।

आह—यद्यदेव स्थविरोऽक्षरमुदाहरति सर्वाण्येतान्यक्षराणि विमुक्तिलक्षणानि। तत्कस्माद्धेतोः? या हि सा विमुक्तिः सा नाध्यात्मं न बहिर्नोभयमन्तरेणोपलभ्यते। एवमक्षराण्यपि। तस्मात्तर्हि भदन्त शारिपुत्र मा अक्षरापनयेन विमुक्तिं निर्दिश। तत्कस्माद्धेतोः? सर्वधर्मसमता हि विमुक्तिः।

आह—ननु देवते रागदोषमोहविगमाद्विमुक्तिः?

देवताह—अभिमानिकानामेष निर्देशो रागदोषमोहविगमाद्विमुक्ति-

रिति। ये निरभिमानिकास्तेषां रागदोषमोहप्रकृतिरेव विमुक्तिः।

अथ खल्वायुष्माञ्शारिपुत्रस्तां देवतामेतदवोचत्—साधु साधु देवते किं त्वया प्राप्तं किं वा साक्षात्कृतं यस्यास्त ईदृशं प्रतिभानम्?

आह—न मया भदन्त शारिपुत्र किंचित्प्राप्तं साक्षात्कृतं वा। तेन म ईदृशं प्रतिभानम्। येषामेवं भवत्यस्माभिः प्राप्तं वा साक्षात्कृतं चेति ते स्वाख्याते धर्मविनय आभिमानिका इत्युच्यन्ते।

आह—किं त्वं देवते श्रावकयानिका प्रत्येकबुद्धयानिका महायानिका वा?

आह—श्रावकायानिकास्मि श्रावकयानसूचनतया, प्रत्येकबुद्धयानिकास्मि प्रतीत्यधर्मावतारेण, महायानिकास्मि महाकरुणानुत्सृजनतया। ...

आह—किं त्वं देवते स्त्रीभावं न निवर्तयसि?

आह—परिपूर्णानि मे द्वादशवर्षाण्युपादाय स्त्रीभावं पर्येषमाणाया न चैनं लभे। अपि च भदन्त शारिपुत्र या मायाकारेण स्त्रीनिर्मिता यस्तामेवं वदेत्, किं त्वं स्त्रीभावं न निवर्तयसीति, स किं वदेत्?

आह—न तस्याः काचिद्भूता परिनिष्पत्तिः।

आह—एवमेव भदन्त शारिपुत्र अपरिनिष्पन्नेषु सर्वधर्मेषु मायानिर्मितस्वभावेषु कुतस्तवैवं भवति—किं त्वं स्त्रीभावं न निवर्तयसीति?

अथ सा देवता तादृशमधिष्ठानमधितिष्ठति स्म, यथा स्थविरः शारिपुत्रो यादृशी सा देवता तादृशः संदृश्यते, सा देवता यादृशः स्थविरस्तादृशी संदृश्यते। अथ सा देवता शारिपुत्ररूपा शारिपुत्रं देवतारूपधा-

रिणमपृच्छत्——किं भदन्त शारिपुत्र स्त्रीभावं न निवर्तयसि?

शारिपुत्रो देवतारूप्याह——न जाने किं विनिवर्तयामीति। पुरुषरूपमन्तर्हितं स्त्रीरूपं मे निर्वृत्तम्।

आह——यदि स्थविरः शक्ष्यति स्त्रीभावं विनिवर्तयितुम्, ततः सर्वाः स्त्रियोऽपि स्त्रीभावं विनिवर्तयिष्यन्ति। यथा स्थविरो न स्त्री स्त्रीव संदृश्यते, एवं सर्वस्त्रीणामपि स्त्रीरूपम्। न च स्त्रियः, स्त्रीरूपाश्च संदृश्यन्ते। इदं संधाय भगवानाह——सर्वधर्मा न स्त्री न पुरुष इति।

अथ सा देवता तदधिष्ठानमवासृजत्। अथायुष्माञ्शारिपुत्रः पुनरेव स्वरूपसमन्वागतो बभूव। अथ सा देवतायुष्मन्तं शारिपुत्रमेवमाह——क्व नु ते भदन्त शारिपुत्र स्त्रीरूपं कृतं गतम्?

आह—न तत्कृतं न विकृतम्।

आह—एवमेव सर्वधर्मा न कृता न विकृताः। यत्र च न कृतिर्न विकृतिस्तद्बुद्धवचनम्।

आह—इतस्त्वं देवते च्युता कुत्रोपपत्स्यसे?

आह—यत्रैव तथागतनिर्मित उपपत्स्यते, तत्रैवाहमुपपत्स्ये।

आह—तथागतनिर्मितस्य न च्युतिर्नोपपत्तिः।

आह—एवमेव सर्वधर्माणां न च्युतिर्नोपपत्तिः।

आह—कियच्चिरेण पुनर्देवते बोधिमभिसंभोत्स्यसे?

आह—यदा स्थविरः पृथग्जनधर्मसमन्वागतो भविष्यति, तदाहं

बोधिमभिसंभोत्स्ये।

आह—अस्थानमेतद्देवते यदहं पृथग्जनधर्मसमन्वागतः स्याम्।

आह—एवमेव भदन्त शारिपुत्र अस्थानमेतद्यदहं बोधिमभिसंभोत्स्ये। तत्कस्माद्धेतोः? अस्थानस्थितैव हि बोधिः। तस्मादस्थानं न कश्चिद-भिसंभोत्स्यते।

स्थविर आह—उक्तं देवते तथागतेन गङ्गानदीवालिकासमास्तथागता अभिसंबुद्धा अभिसंबुध्यन्तेऽभिसंभोत्स्यन्ते च।

देवताह—अक्षरगणनासंकेताधिवचनमेतद्भदन्त शारिपुत्र अतीताना-गतप्रत्युत्पन्ना बुद्धा इति। न पुनर्बुद्धा अतीता वानागता वा वर्तमाना वा। त्र्यध्वसमतिक्रान्ता हि बोधिः। अपि च प्राप्तं स्थविरेणार्हत्वम्?

आह—प्राप्तमसंप्राप्तिकारणेन।

आह—एवमेवाभिसंबोधिरनभिसंबोधिकारणेन।

अथ विमलकीर्तिर्लिच्छविरायुष्मन्तं शारिपुत्रमेवमाह—द्वानवतिबुद्धकोटीपर्युपासिता भदन्त शारिपुत्र एषा देवताभिज्ञाज्ञानविक्रीडिता प्रणिधानसमुच्छ्रिता क्षान्तिप्रतिलब्धावैवर्तिकसमवसरणा प्रणिधानवशेन यथेच्छति तथा तिष्ठति सत्वपरिपाकाय॥

देवतापरिवर्तः षष्ठः॥

# विमलकीर्तिनिर्देशे
# देवतापरिवर्तः षष्ठः ।

…

अथ या तत्र गृहे देवता प्रतिवसति सा तेषां बोधिसत्वानां महासत्वानामिमं धर्मनिर्देशं श्रुत्वा तुष्टोदग्रात्तमना, औदारिकमात्मभावं संदर्श्य दिव्यैः पुष्पैस्तान्महासत्वांस्तांश्च महाश्रावकानभ्यवकिरति स्म। अभ्यवकीर्णानां च तत्र यानि बोधिसत्वानां काये पुष्पाणि पतितानि तानि धरणितले प्रतिष्ठितानि । यानि पुनर्महाश्रावकाणां काये पुष्पाणि पतितानि तानि तत्रैव स्थितानि, न भूमौ पतितानि । ततस्ते महाश्रावका ऋद्धिप्रातिहार्यैस्तानि पुष्पाण्युत्सृजन्ति, न च पतन्ति ।

अथ सा देवतायुष्मन्तं शारिपुत्रमेवमाह—किं भदन्त शारिपुत्र एतानि पुष्पाण्युत्सृजसि?

आह—अकल्पिकानि देवते एतानि पुष्पाणि । तस्मादहमेतानि पुष्पाण्यपनयामि ।

देवताह—मा भदन्त शारिपुत्र एवं वोचः । तत्कस्माद्धेतोः? एतानि हि पुष्पाणि कल्पिकानि । किं कारणम्? तथा ह्येतानि पुष्पाणि न कल्पयन्ति न विकल्पयन्ति । स्थविरः पुनः शारिपुत्रः कल्पयति विकल्पयति च । ये

भदन्त शारिपुत्र स्वाख्याते धर्मविनये प्रव्रज्यां कल्पयन्ति विकल्पयन्ति च तेऽकल्पिकाः। स्थविरस्तु कल्पयति विकल्पयति च। ये पुनर्न कल्पयन्ति न विकल्पयन्ति ते कल्पिकाः। पश्य भदन्त शारिपुत्र एषां महासत्वानां काये पुष्पाणि न श्लिष्यन्ति। यथापि नाम सर्वकल्पविकल्पप्रहीणत्वात्। तद्यथापि नाम भीरुकजातीयस्य पुरुषस्यामनुष्या अवतारं लभन्ते। एवमेव संसारभयभीतानां रूपशब्दगन्धरसस्प्रष्टव्यान्यवतारं लभन्ते। ये पुनः सर्व-संसारक्लेशभयविगताः किं तेषां रूपशब्दगन्धरसस्प्रष्टव्यानि करिष्यन्ति? येषां वासनाप्रहीणा तेषां काये पुष्पाणि श्लिष्यन्ति। तस्मात्सर्ववासना-प्रहीणानां काये पुष्पाणि न श्लिष्यन्ति।

अथ खल्वायुष्माञ्शारिपुत्रस्तां देवतामेतदवोचत्—कियच्चिरनिविष्टा पुनस्त्वं देवते इह गृहे?

आह—यावच्चिरनिविष्टा स्थविरस्यार्या विमुक्तिः।

आह—न चिरस्थिता त्वं देवते इह गृहे?

आह—कियच्चिरनिविष्टा पुनः स्थविरस्यार्या विमुक्तिः?

ततः स्थविरस्तूष्णीमभूत्।

आह—किमिदानीं महाप्रज्ञानामग्र्यः स्थविरस्तूष्णीमभूत्, प्राप्तकालं प्रश्नं न विसर्जयति?

आह—अप्रव्याहारा हि देवते विमुक्तिः। तन्न जाने किं व्याहरामीति।

आह—यद्यदेव स्थविरोऽक्षरमुदाहरति सर्वाण्येतान्यक्षराणि विमु-क्तिलक्षणानि। तत्कस्माद्धेतोः? या हि सा विमुक्तिः सा नाध्यात्मं न बहिर्नोभयमन्तरेणोपलभ्यते। एवमक्षराण्यपि। तस्मात्तर्हि भदन्त शारि-पुत्र मा अक्षरापनयेन विमुक्तिं निर्दिश। तत्कस्माद्धेतोः? सर्वधर्मसमता हि विमुक्तिः।

आह—ननु देवते रागदोषमोहविगमाद्विमुक्तिः?

देवताह—अभिमानिकानामेष निर्देशो रागदोषमोहविगमाद्विमुक्ति-रिति। ये निरभिमानिकास्तेषां रागदोषमोहप्रकृतिरेव विमुक्तिः।

अथ खल्वायुष्माञ्शारिपुत्रस्तां देवतामेतदवोचत्—साधु साधु देवते किं त्वया प्राप्तं किं वा साक्षात्कृतं यस्यास्त ईदृशं प्रतिभानम्?

आह—न मया भदन्त शारिपुत्र किंचित्प्राप्तं साक्षात्कृतं वा। तेन म ईदृशं प्रतिभानम्। येषामेवं भवत्यस्माभिः प्राप्तं वा साक्षात्कृतं चेति ते स्वाख्याते धर्मविनय आभिमानिका इत्युच्यन्ते।

आह—किं त्वं देवते श्रावकयानिका प्रत्येकबुद्धयानिका महायानिका वा?

आह—श्रावकायानिकास्मि श्रावकयानसूचनतया, प्रत्येकबुद्धयानि-कास्मि प्रतीत्यधर्मावतारेण, महायानिकास्मि महाकरुणानुत्सृजनतया। ...

आह—किं त्वं देवते स्त्रीभावं न निवर्तयसि?

आह—परिपूर्णानि मे द्वादशवर्षाण्युपादाय स्त्रीभावं पर्येषमाणाया न चैनं लभे। अपि च भदन्त शारिपुत्र या मायाकारेण स्त्रीनिर्मिता यस्तामेवं वदेत्, किं त्वं स्त्रीभावं न निवर्तयसीति, स किं वदेत्?

आह—न तस्याः काचिद्भूता परिनिष्पत्तिः।

आह—एवमेव भदन्त शारिपुत्र अपरिनिष्पन्नेषु सर्वधर्मेषु मायानिर्मितस्वभावेषु कुतस्तवैवं भवति—किं त्वं स्त्रीभावं न निवर्तयसीति?

अथ सा देवता तादृशमधिष्ठानमधितिष्ठति स्म, यथा स्थविरः शारिपुत्रो यादृशी सा देवता तादृशः संदृश्यते, सा देवता यादृशः स्थविरस्तादृशी संदृश्यते। अथ सा देवता शारिपुत्ररूपा शारिपुत्रं देवतारूपधारिणमपृच्छत्—किं भदन्त शारिपुत्र स्त्रीभावं न निवर्तयसि?

शारिपुत्रो देवतारूप्याह—न जाने किं विनिवर्तयामीति। पुरुषरूपमन्तर्हितं स्त्रीरूपं मे निर्वृत्तम्।

आह—यदि स्थविरः शक्ष्यति स्त्रीभावं विनिवर्तयितुम्, ततः सर्वाः स्त्रियोऽपि स्त्रीभावं विनिवर्तयिष्यन्ति। यथा स्थविरो न स्त्री स्त्रीव संदृश्यते, एवं सर्वस्त्रीणामपि स्त्रीरूपम्। न च स्त्रियः, स्त्रीरूपाश्च संदृश्यन्ते। इदं संधाय भगवानाह—सर्वधर्मा न स्त्री न पुरुष इति।

अथ सा देवता तदधिष्ठानमवासृजत्। अथायुष्माञ्शारिपुत्रः पुनरेव स्वरूपसमन्वागतो बभूव। अथ सा देवतायुष्मन्तं शारिपुत्रमेवमाह—क्व

नु ते भदन्त शारिपुत्र स्त्रीरूपं कृतं गतम्?

आह—न तत्कृतं न विकृतम्।

आह—एवमेव सर्वधर्मा न कृता न विकृताः। यत्र च न कृतिर्न विकृतिस्तद्बुद्धवचनम्।

आह—इतस्त्वं देवते च्युता कुत्रोपपत्स्यसे?

आह—यत्रैव तथागतनिर्मित उपपत्स्यते, तत्रैवाहमुपपत्स्ये।

आह—तथागतनिर्मितस्य न च्युतिर्नोपपत्तिः।

आह—एवमेव सर्वधर्माणां न च्युतिर्नोपपत्तिः।

आह—कियच्चिरेण पुनर्देवते बोधिमभिसंभोत्स्यसे?

आह—यदा स्थविरः पृथग्जनधर्मसमन्वागतो भविष्यति, तदाहं बोधिमभिसंभोत्स्ये।

आह—अस्थानमेतद्देवते यदहं पृथग्जनधर्मसमन्वागतः स्याम्।

आह—एवमेव भदन्त शारिपुत्र अस्थानमेतद्यदहं बोधिमभिसंभोत्स्ये। तत्कस्माद्धेतोः? अस्थानस्थितैव हि बोधिः। तस्मादस्थानं न कश्चिद-भिसंभोत्स्यते।

स्थविर आह—उक्तं देवते तथागतेन गङ्गानदीवालिकासमास्तथागता

अभिसंबुद्धा अभिसंबुध्यन्तेऽभिसंभोत्स्यन्ते च।

देवताह—अक्षरगणनासंकेताधिवचनमेतद्भदन्त शारिपुत्र अतीतानागतप्रत्युत्पन्ना बुद्धा इति। न पुनर्बुद्धा अतीता वानागता वा वर्तमाना वा। त्र्यध्वसमतिक्रान्ता हि बोधिः। अपि च प्राप्तं स्थविरेणार्हत्वम्?

आह—प्राप्तमसंप्राप्तिकारणेन।

आह—एवमेवाभिसंबोधिरनभिसंबोधिकारणेन।

अथ विमलकीर्तिर्लिच्छविरायुष्मन्तं शारिपुत्रमेवमाह—द्वानवतिबुद्धकोटीपर्युपासिता भदन्त शारिपुत्र एषा देवताभिज्ञाज्ञानविक्रीडिता प्रणिधानसमुच्छ्रिता क्षान्तिप्रतिलब्धावैवर्तिकसमवसरणा प्रणिधानवशेन यथेच्छति तथा तिष्ठति सत्वपरिपाकाय॥

देवतापरिवर्तः षष्ठः॥

# 4. The Parable of the Magic City
(*Saddharmapuṇḍarīkasūtra*, ch. 7)

The *Saddharmapuṇḍarīka Sūtra*, usually referred to simply as the *Lotus Sūtra* in English, is an important early Mahāyāna scripture. This sūtra, famous for its many memorable parables, became one of the most influential Mahāyāna sūtras in the East Asian Buddhist tradition, where it has commonly been regarded as containing the Buddha's final and highest teaching.

Our text is drawn from the seventh chapter, in which the Buddha recounts one of his past lives, a genre of Buddhist narratives known as *pūrvayogas* ("former connections") or *jātakas* ("birth-stories"). The elaborate account of the Buddha's past life as one of sixteen novices (*śramaṇera*) practicing under the guidance of a Buddha named Mahābhijñājñānābhibhū is concluded by the story of an expert or skillful (*kuśala*) caravan leader—the fourth of the sūtra's seven parables. The well-known allegory illustrates one of the sūtra's central revelations, namely, the Buddha's use of expedient means (*upāya*) to gradually guide his disciples towards the attainment of true awakening, i.e., the Buddha Cognition (*buddhajñāna*) or Buddha Vehicle (*buddhayāna*).

# 四、**化城的譬喻**
摘自 *Saddharmapuṇḍarīkasūtra*《妙法蓮華經》第七品

《妙法蓮華經》是一部重要的早期大乘佛經。此經以包含許多令人難忘的譬喻而著稱，是東亞佛教傳統中最具影響力的大乘經典之一，並且通常被認為包含佛陀最高的教法。

我們的文本選自第七品，其中，佛陀敘述一個過去世的故事。這種敘述佛陀成佛之前的故事，被稱為「本生」（jātaka）或「宿緣」（pūrvayoga）。佛陀在過去無量劫的某一世，曾作為一位沙彌（śrāmaṇera），並跟隨當時的一尊名為大通智勝（Mahābhijñā-jñānābhibhū）佛出家。這個故事的最後部分是著名的化城喻，即《法華經》中七種譬喻（法華七喻）的第四喻，以足智多謀的領隊在帶領商隊途中化現暫時休憩之所為譬喻，揭櫫《法華經》的核心義理之一，即佛陀運用種種方便（upāya）逐步引領弟子們轉向佛道上最高的境界，亦即「佛智」（buddhajñāna）或「佛乘」（buddhayāna）。

# सद्धर्मपुण्डरीकसूत्रे

# पूर्वयोगपरिवर्तो नाम सप्तमः ।

…

तद्यथापि नाम भिक्षव इह स्यात्पञ्चयोजनशतिकमटवीकान्तारम् । महांश्चात्र जनकायः प्रतिपन्नो भवेद्रत्नद्वीपं गमनाय । देशिकश्चैषामेको भवेद्व्यक्तः पण्डितो निपुणो मेधावी कुशलः खल्वटवीदुर्गाणाम् । स च तं सार्थमटवीमवक्रामयेत् ।

अथ खलु स महाजनकायः श्रान्तः क्लान्तो भीतस्त्रस्त एवं वदेत्—यत्खल्वार्य देशिक परिणायक जानीयाः—वयं हि श्रान्ताः क्लान्ता भीतास्त्रस्ता अनिर्वृताः । पुनरेव प्रतिनिवर्तयिष्यामः । अतिदूरमितोऽटवीकान्तारमिति ।

अथ खलु भिक्षवः स देशिक उपायकुशलस्तान्पुरुषान्प्रतिनिवर्तितुकामान्विदित्वा एवं चिन्तयेत्—मा खल्विमे तपस्विनस्तादृशं महारत्नद्वीपं न गच्छेयुरिति । स तेषामनुकम्पार्थमुपायकौशल्यं प्रयोजयेत् । तस्या अटव्या मध्ये योजनशतं वा द्वियोजनशतं वा त्रियोजनशतं वातिक्रम्यर्द्धिमयं नगरमभिनिर्मिमीयात् ।

ततस्तान्पुरुषानेवं वदेत्—मा भवन्तो भैष्ट मा निवर्तध्वम् । अयमसौ महाजनपदः । अत्र विश्राम्यत । अत्र वो यानि कानिचित्करणीयानि तानि सर्वाणि कुरुध्वम् । अत्र निर्वाणप्राप्ता विहरध्वम् । अत्र विश्रान्ताः, यस्य पुनः कार्यं भविष्यति स तं महारत्नद्वीपं गमिष्यति ॥

अथ खलु भिक्षवस्ते कान्तारप्राप्ताः सत्त्वा आश्चर्यप्राप्ता अद्भुतप्राप्ता भवेयुः । मुक्ता वयमटवीकान्तारात् । इह निर्वाणप्राप्ता विहरिष्याम इति ।

अथ खलु भिक्षवस्ते पुरुषास्तदृद्धिमयं नगरं प्रविशेयुरागतसंज्ञिनश्च भवेयु-
र्निस्तीर्णसंज्ञिनश्च भवेयुः। निर्वृताः शीतीभूताः स्म इति मन्येरन्।

ततस्तान्देशिको विश्रान्तान्विदित्वा तदृद्धिमयं नगरमन्तर्धापयेत्। अन्तर्धापयित्वा च तान्पुरुषानेवं वदेत्——आगच्छन्तु भवन्तः सत्त्वाः। अभ्यासन्न एष महारत्नद्वीपः। इदं तु मया नगरं युष्माकं विश्रामणा-
र्थमभिनिर्मितमिति॥

एवमेव भिक्षवस्तथागतोऽर्हन्सम्यक्संबुद्धो युष्माकं सर्वसत्त्वानां च देशिकः। अथ खलु भिक्षवस्तथागतोऽर्हन्सम्यक्संबुद्ध एवं पश्यति——महदिदं क्लेशकान्तारं निर्गन्तव्यं निष्क्रान्तव्यं प्रहातव्यम्। मा खल्विम एकमेव बुद्धज्ञानं श्रुत्वा द्रवेणैव प्रतिनिवर्तयेयुर्नैवोपसंक्रमेयुः, बहुपरिक्ले-
शमिदं बुद्धज्ञानं समुदानयितव्यमिति।

तत्र तथागतः सत्त्वान्दुर्बलाशयान्विदित्वा यथा स देशिकस्तदृद्धिमयं नगरमभिनिर्मिमीते तेषां सत्त्वानां विश्रामणार्थं विश्रान्तानां चैषामेवं कथयति—इदं खल्वृद्धिमयं नगरमिति, एवमेव भिक्षवस्तथागतोऽप्यर्हन्सम्यक्संबुद्धो महोपायकौशल्येनान्तरा द्वे निर्वाणभूमी सत्त्वानां विश्रामणार्थं देशयति संप्रकाशयति, यदिदं श्रावकभूमिं प्रत्येकबुद्धभूमिं च । यस्मिंश्च भिक्षवः समये ते सत्त्वास्तत्र स्थिता भवन्ति, अथ खलु भिक्षवस्तथागतोऽप्येवं संश्रावयति—न खलु पुनर्भिक्षवो यूयं कृतकृत्याः कृतकरणीयाः । अपि तु खलु पुनर्भिक्षवो युष्माकमभ्याश इतस्तथागतज्ञानम् । व्यवलोकयध्वं भिक्षवो व्यवचारयध्वम्—यद्युष्माकं निर्वाणं नैव निर्वाणम् । अपि तु खलु पुनरुपायकौशल्यमेतद्भिक्षवस्तथागतानामर्हतां सम्यक्संबुद्धानां यत्त्रीणि यानानि संप्रकाशयन्तीति ॥

. . .

# सद्धर्मपुण्डरीकसूत्रे
# पूर्वयोगपरिवर्तो नाम सप्तमः ।

...

तद्यथापि नाम भिक्षव इह स्यात्पञ्चयोजनशतिकमटवीकान्तारम् । महांश्चात्र जनकायः प्रतिपन्नो भवेद्रत्नद्वीपं गमनाय । देशिकश्चैषामेको भवेद्व्यक्तः पण्डितो निपुणो मेधावी कुशलः खल्वटवीदुर्गाणाम् । स च तं सार्थमटवीमवक्रामयेत् ।

अथ खलु स महाजनकायः श्रान्तः क्लान्तो भीतस्त्रस्त एवं वदेत्—यत्खल्वार्य देशिक परिणायक जानीयाः—वयं हि श्रान्ताः क्लान्ता भीतास्त्रस्ता अनिर्वृताः । पुनरेव प्रतिनिवर्तयिष्यामः । अतिदूरमितोऽटवीकान्तारमिति ।

अथ खलु भिक्षवः स देशिक उपायकुशलस्तान्पुरुषान्प्रतिनिवर्तितुकामान्विदित्वा एवं चिन्तयेत्—मा खल्विमे तपस्विनस्तादृशं महारत्नद्वीपं न गच्छेयुरिति । स तेषामनुकम्पार्थमुपायकौशल्यं प्रयोजयेत् । तस्या अटव्या मध्ये योजनशतं वा द्वियोजनशतं वा त्रियोजनशतं वातिक्रम्यर्द्धिमयं नगरमभिनिर्मिमीयात् ।

ततस्तान्पुरुषानेवं वदेत्—मा भवन्तो भैष्ट मा निवर्तध्वम् । अयमसौ

महाजनपदः । अत्र विश्राम्यत । अत्र वो यानि कानिचित्करणीयानि तानि सर्वाणि कुरुध्वम् । अत्र निर्वाणप्राप्ता विहरध्वम् । अत्र विश्रान्ताः, यस्य पुनः कार्यं भविष्यति स तं महारत्नद्वीपं गमिष्यति ॥

अथ खलु भिक्षवस्ते कान्तारप्राप्ताः सत्त्वा आश्चर्यप्राप्ता अद्भुतप्राप्ता भवेयुः । मुक्ता वयमटवीकान्तारात् । इह निर्वाणप्राप्ता विहरिष्याम इति । अथ खलु भिक्षवस्ते पुरुषास्तदृद्धिमयं नगरं प्रविशेयुरागतसंज्ञिनश्च भवेयुर्निस्तीर्णसंज्ञिनश्च भवेयुः । निर्वृताः शीतीभूताः स्म इति मन्येरन् ।

ततस्तान्देशिको विश्रान्तान्विदित्वा तदृद्धिमयं नगरमन्तर्धापयेत् । अन्तर्धापयित्वा च तान्पुरुषानेवं वदेत्—आगच्छन्तु भवन्तः सत्त्वाः । अभ्यासन्न एष महारत्नद्वीपः । इदं तु मया नगरं युष्माकं विश्रामणार्थमभिनिर्मितमिति ॥

एवमेव भिक्षवस्तथागतोऽर्हन्सम्यक्संबुद्धो युष्माकं सर्वसत्त्वानां च देशिकः । अथ खलु भिक्षवस्तथागतोऽर्हन्सम्यक्संबुद्ध एवं पश्यति—महदिदं क्लेशकान्तारं निर्गन्तव्यं निष्क्रान्तव्यं प्रहातव्यम् । मा खल्विम एकमेव बुद्धज्ञानं श्रुत्वा द्रवेणैव प्रतिनिवर्तयेयुर्नैवोपसंक्रमेयुः, बहुपरिक्लेशमिदं बुद्धज्ञानं समुदानयितव्यमिति ।

तत्र तथागतः सत्त्वान्दुर्बलाशयान्विदित्वा यथा स देशिकस्तदृद्धिमयं नगरमभिनिर्मिमीते तेषां सत्त्वानां विश्रामणार्थं विश्रान्तानां चैषामेवं कथयति—इदं खल्वृद्धिमयं नगरमिति, एवमेव भिक्षवस्तथागतोऽप्यर्ह-

न्सम्यक्संबुद्धो महोपायकौशल्येनान्तरा द्वे निर्वाणभूमी सत्त्वानां विश्रा-
मणार्थं देशयति संप्रकाशयति, यदिदं श्रावकभूमिं प्रत्येकबुद्धभूमिं च ।
यस्मिंश्च भिक्षवः समये ते सत्त्वास्तत्र स्थिता भवन्ति, अथ खलु भिक्षवस्त-
थागतोऽप्येवं संश्रावयति—न खलु पुनर्भिक्षवो यूयं कृतकृत्याः कृत-
करणीयाः । अपि तु खलु पुनर्भिक्षवो युष्माकमभ्याश इतस्तथागतज्ञानम् ।
व्यवलोकयध्वं भिक्षवो व्यवचारयध्वम्—यद्युष्माकं निर्वाणं नैव निर्वा-
णम् । अपि तु खलु पुनरुपायकौशल्यमेतद्भिक्षवस्तथागतानामर्हतां सम्य-
क्संबुद्धानां यत्त्रीणि यानानि संप्रकाशयन्तीति ॥

…

# 5. **The Parable of the Skillful Doctor**

(*Saddharmapuṇḍarīkasūtra*, ch. 15)

The parable of the skillful doctor is the seventh and last of the *Saddharmapuṇḍarīka Sūtra*'s allegories. The story of the doctor and his sons concludes the fifteenth chapter, in which the Buddha reveals that the Tathāgata's lifespan is in reality immeasurable, spanning an incalculable number of eons (*kalpa*). The parable illustrates how it is only by way of his "skill-in-means" (*upāyakauśalya*) that, for the purpose of spurring sentient beings to practice the Dharma, the Buddha announces that he will pass away and appears to reach final extinction (*parinirvāṇa*). In reality, the Buddha manifests in the world again and again to guide sentient beings on the path towards awakening.

# 五、**良醫病子的譬喻**

摘自 *Saddharmapuṇḍarīkasūtra*《妙法蓮華經》第十五品

　　醫子喻為法華七喻的第七喻，出自《法華經》第十五品（鳩摩羅什譯本第十六品），以良醫救療誤服毒藥之子為譬喻，闡述此品的義理，即如來的壽命無量劫（kalpa），但以權宜方便（upāyakauśalya），為令眾生修學佛法而示現入般涅槃（parinirvāṇa）。實際上，佛在此世不斷地化現，引導眾生朝向究竟的佛果。

# सद्धर्मपुण्डरीकसूत्रे

# तथागतायुष्प्रमाणपरिवर्तो नाम पञ्चदशमः ।

…

तद्यथापि नाम कुलपुत्राः कश्चिदेव वैद्यपुरुषो भवेत्पण्डितो व्यक्तो मेधावी सुकुशलः सर्वव्याधिप्रशमनाय। तस्य च पुरुषस्य बहवः पुत्रा भवेयुर्दश वा विंशतिर्वा त्रिंशद्वा चत्वारिंशद्वा पञ्चाशद्वा शतं वा। स च वैद्यः प्रवासगतो भवेत्, ते चास्य सर्वे पुत्रा गरपीडा वा विषपीडा वा भवेयुः। तेन गरेण वा विषेण वा दुःखाभिर्वेदनाभिरभितूर्णा भवेयुः । ते तेन गरेण वा विषेण वा दह्यमानाः पृथिव्यां प्रपतेयुः ।

अथ स तेषां वैद्यः पिता प्रवासादागच्छेत्। ते चास्य पुत्रास्तेन गरेण वा विषेण वा दुःखाभिर्वेदनाभिरार्ताः। केचिद्विपरीतसंज्ञिनो भवेयुः केचिद-

विपरीतसंज्ञिनो भवेयुः । सर्वे च ते तेनैव दुःखेनार्तास्तं पितरं दृष्ट्वा अभिनन्देयुः, एवं चैनं वदेयुः—दिष्ट्यासि तात क्षेमस्वस्तिभ्यामागतः । तदस्माकमस्मादात्मोपरोधाद्गराद्वा विषाद्वा परिमोचयस्व । ददस्व नस्तात जीवितमिति ।

अथ खलु स वैद्यस्तान्पुत्रान्दुःखार्तान्दृष्ट्वा वेदनाभिभूतान्दह्यतः पृथिव्यां परिवेष्टमानान्, ततो महाभैषज्यं समुदानयित्वा वर्णसंपन्नं गन्धसंपन्नं रससंपन्नं च शिलायां पिष्ट्वा तेषां पुत्राणां पानाय दद्यात्, एवं चैनान्वदेत्—पिबथ पुत्रा इदं महाभैषज्यं वर्णसंपन्नं गन्धसंपन्नं रससंपन्नम् । इदं यूयं पुत्रा महाभैषज्यं पीत्वा क्षिप्रमेवास्माद्गराद्वा विषाद्वा परिमोक्ष्यध्वे, स्वस्था भविष्यथारोगाश्च ।

तत्र ये तस्य वैद्यस्य पुत्रा अविपरीतसंज्ञिनस्ते भैषज्यस्य वर्णं च दृष्ट्वा

गन्धं चाघ्राय रसं चास्वाद्य क्षिप्रमेवाभ्यवहरेयुः। ते चाभ्यवहरन्तस्त-स्मादाबाधात्सर्वेण सर्वं विमुक्ता भवेयुः। ये पुनस्तस्य पुत्रा विपरीत-संज्ञिनस्ते तं पितरमभिनन्देयुः, एनं चैवं वदेयुः—दिष्ट्यासि तात क्षेमस्वस्तिभ्यामागतो यस्त्वमस्माकं चिकित्सक इति। ते चैवं वाचं भाषेरन्, तच्च भैषज्यमुपनामितं न पिबेयुः। तत्कस्य हेतोः? तथा हि तेषां तया विपरीतसंज्ञया तद्भैषज्यमुपनामितं वर्णेनापि न रोचते गन्धेनापि रसेनापि न रोचते।

अथ खलु स वैद्यपुरुष एवं चिन्तयेत्—इमे मम पुत्रा अनेन गरेण वा विषेण वा विपरीतसंज्ञिनः। ते खल्विदं महाभैषज्यं न पिबन्ति, मां चा-भिनन्दन्ति। यन्न्वहमिमान्पुत्रानुपायकौशल्येनेदं भैषज्यं पाययेयमिति।

अथ खलु स वैद्यस्तान्पुत्रानुपायकौशल्येन तद्भैषज्यं पाययितुकाम एवं

वदेत्—जीर्णोऽहमस्मि कुलपुत्रा वृद्धो महल्लकः । कालक्रिया च मे प्रत्युपस्थिता । मा च यूयं पुत्राः शोचिष्ट, मा च क्लममापध्वम् । इदं वो मया महाभैषज्यमुपनीतम् । सचेदाकाङ्क्षध्वे, तदेव भैषज्यं पिबध्वम् ।

स एवं तान्पुत्रानुपायकौशल्येनानुशिष्य अन्यतरं जनपदप्रदेशं प्रक्रान्तः । तत्र गत्वा कालगतमात्मानं तेषां ग्लानानां पुत्राणामारोचयेत् । ते तस्मिन्समयेऽतीव शोचेयुरतीव परिदेवेयुः—यो ह्यस्माकं पिता नाथो जनकोऽनुकम्पकः सोऽपि नामैकः कालगतः । तेऽद्य वयमनाथाः संवृत्ताः ।

ते खल्वनाथभूतमात्मानं समनुपश्यन्तोऽशरणमात्मानं समनुपश्यन्तोऽभीक्ष्णं शोकार्ता भवेयुः । तेषां च तयाभीक्ष्णं शोकार्ततया सा विपरीतसंज्ञाविपरीतसंज्ञा भवेत् । यच्च तद्भैषज्यं वर्णगन्धरसोपेतं तद्वर्णगन्धरसोपेतमेव संजानीयुः । ततस्तस्मिन्समये तद्भैषज्यमभ्यवहरेयुः । ते

चाभ्यवहरन्तस्तस्मादाबाधात्परिमुक्ता भवेयुः। अथ खलु स वैद्यस्तान्पुत्रानाबाधविमुक्तान्विदित्वा पुनरेवात्मानमुपदर्शयेत्।

तत्किं मन्यध्वे कुलपुत्राः, मा हैव तस्य वैद्यस्य तदुपायकौशल्यं कुर्वतः कश्चिन्मृषावादेन संचोदयेत्?

आहुः——नो हीदं भगवन्नो हीदं सुगत।

आह——एवमेव कुलपुत्रा अहमप्यप्रमेयासंख्येयकल्पकोटीनयुतशतसहस्राभिसंबुद्ध इमामनुत्तरां सम्यक्संबोधिम्। अपि तु खलु पुनः कुलपुत्रा अहमन्तरान्तरमेवंरूपाण्युपायकौशल्यानि सत्त्वानामुपदर्शयामि विनयार्थम्। न च मे कश्चिदत्र स्थाने मृषावादो भवति॥

…

# सद्धर्मपुण्डरीकसूत्रे
# तथागतायुष्प्रमाणपरिवर्तो नाम पञ्चदशमः ।

…

तद्यथापि नाम कुलपुत्राः कश्चिदेव वैद्यपुरुषो भवेत्पण्डितो व्यक्तो मेधावी सुकुशलः सर्वव्याधिप्रशमनाय। तस्य च पुरुषस्य बहवः पुत्रा भवेयुर्दश वा विंशतिर्वा त्रिंशद्वा चत्वारिंशद्वा पञ्चाशद्वा शतं वा। स च वैद्यः प्रवासगतो भवेत्, ते चास्य सर्वे पुत्रा गरपीडा वा विषपीडा वा भवेयुः। तेन गरेण वा विषेण वा दुःखाभिर्वेदनाभिरभितूर्णा भवेयुः। ते तेन गरेण वा विषेण वा दह्यमानाः पृथिव्यां प्रपतेयुः।

अथ स तेषां वैद्यः पिता प्रवासादागच्छेत्। ते चास्य पुत्रास्तेन गरेण वा विषेण वा दुःखाभिर्वेदनाभिरार्ताः। केचिद्विपरीतसंज्ञिनो भवेयुः केचिद-विपरीतसंज्ञिनो भवेयुः। सर्वे च ते तेनैव दुःखेनार्तास्तं पितरं दृष्ट्वा अभिनन्देयुः, एवं चैनं वदेयुः—दिष्ट्यासि तात क्षेमस्वस्तिभ्यामागतः। तदस्माकमस्मादात्मोपरोधाद्गराद्वा विषाद्वा परिमोचयस्व। ददस्व नस्तात जीवितमिति।

अथ खलु स वैद्यस्तान्पुत्रान्दुःखार्तान्दृष्ट्वा वेदनाभिभूतान्दह्यतः पृथि-व्यां परिवेष्टमानान्, ततो महाभैषज्यं समुदानयित्वा वर्णसंपन्नं गन्धसंपन्नं रससंपन्नं च शिलायां पिष्ट्वा तेषां पुत्राणां पानाय दद्यात्, एवं चैनान्व-

देत्—पिबथ पुत्रा इदं महाभैषज्यं वर्णसंपन्नं गन्धसंपन्नं रससंपन्नम्। इदं यूयं पुत्रा महाभैषज्यं पीत्वा क्षिप्रमेवास्माद्गराद्वा विषाद्वा परिमोक्ष्यध्वे, स्वस्था भविष्यथारोगाश्च।

तत्र ये तस्य वैद्यस्य पुत्रा अविपरीतसंज्ञिनस्ते भैषज्यस्य वर्णं च दृष्ट्वा गन्धं चाघ्राय रसं चास्वाद्य क्षिप्रमेवाभ्यवहरेयुः। ते चाभ्यवहरन्तस्त-स्मादाबाधात्सर्वेण सर्वं विमुक्ता भवेयुः। ये पुनस्तस्य पुत्रा विपरीत-संज्ञिनस्ते तं पितरमभिनन्देयुः, एनं चैवं वदेयुः—दिष्ट्यासि तात क्षेमस्वस्तिभ्यामागतो यस्त्वमस्माकं चिकित्सक इति। ते चैवं वाचं भाषेरन्, तच्च भैषज्यमुपनामितं न पिबेयुः। तत्कस्य हेतोः? तथा हि तेषां तया विपरीतसंज्ञया तद्भैषज्यमुपनामितं वर्णेनापि न रोचते गन्धेनापि रसेनापि न रोचते।

अथ खलु स वैद्यपुरुष एवं चिन्तयेत्—इमे मम पुत्रा अनेन गरेण वा विषेण वा विपरीतसंज्ञिनः। ते खल्विदं महाभैषज्यं न पिबन्ति, मां चा-भिनन्दन्ति। यन्न्वहमिमान्पुत्रानुपायकौशल्येनेदं भैषज्यं पाययेयमिति।

अथ खलु स वैद्यस्तान्पुत्रानुपायकौशल्येन तद्भैषज्यं पाययितुकाम एवं वदेत्—जीर्णोऽहमस्मि कुलपुत्रा वृद्धो महल्लकः। कालक्रिया च मे प्रत्युपस्थिता। मा च यूयं पुत्राः शोचिष्ट, मा च क्लममापध्वम्। इदं वो मया महाभैषज्यमुपनीतम्। सचेदाकाङ्क्षध्वे, तदेव भैषज्यं पिबध्वम्।

स एवं तान्पुत्रानुपायकौशल्येनानुशिष्य अन्यतरं जनपदप्रदेशं प्र-

क्रान्तः। तत्र गत्वा कालगतमात्मानं तेषां ग्लानानां पुत्राणामारोचयेत्। ते तस्मिन्समयेऽतीव शोचेयुरतीव परिदेवेयुः—यो ह्यस्माकं पिता नाथो जनकोऽनुकम्पकः सोऽपि नामैकः कालगतः। तेऽद्य वयमनाथाः संवृत्ताः।

ते खल्वनाथभूतमात्मानं समनुपश्यन्तोऽशरणमात्मानं समनुपश्यन्तोऽभीक्ष्णं शोकार्ता भवेयुः। तेषां च तयाभीक्ष्णं शोकार्ततया सा विपरीतसंज्ञाविपरीतसंज्ञा भवेत्। यच्च तद्भैषज्यं वर्णगन्धरसोपेतं तद्वर्णगन्धरसोपेतमेव संजानीयुः। ततस्तस्मिन्समये तद्भैषज्यमभ्यवहरेयुः। ते चाभ्यवहरन्तस्तस्मादाबाधात्परिमुक्ता भवेयुः। अथ खलु स वैद्यस्तान्पुत्रानाबाधविमुक्तान्विदित्वा पुनरेवात्मानमुपदर्शयेत्।

तत्किं मन्यध्वे कुलपुत्राः, मा हैव तस्य वैद्यस्य तदुपायकौशल्यं कुर्वतः कश्चिन्मृषावादेन संचोदयेत्?

आहुः—नो हीदं भगवन्नो हीदं सुगत।

आह—एवमेव कुलपुत्रा अहमप्यप्रमेयासंख्येयकल्पकोटीनयुतशतसहस्राभिसंबुद्ध इमामनुत्तरां सम्यक्संबोधिम्। अपि तु खलु पुनः कुलपुत्रा अहमन्तरान्तरमेवंरूपाण्युपायकौशल्यानि सत्त्वानामुपदर्शयामि विनयार्थम्। न च मे कश्चिदत्र स्थाने मृषावादो भवति॥

…

# 6. Isn't the Tathāgatagarbha the Same as the Ātman?

(*Laṅkāvatārasūtra*, ch. 2)

The *Laṅkāvatāra Sūtra* is a Mahāyāna sūtra associated with the development of the Yogācāra or "Mind-Only" school of Buddhist philosophy, which flourished in India beginning from the fourth century CE. The sūtra presents many of the core Yogācāra doctrines discussed by the scholastic philosophers of the tradition, such as the store-consciousness (*ālayavijñāna*), the three natures (*trisvabhāva*), or the mind-only quality (*cittamātratā*) of all phenomena.

In the second chapter of the *Laṅkāvatāra Sūtra*, the great bodhisattva Mahāmati asks the Buddha a series of questions on behalf of Rāvaṇa, the ten-headed demon-king of the fortress island of Laṅkā. In the short passage given here, the Buddha clarifies the true purpose of his teaching on the *Tathāgatagarbha*, or "Buddha-nature" as it is commonly referred to, showing how it is not to be equated with the non-Buddhist's doctrine of the Self (*ātmavāda*).

# 六、**如來藏與外道之我論**

摘自 *Laṅkāvatārasūtra*《楞伽經》第二品

《楞伽經》是一部重要的大乘佛經，與瑜伽行派（Yogācāra）的發展相關。本經闡釋了瑜伽行派的許多重要教義，如「阿賴耶識」（ālayavijñāna）、「三性」（trisvabhāva）或所有現象的「唯識性」（cittamātratā）。

在《楞伽經》第二品中，大慧菩薩為了利益未來可能對佛陀的教法產生疑惑的眾生，而代羅婆那（楞伽城主十頭羅剎王）向佛陀提出了一連串的問題。在我們選取的這個簡短文本中，佛陀揭示了「如來藏」（tathāgatagarbha）教法的真正目的，闡明如來藏不同於外道所說的我論（ātmavāda）。

# लङ्कावतारे

# षट्त्रिंशत्साहस्रसर्वधर्मसमुच्चयो नाम

# द्वितीयः परिवर्तः।

…

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वो भगवन्तमेतदवोचत्——तथागतगर्भः पुनर्भगवता सूत्रान्तपाठेऽनुवर्णितः। स च किल त्वया प्रकृतिप्रभास्वरविशुद्ध्यादिविशुद्ध एव वर्ण्यते द्वात्रिंशल्लक्षणधरः सर्वसत्त्वदेहान्तर्गतः। महार्घमूल्यरत्नं मलिनवस्तुपरिवेष्टितमिव स्कन्धधात्वायतनवस्तुवेष्टितो रागद्वेषमोहाभूतपरिकल्पमलमलिनो नित्यो ध्रुवः शिवः शाश्वतश्च भगवता वर्णितः। तत्कथमयं भगवंस्तीर्थकरात्मवादतुल्यस्तथागतगर्भवादो न भवति? तीर्थकरा अपि भगवन्नित्यः कर्ता निर्गुणो विभुरव्यय

इत्यात्मवादोपदेशं कुर्वन्ति।

भगवानाह——न हि महामते तीर्थकरात्मवादतुल्यो मम तथागतगर्भोपदेशः। किंतु महामते तथागताः शून्यताभूतकोटिनिर्वाणानुत्पादानिमित्ताप्रणिहिताद्यानां महामते पदार्थानां तथागतगर्भोपदेशं कृत्वा तथागता अर्हन्तः सम्यक्संबुद्धा बालानां नैरात्म्यसंत्रासपदविवर्जनार्थं निर्विकल्पनिराभासगोचरं तथागतगर्भमुखोपदेशेन देशयन्ति। न चात्र महामते अनागतप्रत्युत्पन्नैर्बोधिसत्त्वैर्महासत्त्वैरात्माभिनिवेशः कर्तव्यः।

तद्यथा महामते कुम्भकार एकस्मान्मृत्परमाणुराशेर्विविधानि भाण्डानि करोति हस्तशिल्पदण्डोदकसूत्रप्रयत्नयोगात्। एवमेव महामते तथागतास्तदेव धर्मनैरात्म्यं सर्वविकल्पलक्षणविनिवृत्तं विविधैः प्रज्ञोपायकौशल्ययोगैर्गर्भोपदेशेन वा नैरात्म्योपदेशेन वा कुम्भकारवच्चित्रैः पदव्यञ्जन-

पर्यायैर्देशयन्ते। एतस्मात्कारणान्महामते तीर्थकरात्मवादोपदेशतुल्यस्तथागतगर्भोपदेशो न भवति।

एवं हि महामते तथागतगर्भोपदेशमात्मवादाभिनिविष्टानां तीर्थकराणामाकर्षणार्थं तथागतगर्भोपदेशेन निर्दिशन्ति। कथं बत अभूतात्मविकल्पदृष्टिपतिताशया विमोक्षत्रयगोचरपतिताशयोपेताः क्षिप्रमनुत्तरां सम्यक्संबोधिमभिसंबुध्येरन्निति। एतदर्थं महामते तथागता अर्हन्तः सम्यक्संबुद्धास्तथागतगर्भोपदेशं कुर्वन्ति। अत एतन्न भवति तीर्थकरात्मवादतुल्यम्। तस्मात्तर्हि महामते तीर्थकरदृष्टिविनिवृत्त्यर्थं तथागतनैरात्म्यगर्भानुसारिणा च ते भवितव्यम्॥

अथ खलु भगवांस्तस्यां वेलायामिमां गाथामभाषत—

पुद्गलः संततिः स्कन्धाः प्रत्यया अणवस्तथा ।

प्रधानमीश्वरः कर्ता चित्तमात्रं विकल्प्यते ॥ २.१३७ ॥

…

# लङ्कावतारे षट्त्रिंशत्साहस्रसर्वधर्मसमुच्चयो नाम द्वितीयः परिवर्तः।

...

अथ खलु महामतिर्बोधिसत्त्वो महासत्त्वो भगवन्तमेतदवोचत्——तथागतगर्भः पुनर्भगवता सूत्रान्तपाठेऽनुवर्णितः। स च किल त्वया प्रकृतिप्रभास्वरविशुद्ध्यादिविशुद्ध एव वर्ण्यते द्वात्रिंशल्लक्षणधरः सर्वसत्त्वदेहान्तर्गतः। महार्घमूल्यरत्नं मलिनवस्तुपरिवेष्टितमिव स्कन्धधात्वायतनवस्तुवेष्टितो रागद्वेषमोहाभूतपरिकल्पमलमलिनो नित्यो ध्रुवः शिवः शाश्वतश्च भगवता वर्णितः। तत्कथमयं भगवंस्तीर्थकरात्मवादतुल्यस्तथागतगर्भवादो न भवति? तीर्थकरा अपि भगवन्नित्यः कर्ता निर्गुणो विभुरव्यय इत्यात्मवादोपदेशं कुर्वन्ति।

भगवानाह——न हि महामते तीर्थकरात्मवादतुल्यो मम तथागतगर्भोपदेशः। किंतु महामते तथागताः शून्यताभूतकोटिनिर्वाणानुत्पादानिमित्ताप्रणिहिताद्यानां महामते पदार्थानां तथागतगर्भोपदेशं कृत्वा तथागता अर्हन्तः सम्यक्संबुद्धा बालानां नैरात्म्यसंत्रासपदविवर्जनार्थं निर्विकल्पनिराभासगोचरं तथागतगर्भमुखोपदेशेन देशयन्ति। न चात्र महामते अनागतप्रत्युत्पन्नैर्बोधिसत्त्वैर्महासत्त्वैरात्माभिनिवेशः कर्तव्यः।

तद्यथा महामते कुम्भकार एकस्मान्मृत्परमाणुराशेर्विविधानि भाण्डानि करोति हस्तशिल्पदण्डोदकसूत्रप्रयत्नयोगात्। एवमेव महामते तथागतास्तदेव धर्मनैरात्म्यं सर्वविकल्पलक्षणविनिवृत्तं विविधैः प्रज्ञोपायकौशल्ययोगैर्गर्भोपदेशेन वा नैरात्म्योपदेशेन वा कुम्भकारवच्चित्रैः पदव्यञ्जनपर्यायैर्देशयन्ते। एतस्मात्कारणान्महामते तीर्थकरात्मवादोपदेशतुल्यस्तथागतगर्भोपदेशो न भवति।

एवं हि महामते तथागतगर्भोपदेशमात्मवादाभिनिविष्टानां तीर्थकराणामाकर्षणार्थं तथागतगर्भोपदेशेन निर्दिशन्ति। कथं बत अभूतात्मविकल्पदृष्टिपतिताशया विमोक्षत्रयगोचरपतिताशयोपेताः क्षिप्रमनुत्तरां सम्यक्संबोधिमभिसंबुध्येरन्निति। एतदर्थं महामते तथागता अर्हन्तः सम्यक्संबुद्धास्तथागतगर्भोपदेशं कुर्वन्ति। अत एतन्न भवति तीर्थकरात्मवादतुल्यम्। तस्मात्तर्हि महामते तीर्थकरदृष्टिविनिवृत्त्यर्थं तथागतनैरात्म्यगर्भानुसारिणा च ते भवितव्यम्॥

अथ खलु भगवांस्तस्यां वेलायामिमां गाथामभाषत—

पुद्गलः संततिः स्कन्धाः प्रत्यया अणवस्तथा।
प्रधानमीश्वरः कर्ता चित्तमात्रं विकल्प्यते॥ २.१३७॥

…

# 7. In Praise of the Teaching

(*Śatapañcāśatka*)

The *stotra* or hymn of praise (also called *stuti* or *stava*) is a popular genre of devotional literature. The melodious recitation of such hymns is a prominent feature of religious life in all Indian traditions. In these metrical eulogies, the hymnographer (*stotrakāra*) gives expression to his devotion (*bhakti*), typically through poetic descriptions of the wonderful qualities (*guṇa*) of his preferred "tutelary" deity (*iṣṭadevatā*) or a founding guru. In the Buddhist context, the composition, recitation, and memorization of hymns to the Buddha (*buddhastotra*) are ways of engaging in the practice of recollecting and contemplating the qualities of the Awakened One (*buddhānusmṛti*).

The *Śatapañcāśatka* is an important Buddhist *stotra* composed by the great poet Mātṛceṭa (c. third century CE), the Buddhist hymnodist par excellence. The popularity of this particular poem is attested by the Chinese pilgrim Yijing (義淨), who reports in the records of his journey to India that Mahāyāna and non-Mahāyāna Buddhist renunciants alike would memorize this hymn as soon as they could recite the five or ten precepts. Because the hymn belongs to the early period of Sanskrit devotional poetry, the language is clear and unadorned, free from any kind of artificiality.

The hymn is divided into twelve sections, each dedicated to praising a facet of the Buddha's virtues, such as his compassion (*karuṇā*), his speech (*vacana*), or his skillfulness (*kauśala*). Our text comprises the hymn's opening preamble (*upodghāta*) and the seventh section praising the Buddha's teaching (*śāsana*).

# 七、讚歎聖教

## 摘自 *Śatapañcāśatka*《一百五十讚佛頌》

讚頌（stotra、stuti 或 stava）是在印度廣為流行的一種宗教文學類型，表達對神或者聖人的讚美或崇拜。在印度，這類讚頌的朗誦是宗教生活的一個顯著特點。造頌者（stotrakāra）描述自己的守護神（iṣṭadevatā）或大師的美德（guṇa），以表達其信奉（「奉愛」bhakti）之情。對佛教徒而言，創作和背誦讚佛頌（buddhastotra）可視為是修習「佛隨念」（buddhānusmṛti）的實踐方式之一。

《一百五十贊佛頌》是其中一部重要的早期佛教讚頌，由偉大的佛教詩人摩咥里制吒（Mātṛceṭa，約生於三世紀）所作。唐代西行求法僧義淨於《南海寄歸內法傳》記載，無論是大乘或非大乘的初出家人，一背誦完五戒或十戒，便開始背誦這首讚佛頌。

由於這首讚頌屬於早期的梵語讚頌，其語言清新簡樸，沒有過多的人工雕琢。這首讚頌分成十二節，每一節分別讚頌佛陀美德（guṇa）的不同面向，比如佛陀的悲心（karuṇā）、言語（vacana）和善巧（kauśala）等。我們所選的文本包含了這首讚頌的序言（upodghāta）以及第七節聖教讚（śāsanastava）。

# मातृचेटविरचितं

# शतपञ्चाशत्कनाम बुद्धस्तोत्रम् ।

उपोद्घातः ।

सर्वदा सर्वथा सर्वे यस्य दोषा न सन्ति ह ।

सर्वे सर्वाभिसारेण यत्र चावस्थिता गुणाः ॥ १ ॥

तमेव शरणं गन्तुं तं स्तोतुं तमुपासितुम् ।

तस्यैव शासने स्थातुं न्याय्यं यद्यस्ति चेतना ॥ २ ॥

सवासनाश्च ते दोषा न सन्त्येकस्य तायिनः ।

सर्वे सर्वविदः सन्ति गुणास्ते चानपायिनः ॥ ३ ॥

न हि प्रतिनिविष्टोऽपि मनोवाक्कायकर्मसु ।

सह धर्मेण लभते कश्चिद्भगवतोऽन्तरम् ॥ ४ ॥

सोऽहं प्राप्य मनुष्यत्वं ससद्धर्ममहोत्सवम् ।

महार्णवयुगच्छिद्रकूर्मग्रीवार्पणोपमम् ॥ ५ ॥

अनित्यताव्यनुसृतां कर्मच्छिद्रससंशयाम् ।

आत्तसारां करिष्यामि कथं नेमां सरस्वतीम् ॥ ६ ॥

इत्यसंख्येयविषयानवेत्यापि गुणान्मुनेः ।

तदेकदेशप्रणयः क्रियते स्वार्थगौरवात् ॥ ७ ॥

स्वयंभुवे नमस्तेऽस्तु प्रभूताद्भुतकर्मणे ।

यस्य संख्याप्रभावाभ्यां न गुणेष्वस्ति निश्चयः ॥ ८ ॥

इयन्त इति नास्त्यन्त ईदृशा इति का कथा ।

पुण्या इत्येव तु गुणान्प्रति ते मुखरा वयम् ॥ ९ ॥

…

शासनस्तवः ।

एकायनं सुखोपायं स्वनुबन्धि निरत्ययम् ।

आदिमध्यान्तकल्याणं तव नान्यस्य शासनम् ॥ ८२ ॥

एवमेकान्तकान्तं ते दृष्टिरागेण बालिशाः ।

मतं यदि विगर्हन्ति नास्ति दृष्टिसमो रिपुः ॥ ८३ ॥

अन्वभुङ्क्था यदस्यार्थे जगतो व्यसनं बहु ।

तत्संस्मृत्य विरूपेऽपि स्थेयं ते शासने भवेत् ॥ ८४ ॥

प्रागेव हितकर्तुश्च हितवक्तुश्च शासनम् ।

कथं न नाम कार्यं स्यादादीप्तशिरसापि ते ॥ ८५ ॥

भुजिष्यता बोधिसुखं त्वद्गुणापचितिः शमः ।

प्राप्यते त्वन्मतात्सर्वमिदं भद्रचतुष्टयम् ॥ ८६ ॥

त्रासनं सर्वतीर्थ्यानां नमुचेरुपतापनम् ।

आश्वासनं नृदेवानां तवेदं वीर शासनम् ॥ ८७ ॥

त्रैधातुकमहाभौममसङ्गमनवग्रहम् ।

शासनेन तवाक्रान्तमन्तकस्यापि शासनम् ॥ ८८ ॥

त्वच्छासननयज्ञो हि तिष्ठेत्कल्पमपीच्छया ।

प्रयाति तत्र तु स्वैरी यत्र मृत्योरगोचरः ॥ ८९ ॥

आगमस्यार्थचिन्ताया भावनोपासनस्य च ।

कालत्रयविभागोऽस्ति नान्यत्र तव शासनात् ॥ १० ॥

एवं कल्याणकलिलं तवेदमृषिपुङ्गव ।

शासनं नाद्रियन्ते यत्किं वैशसतरं ततः ॥ ११ ॥

…

# मातृचेटविरचितं
# शतपञ्चाशत्कनाम बुद्धस्तोत्रम् ।

उपोद्धातः ।

सर्वदा सर्वथा सर्वे यस्य दोषा न सन्ति ह ।
सर्वे सर्वाभिसारेण यत्र चावस्थिता गुणाः ॥ १ ॥

तमेव शरणं गन्तुं तं स्तोतुं तमुपासितुम् ।
तस्यैव शासने स्थातुं न्याय्यं यद्यस्ति चेतना ॥ २ ॥

सवासनाश्च ते दोषा न सन्त्येकस्य तायिनः ।
सर्वे सर्वविदः सन्ति गुणास्ते चानपायिनः ॥ ३ ॥

न हि प्रतिनिविष्टोऽपि मनोवाक्कायकर्मसु ।
सह धर्मेण लभते कश्चिद्भगवतोऽन्तरम् ॥ ४ ॥

सोऽहं प्राप्य मनुष्यत्वं ससद्धर्ममहोत्सवम् ।
महार्णवयुगच्छिद्रकूर्मग्रीवार्पणोपमम् ॥ ५ ॥

अनित्यताव्यनुसृतां कर्मच्छिद्रससंशयाम् ।
आत्तसारां करिष्यामि कथं नेमां सरस्वतीम् ॥ ६ ॥

इत्यसंख्येयविषयानवेत्यापि गुणान्मुनेः ।
तदेकदेशप्रणयः क्रियते स्वार्थगौरवात् ॥ ७ ॥

स्वयंभुवे नमस्तेऽस्तु प्रभूताद्भुतकर्मणे ।
यस्य संख्याप्रभावाभ्यां न गुणेष्वस्ति निश्चयः ॥ ८ ॥

इयन्त इति नास्त्यन्त ईदृशा इति का कथा ।
पुण्या इत्येव तु गुणान्प्रति ते मुखरा वयम् ॥ ९ ॥

…

शासनस्तवः ।

एकायनं सुखोपायं स्वनुबन्धि निरत्ययम् ।
आदिमध्यान्तकल्याणं तव नान्यस्य शासनम् ॥ ८२ ॥

एवमेकान्तकान्तं ते दृष्टिरागेण बालिशाः ।
मतं यदि विगर्हन्ति नास्ति दृष्टिसमो रिपुः ॥ ८३ ॥

अन्वभुङ्क्था यदस्यार्थे जगतो व्यसनं बहु ।
तत्संस्मृत्य विरूपेऽपि स्थेयं ते शासने भवेत् ॥ ८४ ॥

प्रागेव हितकर्तुश्च हितवक्तुश्च शासनम् ।
कथं न नाम कार्यं स्यादादीप्तशिरसापि ते ॥ ८५ ॥

भुजिष्यता बोधिसुखं त्वद्गुणापचितिः शमः ।
प्राप्यते त्वन्मतात्सर्वमिदं भद्रचतुष्टयम् ॥ ८६ ॥

त्रासनं सर्वतीर्थ्यानां नमुचेरुपतापनम् ।
आश्वासनं नृदेवानां तवेदं वीर शासनम् ॥ ८७ ॥

त्रैधातुकमहाभौममसङ्गमनवग्रहम् ।
शासनेन तवाक्रान्तमन्तकस्यापि शासनम् ॥ ८८ ॥

त्वच्छासननयज्ञो हि तिष्ठेत्कल्पमपीच्छया ।
प्रयाति तत्र तु स्वैरी यत्र मृत्योरगोचरः ॥ ८९ ॥

आगमस्यार्थचिन्ताया भावनोपासनस्य च ।
कालत्रयविभागोऽस्ति नान्यत्र तव शासनात् ॥ ९० ॥

एवं कल्याणकलिलं तवेदमृषिपुङ्गव ।
शासनं नाद्रियन्ते यत्किं वैशसतरं ततः ॥ ९१ ॥

…

# 8. **Hymn to the Incomparable One**
## (*Niraupamyastava*)

While Nāgārjuna is primarily remembered for his great philosophical treatises on the doctrine of the middle way (*madhyamaka*), the second-century Indian master also composed several hymns of praise (*stotra*, *stava*, or *stuti*), including this *Niraupamyastava*, which was circulated as part of a collection of four hymns written by Nāgārjuna known as the *Catuḥstava*.

We find in the vast genre of Sanskrit devotional poetry hymns more concerned with religious emotion than with religious dogma, in which the poet gives expression to personal feelings of devotion in impassioned appeals to the deity, occasionally reaching what one may even recognize as lyric poetry. Nāgārjuna's hymns belong to a different kind, in which the words of praise, expressed here more impersonally, are an opportunity to express in poetic form key philosophical tenets, making subtle doctrinal points accessible to all.

Both Nāgarjuna's scholastic and poetic works sought to establish the emptiness (*śūnyatā*) or insubstantiality (*niḥsvabhāvatā*) of all phenomena, as expounded in early Mahāyāna texts such as the *Prajñāpāramitā Sūtras*. Intriguingly, one encounters in several verses of this hymn ideas and terms usually associated with the cataphatic or "non-empty" teachings on the *Tathāgatagarbha* expounded in later Mahāyāna scriptures, such as the *Śrīmālādevīsiṃhanāda Sūtra*.

# 八、**讚歎世尊無與倫比**
## *Niraupamyastava*《無可喻讚》

龍樹（Nāgārjuna）這位二世紀的印度論師向來以中觀（Madhyamaka）思想的哲學論著而廣為人知，其同時撰寫了數首讚頌，包括這首收錄於《四讚歌》（*Catuḥstava*）詩集中的《無可喻讚》。

梵語讚頌可以分為兩種類型：第一種讚頌中，詩人透過對神靈的熱情呼籲，抒發強烈的宗教情操；龍樹的讚頌則屬另一種類型，即以詩意形式表達重要的哲理性觀念，藉此廣泛傳播佛教思想中不易理解的教理。

不論是在其論書或是讚頌中，龍樹都旨在成立空性（śūnyatā）、一切現象無自性（niḥsvabhāva）的思想，如《般若波羅蜜多經》（*Prajñāpāramitā Sūtra*）等早期大乘經典中闡述。值得注意的是，這首讚頌中有幾個詩頌的觀念和用詞，與「不空」的如來藏（tathāgatagarbha）思想相關，而後者則為晚期的大乘佛經所闡述，如《勝鬘師子吼經》（*Śrīmālādevīsiṃhanāda Sūtra*）。

# नागार्जुनविरचितो

# निरौपम्यस्तवः ।

निरौपम्य नमस्तुभ्यं निःस्वभावार्थवेदिने ।

यस्त्वं दृष्टिविपन्नस्य लोकस्यास्य हितोद्यतः ॥ १ ॥

न च नाम त्वया किंचिद्दृष्टं बौद्धेन चक्षुषा ।

अनुत्तरा च ते नाथ दृष्टिस्तत्त्वार्थदर्शिनी ॥ २ ॥

न बोद्धा न च बोद्धव्यमस्तीह परमार्थतः ।

अहो परमदुर्बोधां धर्मतां बुद्धवानसि ॥ ३ ॥

न त्वयोत्पादितः कश्चिद्धर्मो नापि निरोधितः ।

समतादर्शनेनैव प्राप्तं पदमनुत्तरम् ॥ ४ ॥

न संसारापकर्षेण त्वया निर्वाणमीप्सितम् ।

शान्तिस्तेऽधिगता नाथ संसारानुपलब्धितः ॥ ५ ॥

त्वं विवेदैकरसतां संक्लेशव्यवदानयोः ।

धर्मधात्वविनिर्भेदाद्विशुद्धश्चासि सर्वतः ॥ ६ ॥

नोदाहृतं त्वया किंचिदेकमप्यक्षरं विभो ।

कृत्स्नश्च वैनेयजनो धर्मवर्षेण तर्पितः ॥ ७ ॥

न तेऽस्ति सक्तिः स्कन्धेषु धातुष्वायतनेषु च ।

आकाशसमचित्तस्त्वं सर्वधर्मेष्वनिश्रितः ॥ ८ ॥

सत्त्वसंज्ञा च ते नाथ सर्वथा न प्रवर्तते ।

दुःखार्तेषु च सत्त्वेषु त्वमतीव कृपात्मकः ॥ ९ ॥

सुखदुःखात्मनैरात्म्यनित्यानित्यादिषु प्रभो ।

इति नानाविकल्पेषु बुद्धिस्तव न सज्जते ॥ १० ॥

न गतिर्नागतिः काचिद्धर्माणामिति ते मतिः ।

न क्वचिद्राशिभवोऽतोऽसि परमार्थवित् ॥ ११ ॥

सर्वत्रानुगतश्चासि न च जातोऽसि कुत्रचित् ।

जन्मधर्मशरीराभ्यामचिन्त्यस्त्वं महामुने ॥ १२ ॥

एकानेकत्वरहितं प्रतिश्रुत्कोपमं जगत् ।

संक्रान्तिनाशापगतं बुद्धवांस्त्वमनिन्दितः ॥ १३ ॥

शाश्वतोच्छेदरहितं लक्ष्यलक्षणवर्जितम् ।

संसारमवबुद्धस्त्वं स्वप्नमायादिवत्प्रभो ॥ १४ ॥

वासनामूलपर्यन्ताः क्लेशास्तेऽनघ निर्जिताः ।

क्लेशप्रकृतितश्चैव त्वयामृतमुपार्जितम् ॥ १५ ॥

अलक्षणं त्वया धीर दृष्टं रूपमरूपवत् ।

लक्षणोज्ज्वलगात्रश्च दृश्यसे रूपगोचरे ॥ १६ ॥

न च रूपेण दृष्टेन दृष्ट इत्यभिधीयसे ।

धर्मे दृष्टे सुदृष्टोऽसि धर्मता न च दृश्यते ॥ १७ ॥

शौषिर्यं नास्ति ते काये मांसास्थिरुधिरं न च ।

इन्द्रायुधमिवाकाशे कायं दर्शितवानसि ॥ १८ ॥

नामयो नाशुचिः काये क्षुत्तृष्णासंभवो न च ।

त्वया लोकानुवृत्त्यर्थं दर्शिता लौकिकी क्रिया ॥ १९ ॥

कर्मावरणदोषश्च सर्वथानघ नास्ति ते।

त्वया लोकानुकम्पार्थं कर्मप्लुतिः प्रदर्शिता॥ २०॥

धर्मधातोरसंभेदाद्यानभेदोऽस्ति न प्रभो।

यानत्रितयमाख्यातं त्वया सत्त्वावतारतः॥ २१॥

नित्यो ध्रुवः शिवः कायस्तव धर्ममयो जिनः।

विनेयजनहेतोश्च दर्शिता निर्वृतिस्त्वया॥ २२॥

लोकधातुष्वमेयेषु त्वद्भक्तैः पुनरीक्ष्यसे।

च्युतिजन्माभिसंबोधिचक्रनिर्वृतिलालसैः॥ २३॥

न तेऽस्ति मन्यना नाथ न विकल्पो न चेञ्जना।

अनाभोगेन ते लोके बुद्धकृत्यं प्रवर्तते॥ २४॥

इति सुगतमचिन्त्यमप्रमेयं गुणकुसुमैरवकीर्य यन्मयाप्तम् ।

कुशलमिह भवन्तु तेन सत्त्वाः परमगभीरमुनीन्द्रधर्मभाजः ॥ २५ ॥

निरौपम्यस्तवः समाप्तः ॥

# नागार्जुनविरचितो
# निरौपम्यस्तवः ।

निरौपम्य नमस्तुभ्यं निःस्वभावार्थवेदिने ।
यस्त्वं दृष्टिविपन्नस्य लोकस्यास्य हितोद्यतः ॥ १ ॥

न च नाम त्वया किंचिद्दृष्टं बौद्धेन चक्षुषा ।
अनुत्तरा च ते नाथ दृष्टिस्तत्त्वार्थदर्शिनी ॥ २ ॥

न बोद्धा न च बोद्धव्यमस्तीह परमार्थतः ।
अहो परमदुर्बोधां धर्मतां बुद्धवानसि ॥ ३ ॥

न त्वयोत्पादितः कश्चिद्धर्मो नापि निरोधितः ।
समतादर्शनेनैव प्राप्तं पदमनुत्तरम् ॥ ४ ॥

न संसारापकर्षेण त्वया निर्वाणमीप्सितम् ।
शान्तिस्तेऽधिगता नाथ संसारानुपलब्धितः ॥ ५ ॥

त्वं विवेदैकरसतां संक्लेशव्यवदानयोः ।
धर्मधात्वविनिर्भेदाद्विशुद्धश्चासि सर्वतः ॥ ६ ॥

नोदाहृतं त्वया किंचिदेकमप्यक्षरं विभो ।
कृत्स्नश्च वैनेयजनो धर्मवर्षेण तर्पितः ॥ ७ ॥

न तेऽस्ति सक्तिः स्कन्धेषु धातुष्वायतनेषु च ।
आकाशसमचित्तस्त्वं सर्वधर्मेष्वनिश्रितः ॥ ८ ॥

सत्त्वसंज्ञा च ते नाथ सर्वथा न प्रवर्तते ।
दुःखार्तेषु च सत्त्वेषु त्वमतीव कृपात्मकः ॥ ९ ॥

सुखदुःखात्मनैरात्म्यनित्यानित्यादिषु प्रभो ।
इति नानाविकल्पेषु बुद्धिस्तव न सज्जते ॥ १० ॥

न गतिर्नागतिः काचिद्धर्माणामिति ते मतिः ।
न क्वचिद्राशिभवोऽतोऽसि परमार्थवित् ॥ ११ ॥

सर्वत्रानुगतश्चासि न च जातोऽसि कुत्रचित् ।
जन्मधर्मशरीराभ्यामचिन्त्यस्त्वं महामुने ॥ १२ ॥

एकानेकत्वरहितं प्रतिश्रुत्कोपमं जगत् ।
संक्रान्तिनाशापगतं बुद्धवांस्त्वमनिन्दितः ॥ १३ ॥

शाश्वतोच्छेदरहितं लक्ष्यलक्षणवर्जितम् ।
संसारमवबुद्धस्त्वं स्वप्नमायादिवत्प्रभो ॥ १४ ॥

वासनामूलपर्यन्ताः क्लेशास्तेऽनघ निर्जिताः ।
क्लेशप्रकृतितश्चैव त्वयामृतमुपार्जितम् ॥ १५ ॥

अलक्षणं त्वया धीर दृष्टं रूपमरूपवत् ।
लक्षणोज्ज्वलगात्रश्च दृश्यसे रूपगोचरे ॥ १६ ॥

न च रूपेण दृष्टेन दृष्ट इत्यभिधीयसे ।
धर्मे दृष्टे सुदृष्टोऽसि धर्मता न च दृश्यते ॥ १७ ॥

शौषिर्यं नास्ति ते काये मांसास्थिरुधिरं न च ।
इन्द्रायुधमिवाकाशे कायं दर्शितवानसि ॥ १८ ॥

नामयो नाशुचिः काये क्षुत्तृष्णासंभवो न च ।
त्वया लोकानुवृत्त्यर्थं दर्शिता लौकिकी क्रिया ॥ १९ ॥

कर्मावरणदोषश्च सर्वथानघ नास्ति ते ।
त्वया लोकानुकम्पार्थं कर्मप्लुतिः प्रदर्शिता ॥ २० ॥

धर्मधातोरसंभेदाद्यानभेदोऽस्ति न प्रभो ।
यानत्रितयमाख्यातं त्वया सत्त्वावतारतः ॥ २१ ॥

नित्यो ध्रुवः शिवः कायस्तव धर्ममयो जिनः ।
विनेयजनहेतोश्च दर्शिता निर्वृतिस्त्वया ॥ २२ ॥

लोकधातुष्वमेयेषु त्वद्भक्तैः पुनरीक्ष्यसे ।
च्युतिजन्माभिसंबोधिचक्रनिर्वृतिलालसैः ॥ २३ ॥

न तेऽस्ति मन्यना नाथ न विकल्पो न चेञ्जना ।
अनाभोगेन ते लोके बुद्धकृत्यं प्रवर्तते ॥ २४ ॥

इति सुगतमचिन्त्यमप्रमेयं गुणकुसुमैरवकीर्य यन्मयाप्तम् ।
कुशलमिह भवन्तु तेन सत्त्वाः परमगभीरमुनीन्द्रधर्मभाजः ॥ २५ ॥

निरौपम्यस्तवः समाप्तः ॥

# 9. **Hymn to the Mother of All Buddhas**

(*Prajñāpāramitāstotra*)

While much of Buddhist devotional poetry takes the Buddha as its object, hymns (*stotra*) are also commonly offered to other enlightened beings, including female figures, such as Tārā or Prajñāpāramitā, the "goddess" or personification of the perfection (*pāramitā*) of transcendent wisdom (*prajñā*), the insight into the emptiness (*śunyatā*) of all phenomena required to achieve full Buddhahood.

Already in early Mahāyāna sūtras, *prajñāpāramitā* is described as the (metaphorical) mother of all past, present, and future Buddhas. With the subsequent development of Vajrayāna or Tantric Buddhism, the anthropomorphic form of *prajñāpāramitā* becomes an important object of veneration, as shown by the rich iconography found in India, Southeast Asia, or Tibet, where the goddess is known as Yum Chenmo, the "Great Mother".

In this hymn, ascribed to the third-century monk Rāhulabhadra, Prajñāpāramitā is, in typical *stotra* fashion, addressed directly in the vocative case. The words of praise are spoken out of devotion (*bhakti*), in spite of subject matter's ultimate ineffability.

# 九、**讚歎諸佛之母**

*Prajñāpāramitāstotra*《般若波羅蜜多讚》

佛教的讚頌（stotra）大多用於讚美佛陀，然而讚詠其他證悟者的讚頌也為數不少，其中包含了對於女性菩薩的頌揚，例如度母（Tārā）及圓滿智慧的體現者般若波羅蜜多（Prajñāpāramitā）。

在早期的大乘佛經中，般若波羅蜜多曾經被描述為過去、現在和未來三世諸佛的（隱喻意義上的）母親。學者們在印度、東南亞和西藏等地發現了豐富的圖像，反映出般若波羅蜜多的人格化形象，隨著金剛乘（Vajrayāna）的發展而成為重要的崇拜對象。在西藏，這尊菩薩被稱為 Yum Chenmo，意即「偉大的母親」。

本篇讚頌一般認為是三世紀僧人羅睺羅跋陀羅（Rāhulabhadra）的作品。如同典型的讚頌形式，作者直接以呼格呼喚般若波羅蜜多。儘管般若波羅蜜多在根本上是不可言說，但作者巧妙的運用多項譬喻抒發其信奉（「奉愛」bhakti）之情。

# राहुलभद्रविरचितं

# प्रज्ञापारमितास्तोत्रम् ।

ॐ नमः श्रीप्रज्ञापारमितायै ।

निर्विकल्पे नमस्तुभ्यं प्रज्ञापारमितेऽमिते ।

या त्वं सर्वानवद्याङ्गि निरवद्यैर्निरीक्ष्यसे ॥ १ ॥

आकाशमिव निर्लेपां निष्प्रपञ्चां निरक्षराम् ।

यस्त्वां पश्यति भावेन स पश्यति तथागतम् ॥ २ ॥

तव चार्ये गुणाढ्याया बुद्धस्य च जगद्गुरोः ।

न पश्यन्त्यन्तरं सन्तश्चन्द्रचन्द्रिकयोरिव ॥ ३ ॥

कृपात्मकाः प्रपद्य त्वां बुद्धधर्मपुरःसरीम् ।

सुखेनायान्ति माहात्म्यमतुलं भक्तिवत्सले ॥ ४ ॥

सकृदप्याशये शुद्धे यस्त्वां विधिवदीक्षते ।

तेनापि नियतं सिद्धिः प्राप्यतेऽमोघदर्शने ॥ ५ ॥

सर्वेषामपि वीराणां परार्थनिरतात्मनाम् ।

पोषिका जनयित्री च माता त्वमसि वत्सला ॥ ६ ॥

यद्बुद्धा लोकगुरवः पुत्रास्तव कृपालवः ।

तेन त्वमपि कल्याणि सर्वसत्त्वपितामही ॥ ७ ॥

सर्वपारमिताभिस्त्वं निर्मलाभिरनिन्दिते ।

चन्द्रलेखेव ताराभिरनुयातासि सर्वदा ॥ ८ ॥

विनेयं जनमासाद्य तत्र तत्र तथागतैः ।

बहुरूपा त्वमेवैका नानानामभिरीड्यसे ॥ ९ ॥

प्रभां प्राप्येव दीप्तांशोरवश्यायोदबिन्दवः ।

त्वां प्राप्य प्रलयं यान्ति दोषा वादाश्च वादिनाम् ॥ १० ॥

त्वमेव त्रासजननी बालानां भीमदर्शना ।

आश्वासजननी चासि विदुषां सौम्यदर्शना ॥ ११ ॥

यस्य त्वय्यप्यभिष्वङ्गस्त्वन्नाथस्य न विद्यते ।

तस्याम्ब कथमन्यत्र रागद्वेषौ भविष्यतः ॥ १२ ॥

नागच्छसि कुतश्चित्त्वं न च क्वचन गच्छसि ।

स्थानेष्वपि च सर्वेषु विद्वद्भिर्नोपलभ्यसे ॥ १३ ॥

ये त्वामेवं न पश्यन्ति प्रपद्यन्ते च भावतः ।

प्रपद्य च विमुच्यन्ते तदिदं महदद्भुतम् ॥ १४ ॥

त्वामेव बध्यते पश्यन्नपश्यन्नपि बध्यते ।

त्वामेव मुच्यते पश्यन्नपश्यन्नपि मुच्यते ॥ १५ ॥

अहो विस्मयनीयासि गम्भीरासि यशस्विनि ।

सुदुर्बोधासि मायेव दृश्यसे न च दृश्यसे ॥ १६ ॥

बुद्धैः प्रत्येकबुद्धैश्च श्रावकैश्च निषेविता ।

मार्गस्त्वमेका मोक्षस्य नास्त्यन्य इति निश्चयः ॥ १७ ॥

व्यवहारं पुरस्कृत्य प्रज्ञप्त्यर्थं शरीरिणाम् ।

कृपया लोकनाथैस्त्वमुच्यसे च न चोच्यसे ॥ १८ ॥

शक्तः कस्त्वामिह स्तोतुं निर्निमित्तां निरञ्जनाम् ।

सर्ववाग्विषयातीतां या त्वं क्वचिदनिश्रिता ॥ १९ ॥

सत्येवमपि संवृत्या वाक्पथैर्वयमीदृशैः ।

त्वामस्तुत्यामपि सतीं तुष्टूषन्तः सुनिर्वृताः ॥ २० ॥

प्रज्ञापारमितां स्तुत्वा यन्मयोपचितं शुभम् ।

तेनास्त्वाशु जगत्कृत्स्नं प्रज्ञापारपरायणम् ॥ २१ ॥

# राहुलभद्रविरचितं प्रज्ञापारमितास्तोत्रम् ।

ॐ नमः श्रीप्रज्ञापारमितायै ।

निर्विकल्पे नमस्तुभ्यं प्रज्ञापारमितेऽमिते ।
या त्वं सर्वानवद्याङ्गि निरवद्यैर्निरीक्ष्यसे ॥ १ ॥

आकाशमिव निर्लेपां निष्प्रपञ्चां निरक्षराम् ।
यस्त्वां पश्यति भावेन स पश्यति तथागतम् ॥ २ ॥

तव चार्ये गुणाढ्याया बुद्धस्य च जगद्गुरोः ।
न पश्यन्त्यन्तरं सन्तश्चन्द्रचन्द्रिकयोरिव ॥ ३ ॥

कृपात्मकाः प्रपद्य त्वां बुद्धधर्मपुरःसरीम् ।
सुखेनायान्ति माहात्म्यमतुलं भक्तिवत्सले ॥ ४ ॥

सकृदप्याशये शुद्धे यस्त्वां विधिवदीक्षते ।
तेनापि नियतं सिद्धिः प्राप्यतेऽमोघदर्शने ॥ ५ ॥

सर्वेषामपि वीराणां परार्थनिरतात्मनाम् ।
पोषिका जनयित्री च माता त्वमसि वत्सला ॥ ६ ॥

यद्बुद्धा लोकगुरवः पुत्रास्तव कृपालवः ।
तेन त्वमपि कल्याणि सर्वसत्त्वपितामही ॥ ७ ॥

सर्वपारमिताभिस्त्वं निर्मलाभिरनिन्दिते ।
चन्द्रलेखेव ताराभिरनुयातासि सर्वदा ॥ ८ ॥

विनेयं जनमासाद्य तत्र तत्र तथागतैः ।
बहुरूपा त्वमेवैका नानानामभिरीड्यसे ॥ ९ ॥

प्रभां प्राप्येव दीप्तांशोरवश्यायोदबिन्दवः ।
त्वां प्राप्य प्रलयं यान्ति दोषा वादाश्च वादिनाम् ॥ १० ॥

त्वमेव त्रासजननी बालानां भीमदर्शना ।
आश्वासजननी चासि विदुषां सौम्यदर्शना ॥ ११ ॥

यस्य त्वय्यप्यभिष्वङ्गस्त्वन्नाथस्य न विद्यते ।
तस्याम्ब कथमन्यत्र रागद्वेषौ भविष्यतः ॥ १२ ॥

नागच्छसि कुतश्चित्त्वं न च क्वचन गच्छसि ।
स्थानेष्वपि च सर्वेषु विद्वद्भिर्नोपलभ्यसे ॥ १३ ॥

ये त्वामेवं न पश्यन्ति प्रपद्यन्ते च भावतः ।
प्रपद्य च विमुच्यन्ते तदिदं महदद्भुतम् ॥ १४ ॥

त्वामेव बध्यते पश्यन्नपश्यन्नपि बध्यते ।
त्वामेव मुच्यते पश्यन्नपश्यन्नपि मुच्यते ॥ १५ ॥

अहो विस्मयनीयासि गम्भीरासि यशस्विनि ।
सुदुर्बोधासि मायेव दृश्यसे न च दृश्यसे ॥ १६ ॥

बुद्धैः प्रत्येकबुद्धैश्च श्रावकैश्च निषेविता ।
मार्गस्त्वमेका मोक्षस्य नास्त्यन्य इति निश्चयः ॥ १७ ॥

व्यवहारं पुरस्कृत्य प्रज्ञप्त्यर्थं शरीरिणाम् ।
कृपया लोकनाथैस्त्वमुच्यसे च न चोच्यसे ॥ १८ ॥

शक्तः कस्त्वामिह स्तोतुं निर्निमित्तां निरञ्जनाम् ।
सर्ववाग्विषयातीतां या त्वं क्वचिदनिश्रिता ॥ १९ ॥

सत्येवमपि संवृत्या वाक्पथैर्वयमीदृशैः ।
त्वामस्तुत्यामपि सतीं तुष्टूषन्तः सुनिर्वृताः ॥ २० ॥

प्रज्ञापारमितां स्तुत्वा यन्मयोपचितं शुभम् ।
तेनास्त्वाशु जगत्कृत्स्नं प्रज्ञापारपरायणम् ॥ २१ ॥

# 10. **The Buffalo and the Monkey**
(*Jātakamālā*)

*Jātaka* stories narrate episodes from past lives of the Buddha. In these "birth-stories" the Buddha-to-be may appear in any form, as a king, an outcast, a tigress, or even a fish. *Jātakas* form a very popular genre of Buddhist literature, with more than five hundred such tales collected in the Theravāda Pāli canon alone. Each story illustrates a particular virtue, or perfection (*pāramitā*), cultivated on the path to full Buddhahood, conveying the Buddhist ethos through memorable parables.

The *Jātakāmālā*, composed by the fourth-century Buddhist poet Āryaśūra, offers a "garland" (*mālā*) or collection of retellings of thirty-four popular *jātaka* stories. While the tales found in the Pāli canon are written in a simple prose style, Āryaśūra's *Jātakamālā* is a work of *kāvya*, "belles-lettres" or "ornate poetry", featuring an alternation of prose and verse, a literary style that came to be termed *campū*. This masterpiece of Buddhist literature is a remarkable example of classical Sanskrit didactic poetry, combining entertaining narratives with gnomic stanzas in a manner similar to the well-known *Pañcatantra*.

Our text comprises the penultimate *jātaka* tale from Āryaśūra's work, in which the story of the Buddha's past incarnation as a buffalo and his encounter with a mischievous monkey serves to impart the value of forbearance (*kṣamā* or *kṣānti*).

# 十、**水牛與猴子的故事**
摘自 *Jātakamālā*《本生鬘》

本生故事（jātaka）敘述佛陀過去世的故事。在這些本生故事中，佛陀作為因地菩薩，可能以各種形式出現，如國王、流浪者、母老虎或是魚。在歷史上，本生故事是一種非常流行的佛教文學類型，僅在上座部（Theravāda）巴利藏中，就收集了五百多個故事。每個故事都說明行菩薩道所需要培養的某種德行，亦即某種波羅蜜多（pāramitā）。

《本生鬘》由二世紀的佛教詩人聖勇（Āryaśūra）所撰。《本生鬘》選取三十四個流行的本生故事，擷取大綱，輯錄而成。巴利經典中的本生故事用簡單的散文風格呈現，《本生鬘》則屬於梵語「美文學」（kāvya）著作。《本生鬘》融合散文體與韻文，這種文學風格隨之發展，爾後以專門的術語「campū」稱之。這部重要的佛教文學著作將娛樂性敘事與格言詩相結合，近於著名的《五卷書》（*Pañcatantra*），可謂古典梵語訓誨詩之非凡典範。

我們選取了《本生鬘》倒數第二個故事：作為水牛的佛陀前世，與頑皮的猴子相遇，藉此說明忍辱（kṣamā 或 kṣānti）的重要性。

# आर्यशूरविरचितायां जातकमालायां

# महिषजातकं त्रयस्त्रिंशत्तमम् ।

सति क्षन्तव्ये क्षमा स्यान्नासतीत्यपकारिणामपि साधवो लाभमिव बहु मन्यन्ते । तद्यथानुश्रूयते—

बोधिसत्त्वः किलान्यतमस्मिन्नरण्यप्रदेशे पङ्कसंपर्कात्परुषवपुर्नीलमेघविच्छेद इव पादचारी वनमहिषवृषो बभूव । स तस्यां दुर्लभधर्मसंज्ञायां संमोहबहुलायामपि तिर्यग्गतौ वर्तमानः पटुविज्ञानत्वान्न धर्मचर्यानिरुद्योगमतिर्बभूव ।

चिरानुवृत्त्येव निबद्धभावा
न तं कदाचित्करुणा मुमोच ।

कोऽपि प्रभावः स तु कर्मणो वा

तस्यैव वा यत्स तथा बभूव ॥ ३३.१ ॥

अतश्च नूनं भगवानवोचद्

अचिन्त्यतां कर्मविपाकयुक्तेः ।

कृपात्मकः सन्नपि यत्स भेजे

तिर्यग्गतिं तत्र च धर्मसंज्ञाम् ॥ ३३.२ ॥

विना न कर्मास्ति गतिप्रबन्धः

शुभं न चानिष्टविपाकमस्ति ।

स धर्मसंज्ञी पि तु कर्मलेशांस्

तांस्तान्समासाद्य तथा तथासीत् ॥ ३३.३ ॥

अथान्यतमो दुष्टवानरस्तस्य कालान्तराभिव्यक्तां प्रकृतिभद्रतां दयानु-वृत्त्या च विगतक्रोधसंरम्भतामवेत्य, नास्माद्भयमस्तीति, तं महासत्त्वं तेन तेन विहिंसाक्रमेण भृशतरमबाधत।

दयामृदुषु दुर्जनः पटुतरावलेपोद्धवः

परां व्रजति विक्रियां न हि भयं ततः पश्यति।

यतस्तु भयशङ्कया सुकृशयापि संस्पृश्यते

विनीत इव नीचकैश्चरति तत्र शान्तोद्धवः॥ ३३.४॥

स कदाचित्तस्य महासत्त्वस्य विस्रब्धप्रसुप्तस्य निद्रावशाद्वा प्रचलायतः सहसैवोपरि निपतति स्म। द्रुममिव कदाचिदेनमधिरुह्य भृशं संचाल-यामास। क्षुधितस्यापि कदाचिदस्य मार्गमावृत्य व्यतिष्ठत। काष्ठेनाप्येन-मेकदा श्रवणयोर्घट्टयामास। सलिलावगाहनसमुत्सुकस्याप्यस्य कदाचि-

च्छिरः समभिरुह्य पाणिभ्यां नयने समावव्रे। अप्येनमधिरुह्य समुद्यतदण्डः प्रसह्यैव वाहयन्यमस्य लीलामनुचकार। बोधिसत्त्वोऽपि महासत्त्वः सर्वं तदस्याविनयचेष्टितमुपकारमिव मन्यमानो निःसंक्षोभसंरम्भमन्युर्मर्षयामास।

स्वभाव एव पापानां विनयोन्मार्गसंश्रयः।
अभ्यासात्तत्र च सतामुपकार इव क्षमा॥ ३३.५॥

अथ किलान्यतमो यक्षस्तमस्य परिभवममृष्यमानो भावं वा जिज्ञासमानस्तस्य महासत्त्वस्य, तेन दुष्टकपिना वाह्यमानं तं महिषवृषभं मार्गे स्थित्वा इदमुवाच——मा तावद्भोः। किं परिक्रीतोऽस्यनेन दुष्टकपिना? अथ द्यूते पराजितः? उताहो भयमस्मात्किंचिदाशङ्कसे? उताहो बलमात्मगतं नावेषि, यदेवमनेन परिभूय वाह्यसे? ननु भोः

वेगाविद्धं त्वद्विषाणाग्रवज्रं

वज्रं भिन्द्याद्वज्रवद्वा नगेन्द्रान् ।

पादाश्चेमे रोषसंरम्भमुक्ता

मज्जेयुस्ते पङ्कवच्छैलपृष्ठे ॥ ३३.६ ॥

इदं च शैलोपमसंहतस्थिरं

समग्रशोभं बलसंपदा वपुः ।

स्वभावसौजस्कनिरीक्षितोऽर्जितं

दुरासदं केसरिणोऽपि ते भवेत् ॥ ३३.७ ॥

मथाथ धृत्वा तदिमं क्षुरेण वा

विषाणकोट्या मदमस्य वोद्धर ।

किमस्य जाल्मस्य कपेरशक्तवत्

प्रबाधनादुःखमिदं तितिक्षसे ॥ ३३.८ ॥

असज्जनः कुत्र यथा चिकित्स्यते

गुणानुवृत्त्या सुखशीलसौम्यया ।

कटूष्णरूक्षाणि हि यत्र सिद्धये

कफात्मको रोग इव प्रसर्पति ॥ ३३.९ ॥

अथ बोधिसत्त्वस्तं यक्षमवेक्षमाणः क्षमापक्षपतितमरूक्षाक्षरमित्यु-
वाच—

अवैम्येनं चलं नूनं सदा चाविनये रतम् ।

अत एव मया त्वस्य युक्तं मर्षयितुं ननु ॥ ३३.१० ॥

प्रतिकर्तुमशक्तस्य क्षमा का हि बलीयसि ।

विनयाचारधीरेषु क्षन्तव्यं किं च साधुषु ॥ ३३.११ ॥

शक्त एव तितिक्षते दुर्बलस्खलितं यतः ।

वरं परिभवस्तस्मान्न गुणानां पराभवः ॥ ३३.१२ ॥

असत्क्रिया हीनबलाच्च नाम

निर्देशकालः परमो गुणानाम् ।

गुणप्रियस्तत्र किमित्यपेक्ष्य

स्वधैर्यभेदाय पराक्रमेत ॥ ३३.१३ ॥

नित्यं क्षमायाश्च ननु क्षमायाः

कालः परायत्ततया दुरापः ।

परेण तस्मिन्नुपपादिते च

तत्रैव कोपप्रणयक्रमः कः ॥ ३३.१४ ॥

स्वां धर्मपीडामविचिन्त्य योऽयं

मत्पापशुद्ध्यर्थमिव प्रवृत्तः ।

न चेत्क्षमामप्यहमत्र कुर्याम्

अन्यः कृतघ्नो बत कीदृशः स्यात् ॥ ३३.१५ ॥

यक्ष उवाच—तेन हि न त्वमस्याः कदाचित्प्रबाधनाया मोक्ष्यसे—

गुणेष्वबहुमानस्य दुर्जनस्याविनीतताम् ।

क्षमानैभृत्यमत्यक्त्वा कः संकोचयितुं प्रभुः ॥ ३३.१६ ॥

बोधिसत्त्व उवाच—

परस्य पीडाप्रणयेन यत्सुखं

निवारणं स्यादसुखोदयस्य वा ।

सुखार्थिनस्तन्न निषेवितुं क्षमं

न तद्विपाको हि सुखप्रसिद्धये ॥ ३३.१७ ॥

क्षमाश्रयादेवमसौ मयार्थतः

प्रबोध्यमानो यदि नावगच्छति ।

निवारयिष्यन्ति त एनमुत्पथाद्

अमर्षिणो यानयमभ्युपैष्यति ॥ ३३.१८ ॥

असत्क्रियां प्राप्य च तद्विधाज्जनान्

न मादृशेऽप्येवमसौ करिष्यति ।

न लब्धदोषो हि पुनस्तथाचरेद्

अतश्च मुक्तिर्मम सा भविष्यति ॥ ३३.१९ ॥

अथ यक्षस्तं महासत्त्वं प्रसादविस्मयबहुमानावर्जितमतिः साधु साध्विति सशिरःप्रकम्पाङ्गुलिविक्षेपमभिसंराध्य तत्तत्प्रियमुवाच—

कुतस्तिरश्चामियमीदृशी स्थितिर्

गुणेष्वसौ चादरविस्तरः कुतः ।

कयापि बुद्ध्या त्विदमास्थितो वपुस्

तपोवने कोऽपि भवांस्तपस्यति ॥ ३३.२० ॥

इत्येनमभिप्रशस्य तं चास्य दुष्टवानरं पृष्ठादवधूय समादिश्य चास्य रक्षाविधानं तत्रैवान्तर्दधे ।

तदेवं सति क्षन्तव्ये क्षमा स्यान्नासतीत्यपकारिणामपि साधवो लाभमिव बहु मन्यन्त इति क्षान्तिकथायां वाच्यम्। एवं तिर्यग्गतानां बोधिसत्त्वानां प्रतिसंख्यानसौष्ठवं दृष्टम्। को नाम मनुष्यभूतः प्रव्रजितप्रतिज्ञो वा तद्वि-कलः शोभेत? इत्येवमपि वाच्यम्, तथागतवर्णे सत्कृत्य धर्मश्रवणे चेति।

इति महिषजातकं त्रयस्त्रिंशत्तमम्॥

# आर्यशूरविरचितायां जातकमालायां
# महिषजातकं त्रयस्त्रिंशत्तमम् ।

सति क्षन्तव्ये क्षमा स्यान्नासतीत्यपकारिणामपि साधवो लाभमिव बहु मन्यन्ते । तद्यथानुश्रूयते—

बोधिसत्त्वः किलान्यतमस्मिन्नरण्यप्रदेशे पङ्कसंपर्कात्परुषवपुर्नीलमेघविच्छेद इव पादचारी वनमहिषवृषो बभूव । स तस्यां दुर्लभधर्मसंज्ञायां संमोहबहुलायामपि तिर्यग्गतौ वर्तमानः पटुविज्ञानत्वान्न धर्मचर्यानिरुद्योगमतिर्बभूव ।

चिरानुवृत्त्येव निबद्धभावा
न तं कदाचित्करुणा मुमोच ।
कोऽपि प्रभावः स तु कर्मणो वा
तस्यैव वा यत्स तथा बभूव ॥ ३३.१ ॥

अतश्च नूनं भगवानवोचद्
अचिन्त्यतां कर्मविपाकयुक्तेः ।
कृपात्मकः सन्नपि यत्स भेजे
तिर्यग्गतिं तत्र च धर्मसंज्ञाम् ॥ ३३.२ ॥

विना न कर्मास्ति गतिप्रबन्धः
शुभं न चानिष्टविपाकमस्ति।
स धर्मसंज्ञी पि तु कर्मलेशांस्
तांस्तान्समासाद्य तथा तथासीत्॥ ३३.३॥

अथान्यतमो दुष्टवानरस्तस्य कालान्तराभिव्यक्तां प्रकृतिभद्रतां दयानुवृत्त्या च विगतक्रोधसंरम्भतामवेत्य, नास्माद्भयमस्तीति, तं महासत्त्वं तेन तेन विहिंसाक्रमेण भृशतरमबाधत।

दयामृदुषु दुर्जनः पटुतरावलेपोद्धवः
परां व्रजति विक्रियां न हि भयं ततः पश्यति।
यतस्तु भयशङ्कया सुकृशयापि संस्पृश्यते
विनीत इव नीचकैश्चरति तत्र शान्तोद्धवः॥ ३३.४॥

स कदाचित्तस्य महासत्त्वस्य विस्रब्धप्रसुप्तस्य निद्रावशाद्वा प्रचलायतः सहसैवोपरि निपतति स्म। द्रुममिव कदाचिदेनमधिरुह्य भृशं संचालयामास। क्षुधितस्यापि कदाचिदस्य मार्गमावृत्य व्यतिष्ठत। काष्ठेणाप्येनमेकदा श्रवणयोर्घट्टयामास। सलिलावगाहनसमुत्सुकस्याप्यस्य कदाचिच्छिरः समभिरुह्य पाणिभ्यां नयने समावव्रे। अप्येनमधिरुह्य समुद्यतदण्डः प्रसह्यैव वाहयन्यमस्य लीलामनुचकार। बोधिसत्त्वोऽपि महासत्त्वः सर्वं तदस्याविनयचेष्टितमुपकारमिव मन्यमानो निःसंक्षोभसंरम्भमन्युर्मर्षयामास।

स्वभाव एव पापानां विनयोन्मार्गसंश्रयः ।
अभ्यासात्तत्र च सतामुपकार इव क्षमा ॥ ३३.५ ॥

अथ किलान्यतमो यक्षस्तमस्य परिभवममृष्यमानो भावं वा जिज्ञासमानस्तस्य महासत्त्वस्य, तेन दुष्टकपिना वाह्यमानं तं महिषवृषभं मार्गे स्थित्वा इदमुवाच—मा तावद्भोः । किं परिक्रीतोऽस्यनेन दुष्टकपिना? अथ द्यूते पराजितः? उताहो भयमस्मात्किंचिदाशङ्कसे? उताहो बलमात्मगतं नावेषि, यदेवमनेन परिभूय वाह्यसे? ननु भोः

वेगाविद्धं त्वद्विषाणाग्रवज्रं
वज्रं भिन्द्याद्वज्रवद्वा नगेन्द्रान् ।
पादाश्चेमे रोषसंरम्भमुक्ता
मज्जेयुस्ते पङ्कवच्छैलपृष्ठे ॥ ३३.६ ॥

इदं च शैलोपमसंहतस्थिरं
समग्रशोभं बलसंपदा वपुः ।
स्वभावसौजस्कनिरीक्षितोऽर्जितं
दुरासदं केसरिणोऽपि ते भवेत् ॥ ३३.७ ॥

मथाथ धृत्वा तदिमं क्षुरेण वा
विषाणकोट्या मदमस्य वोद्धर ।
किमस्य जाल्मस्य कपेरशक्तवत्
प्रबाधनादुःखमिदं तितिक्षसे ॥ ३३.८ ॥

असज्जनः कुत्र यथा चिकित्स्यते
गुणानुवृत्त्या सुखशीलसौम्यया ।
कटूष्णरूक्षाणि हि यत्र सिद्धये
कफात्मको रोग इव प्रसर्पति ॥ ३३.९ ॥

अथ बोधिसत्त्वस्तं यक्षमवेक्षमाणः क्षमापक्षपतितमरूक्षाक्षरमित्युवाच—

अवैम्येनं चलं नूनं सदा चाविनये रतम् ।
अत एव मया त्वस्य युक्तं मर्षयितुं ननु ॥ ३३.१० ॥

प्रतिकर्तुमशक्तस्य क्षमा का हि बलीयसि ।
विनयाचारधीरेषु क्षन्तव्यं किं च साधुषु ॥ ३३.११ ॥

शक्त एव तितिक्षते दुर्बलस्खलितं यतः ।
वरं परिभवस्तस्मान्न गुणानां पराभवः ॥ ३३.१२ ॥

असत्क्रिया हीनबलाच्च नाम
निर्देशकालः परमो गुणानाम् ।
गुणप्रियस्तत्र किमित्यपेक्ष्य
स्वधैर्यभेदाय पराक्रमेत ॥ ३३.१३ ॥

नित्यं क्षमायाश्च ननु क्षमायाः
कालः परायत्ततया दुरापः ।

परेण तस्मिन्नुपपादिते च
तत्रैव कोपप्रणयक्रमः कः ॥ ३३.१४ ॥

स्वां धर्मपीडामविचिन्त्य योऽयं
मत्पापशुद्ध्यर्थमिव प्रवृत्तः ।
न चेत्क्षमामप्यहमत्र कुर्याम्
अन्यः कृतघ्नो बत कीदृशः स्यात् ॥ ३३.१५ ॥

यक्ष उवाच—तेन हि न त्वमस्याः कदाचित्प्रबाधनाया मोक्ष्यसे—

गुणेष्वबहुमानस्य दुर्जनस्याविनीतताम् ।
क्षमानैभृत्यमत्यक्त्वा कः संकोचयितुं प्रभुः ॥ ३३.१६ ॥

बोधिसत्त्व उवाच—

परस्य पीडाप्रणयेन यत्सुखं
निवारणं स्यादसुखोदयस्य वा ।
सुखार्थिनस्तन्न निषेवितुं क्षमं
न तद्विपाको हि सुखप्रसिद्धये ॥ ३३.१७ ॥

क्षमाश्रयादेवमसौ मयार्थतः
प्रबोध्यमानो यदि नावगच्छति ।
निवारयिष्यन्ति त एनमुत्पथाद्
अमर्षिणो यानयमभ्युपैष्यति ॥ ३३.१८ ॥

असत्क्रियां प्राप्य च तद्विधाज्जनान्
न मादृशेऽप्येवमसौ करिष्यति।
न लब्धदोषो हि पुनस्तथाचरेद्
अतश्च मुक्तिर्मम सा भविष्यति॥ ३३.१९॥

अथ यक्षस्तं महासत्त्वं प्रसादविस्मयबहुमानावर्जितमतिः साधु साध्विति सशिरःप्रकम्पाङ्गुलिविक्षेपमभिसंराध्य तत्तत्प्रियमुवाच—

कुतस्तिरश्चामियमीदृशी स्थितिर्
गुणेष्वसौ चादरविस्तरः कुतः।
कयापि बुद्ध्या त्विदमास्थितो वपुस्
तपोवने कोऽपि भवांस्तपस्यति॥ ३३.२०॥

इत्येनमभिप्रशस्य तं चास्य दुष्टवानरं पृष्ठादवधूय समादिश्य चास्य रक्षाविधानं तत्रैवान्तर्दधे।

तदेवं सति क्षन्तव्ये क्षमा स्यान्नासतीत्यपकारिणामपि साधवो लाभमिव बहु मन्यन्त इति क्षान्तिकथायां वाच्यम्। एवं तिर्यग्गतानां बोधिसत्त्वानां प्रतिसंख्यानसौष्ठवं दृष्टम्। को नाम मनुष्यभूतः प्रव्रजितप्रतिज्ञो वा तद्विकलः शोभेत? इत्येवमपि वाच्यम्, तथागतवर्णे सत्कृत्य धर्मश्रवणे चेति।

इति महिषजातकं त्रयस्त्रिंशत्तमम्॥

# 11. **Encountering Old Age**

(*Buddhacarita*, ch. 3)

The *Buddhacarita*, composed by the great second-century Buddhist dramatist and poet Aśvaghoṣa, is the first Indian text to offer a systematic and chronological account of the Buddha's life. The text refers to itself as a *mahākāvya* or "epic poem", a class of ornate court poetry (*kāvya*) characterized by elaborate figures of speech (*alaṃkāra*) describing scenes of battle, nature, love, and so on. The literary quality of the Aśvaghoṣa's works has led many to regard this Buddhist author as one of the greatest poets in the history of Sanskrit literature, and possibly the most important predecessor of Kālidāsa, the famed "Shakespeare of India".

While other accounts of the Buddha's life, such as the *Mahāvastu* ("Great Event") and *Lalitavistara* ("The Play [of the Buddha's life] in Full"), emphasize the mythological elements of the Buddha's life, Aśvaghoṣa's elegant treatment shows restraint is the description of miracles, and is free of the kinds of exaggerations that tend to characterize later depictions of the Buddha. In the records of his trip to India, the Chinese pilgrim Yi Jing (義淨) attests to the popularity from ancient times of the *Buddhacarita*, stating that Aśvaghoṣa's masterpiece was recited throughout the Indian subcontinent, and even as far as the Malay archipelago, where he had come to reside.

The third canto (*sarga*) tells the story of prince Siddhārtha's fateful encounter with an old man, a sick man, and a corpse, referred to elsewhere as the "heavenly messengers" (*devadūta*), for reasons made clear in the following passage. Our text begins as the prince is being driven by his charioteer Chandaka through the streets of Kapilavastu, which the king Śuddhodhana has had cleared of all sick, old, or poor people in advance of Siddhārtha's first excursion to the royal garden outside the palace walls.

# 十一、王子的厭患

摘自 *Buddhacarita*《佛所行讚》

《佛所行贊》由二世紀偉大的佛教詩人馬鳴（Aśvaghoṣa）所造，是第一部系統地敘述佛陀一生的文獻。《佛所行贊》屬於梵語史詩（mahākāvya），即宮廷詩（kāvya）的一種，其特點是以精巧的修辭手法（alaṃkāra）描述戰鬥、大自然及愛情等場景。馬鳴作品文辭優美，被公認為梵語文學史上最偉大的詩人之一，亦相傳是有「印度莎士比亞」之譽的迦梨陀娑（Kālidāsa）最重要的前輩。

雖然其他文獻對於佛陀生命的描述側重於其神話元素，如《大事》（*Mahāvastu*）和

《普曜經》（*Lalitavistara*），馬鳴卻以優美的筆觸描述佛陀的一生，對佛陀神通事蹟較少著墨。中國西行求法僧義浄於《南海寄歸內法傳》記載，馬鳴這部傑作在全印度被吟誦，甚至遠及馬來群島，證明了《佛所行贊》自古以來之流行。

本文選自《佛所行贊》第三章，此章描寫悉達多（Siddhārtha）太子出遊偶遇老者、病人及死者的故事，經中將此類人生際遇稱為「天使」（devadūta）。太子乘著車匿（Chandaka）駕駛的馬車，穿過迦毘羅衛城（Kapilavastu）的街道，往宮外的皇室花園前進，這是太子第一次離開宮中，而淨飯王（Śuddhodhana）已預先將街道上所有的病人、老人及窮人移往他處。故事由此而展開…

# अश्वघोषविरचिते

# बुद्धचरिते महाकाव्ये

# संवेगोत्पत्तिर्नाम तृतीयः सर्गः ।

…

कीर्णं तथा राजपथं कुमारः पौरैर्विनीतैः शुचिधीरवेषैः ।

तत्पूर्वमालोक्य जहर्ष किंचिन्मेने पुनर्भावमिवात्मनश्च ॥ ३.२५ ॥

पुरं तु तत्स्वर्गमिव प्रहृष्टं शुद्धाधिवासाः समवेक्ष्य देवाः ।

जीर्णं नरं निर्ममिरे प्रयातुं संचोदनार्थं क्षितिपात्मजस्य ॥ ३.२६ ॥

ततः कुमारो जरयाभिभूतं दृष्ट्वा नरेभ्यः पृथगाकृतिं तम् ।

उवाच संग्राहकमागतास्थस्तत्रैव निष्कम्पनिविष्टदृष्टिः ॥ ३.२७ ॥

क एष भोः सूत नरोऽभ्युपेतः केशैः सितैर्यष्टिविषक्तहस्तः ।

भ्रूसंवृताक्षः शिथिलानताङ्गः किं विक्रियैषा प्रकृतिर्यदृच्छा ॥ ३.२८ ॥

इत्येवमुक्तः स रथप्रणेता निवेदयामास नृपात्मजाय ।

संरक्ष्यमप्यर्थमदोषदर्शी तैरेव देवैः कृतबुद्धिमोहः ॥ ३.२९ ॥

रूपस्य हन्त्री व्यसनं बलस्य शोकस्य योनिर्निधनं रतीनाम् ।

नाशः स्मृतीनां रिपुरिन्द्रियाणामेषा जरा नाम ययैष भग्नः ॥ ३.३० ॥

पीतं ह्यनेनापि पयः शिशुत्वे कालेन भूयः परिसृप्तमुर्व्याम् ।

क्रमेण भूत्वा च युवा वपुष्मान्क्रमेण तेनैव जरामुपेतः ॥ ३.३१ ॥

इत्येवमुक्ते चलितः स किंचिद्राजात्मजः सूतमिदं बभाषे ।

किमेष दोषो भविता ममापीत्यस्मै ततः सारथिरभ्युवाच ॥ ३.३२ ॥

आयुष्मतोऽप्येष वयःप्रकर्षो निःसंशयं कालवशेन भावी ।

एवं जरां रूपविनाशयित्रीं जानाति चैवेच्छति चैव लोकः ॥ ३.३३ ॥

ततः स पूर्वाशयशुद्धबुद्धिर्विस्तीर्णकल्पाचितपुण्यकर्मा ।

श्रुत्वा जरां संविविजे महात्मा महाशनेर्घोषमिवान्तिके गौः ॥ ३.३४ ॥

निःश्वस्य दीर्घं स्वशिरः प्रकम्प्य तस्मिंश्च जीर्णे विनिवेश्य चक्षुः ।

तां चैव दृष्ट्वा जनतां सहर्षां वाक्यं स संविग्न इदं जगाद ॥ ३.३५ ॥

एवं जरा हन्ति च निर्विशेषं स्मृतिं च रूपं च पराक्रमं च ।

न चैव संवेगमुपैति लोकः प्रत्यक्षतोऽपीदृशमीक्षमाणः ॥ ३.३६ ॥

एवं गते सूत निवर्तयाश्वान्शीघ्रं गृहाण्येव भवान्प्रयातु ।

उद्यानभूमौ हि कुतो रतिर्मे जराभये चेतसि वर्तमाने ॥ ३.३७ ॥

अथाज्ञया भर्तृसुतस्य तस्य निवर्तयामास रथं नियन्ता ।

ततः कुमारो भवनं तदेव चिन्तावशः शून्यमिव प्रपेदे ॥ ३.३४ ॥

…

# अश्वघोषविरचिते
# बुद्धचरिते महाकाव्ये
# संवेगोत्पत्तिर्नाम तृतीयः सर्गः ।

...

कीर्णं तथा राजपथं कुमारः पौरैर्विनीतैः शुचिधीरवेषैः ।
तत्पूर्वमालोक्य जहर्ष किंचिन्मेने पुनर्भावमिवात्मनश्च ॥ ३.२५ ॥

पुरं तु तत्स्वर्गमिव प्रहृष्टं शुद्धाधिवासाः समवेक्ष्य देवाः ।
जीर्णं नरं निर्ममिरे प्रयातुं संचोदनार्थं क्षितिपात्मजस्य ॥ ३.२६ ॥

ततः कुमारो जरयाभिभूतं दृष्ट्वा नरेभ्यः पृथगाकृतिं तम् ।
उवाच संग्राहकमागतास्थस्तत्रैव निष्कम्पनिविष्टदृष्टिः ॥ ३.२७ ॥

क एष भोः सूत नरोऽभ्युपेतः केशैः सितैर्यष्टिविषक्तहस्तः ।
भ्रूसंवृताक्षः शिथिलानताङ्गः किं विक्रियैषा प्रकृतिर्यदृच्छा ॥ ३.२८ ॥

इत्येवमुक्तः स रथप्रणेता निवेदयामास नृपात्मजाय ।
संरक्ष्यमप्यर्थमदोषदर्शी तैरेव देवैः कृतबुद्धिमोहः ॥ ३.२९ ॥

रूपस्य हन्त्री व्यसनं बलस्य शोकस्य योनिर्निधनं रतीनाम् ।
नाशः स्मृतीनां रिपुरिन्द्रियाणामेषा जरा नाम ययैष भग्नः ॥ ३.३० ॥

पीतं ह्यनेनापि पयः शिशुत्वे कालेन भूयः परिसृप्तमुर्व्याम् ।
क्रमेण भूत्वा च युवा वपुष्मान्क्रमेण तेनैव जरामुपेतः ॥ ३.३१ ॥

इत्येवमुक्ते चलितः स किंचिद्राजात्मजः सूतमिदं बभाषे ।
किमेष दोषो भविता ममापीत्यस्मै ततः सारथिरभ्युवाच ॥ ३.३२ ॥

आयुष्मतोऽप्येष वयःप्रकर्षो निःसंशयं कालवशेन भावी ।
एवं जरां रूपविनाशयित्रीं जानाति चैवेच्छति चैव लोकः ॥ ३.३३ ॥

ततः स पूर्वाशयशुद्धबुद्धिर्विस्तीर्णकल्पाचितपुण्यकर्मा ।
श्रुत्वा जरां संविविजे महात्मा महाशनेर्घोषमिवान्तिके गौः ॥ ३.३४ ॥

निःश्वस्य दीर्घं स्वशिरः प्रकम्प्य तस्मिंश्च जीर्णे विनिवेश्य चक्षुः ।
तां चैव दृष्ट्वा जनतां सहर्षां वाक्यं स संविग्न इदं जगाद ॥ ३.३५ ॥

एवं जरा हन्ति च निर्विशेषं स्मृतिं च रूपं च पराक्रमं च ।
न चैव संवेगमुपैति लोकः प्रत्यक्षतोऽपीदृशमीक्षमाणः ॥ ३.३६ ॥

एवं गते सूत निवर्तयाश्वान्शीघ्रं गृहाण्येव भवान्प्रयातु ।
उद्यानभूमौ हि कुतो रतिर्मे जराभये चेतसि वर्तमाने ॥ ३.३७ ॥

अथाज्ञया भर्तृसुतस्य तस्य निवर्तयामास रथं नियन्ता ।
ततः कुमारो भवनं तदेव चिन्तावशः शून्यमिव प्रपेदे ॥ ३.३८ ॥

…

# 12. **Guarding the Mind**

(*Bodhicaryāvatāra*, ch. 5)

Ostensibly, the *Bodhicaryāvatāra*, composed by the eighth-century Mādhyamika monk Śāntideva, is a philosophical treatise (*śāstra*), a systematic introduction to the practice leading to awakening (*bodhicaryā*), the bodhisattva's path. Yet, the *Bodhicaryāvatāra* is also widely celebrated for its *poetic* beauty and poignant meditations on the cultivation of compassion (*karuṇā*), the mind of awakening (*bodhicitta*), and the transcendent virtues (*pāramitā*). For this reason, Śāntideva's work can also be regarded as a work of poetry (*kāvya*), in which meaning or content (*artha*) is given as much attention as style or elegant wording (*śabda*). According to tradition, more than one hundred commentaries on this work were written in India, with many more composed by Tibetan scholars, making the *Bodhicaryāvatāra* one of the most widely studied texts of late Indian Mahāyāna Buddhism.

While the thematic structure of the work would lead one to expect a fifth chapter dedicated to the first two perfections (*pāramitā*) of giving (*dāna*) and ethical discipline (*śīla*), Śāntideva discusses instead the central importance of guarding the mind at all times. In the first thirty-two verses, Śāntideva explores the futility of our attempts to control the external course of events and enjoins us to focus our efforts on guarding the mind through the cultivation of clear awareness (*saṃprajanya*) and mindfulness (*smṛti*).

# 十二、**心的守護**

摘自 *Bodhicaryāvatāra*《入菩提行論》第五品

八世紀的大乘僧侶寂天（Śāntideva）所造的《入菩提行論》是一部哲學性的論著（śāstra），系統地介紹了導向覺悟的修行（bodhicaryā），即菩薩道。《入菩提行論》也因其文辭優美，且對於悲心（karuṇā）、菩提心（bodhicitta）和波羅蜜多（pāramitā）有深刻的省思，而廣為後人傳誦。因此，《入菩提行論》也可以歸屬「美文學」（kāvya）著作，兼顧意義（artha）之豐富與辭藻（śabda）之優美。

根據傳統的記載，僅僅在印度就有一百多部關於《入菩提行論》的注釋書，還未包括西藏學者所寫的大量注釋，可見《入菩提行論》是印度晚期大乘佛教很重要的論書之一。

根據本論的架構，我們會預期第五品主要討論布施（dāna）和持戒（śīla）前兩個波羅蜜多，然而寂天卻於此處詳盡地說明了時時防護心念的重要性。本文為第五品的前三十二頌，寂天說明試圖改變外在環境只是徒勞，勸勉後學應致力防護內心，也就是應謹慎地持守正知（saṃprajanya）與正念（smṛti）。

# शान्तिदेवविरचिते

# बोधिचर्यावतारे

# संप्रजन्यरक्षणं नाम पञ्चमः परिच्छेदः ।

शिक्षां रक्षितुकामेन चित्तं रक्ष्यं प्रयत्नतः ।

न शिक्षा रक्षितुं शक्या चलं चित्तमरक्षता ॥ ५.१ ॥

अदान्ता मत्तमातङ्गा न कुर्वन्तीह तां व्यथाम् ।

करोति यामवीच्यादौ मुक्तश्चित्तमतङ्गजः ॥ ५.२ ॥

बद्धश्चेच्चित्तमातङ्गः स्मृतिरज्ज्वा समन्ततः ।

भयमस्तंगतं सर्वं कृत्स्नं कल्याणमागतम् ॥ ५.३ ॥

व्याघ्राः सिंहा गजा ऋक्षाः सर्पाः सर्वे च शत्रवः ।

सर्वे नरकपालाश्च डाकिन्यो राक्षसास्तथा ॥ ५.४ ॥

सर्वे बद्धा भवन्त्येते चित्तस्यैकस्य बन्धनात् ।

चित्तस्यैकस्य दमनात्सर्वे दान्ता भवन्ति च ॥ ५.५ ॥

यस्माद्भयानि सर्वाणि दुःखान्यप्रमितानि च ।

चित्तादेव भवन्तीति कथितं तत्त्ववादिना ॥ ५.६ ॥

शस्त्राणि केन नरके घटितानि प्रयत्नतः ।

तप्तायःकुट्टिमं केन कुतो जाताश्च ताः स्त्रियः ॥ ५.७ ॥

पापचित्तसमुद्भूतं तत्तत्सर्वं जगौ मुनिः ।

तस्मान्न कश्चित्त्रैलोक्ये चित्तादन्यो भयानकः ॥ ५.८ ॥

अदरिद्रं जगत्कृत्वा दानपारमिता यदि ।

जगद्दरिद्रमद्यापि सा कथं पूर्वतायिनाम् ॥ ५.९ ॥

फलेन सह सर्वस्वत्यागचित्ताज्ञनेऽखिले ।

दानपारमिता प्रोक्ता तस्मात्सा चित्तमेव तु ॥ ५.१० ॥

मत्स्यादयः क्व नीयन्तां मारयेयं यतो न तान् ।

लब्धे विरतिचित्ते तु शीलपारमिता मता ॥ ५.११ ॥

कियतो मारयिष्यामि दुर्जनान्गगनोपमान् ।

मारिते क्रोधचित्ते तु मारिताः सर्वशत्रवः ॥ ५.१२ ॥

भूमिं छादयितुं सर्वां कुतश्चर्म भविष्यति ।

उपानच्चर्ममात्रेण छन्ना भवति मेदिनी ॥ ५.१३ ॥

बाह्या भावा मया तद्वच्छक्या वारयितुं न हि ।

स्वचित्तं वारयिष्यामि किं ममान्यैर्निवारितैः ॥ ५.१४ ॥

सहापि वाक्शरीराभ्यां मन्दवृत्तेर्न तत्फलम् ।

यत्पटोरेककस्यापि चित्तस्य ब्रह्मतादिकम् ॥ ५.१५ ॥

जपास्तपांसि सर्वाणि दीर्घकालकृतान्यपि ।

अन्यचित्तेन मन्देन वृथैवेत्याह सर्ववित् ॥ ५.१६ ॥

दुःखं हन्तुं सुखं प्राप्तुं ते भ्रमन्ति मुधाम्बरे ।

यैरेतद्धर्मसर्वस्वं चित्तं गुह्यं न भावितम् ॥ ५.१७ ॥

तस्मात्स्वधिष्ठितं चित्तं मया कार्यं सुरक्षितम् ।

चित्तरक्षाव्रतं मुक्त्वा बहुभिः किं मम व्रतैः ॥ ५.१८ ॥

यथा चपलमध्यस्थो रक्षति व्रणमादरात् ।

एवं दुर्जनमध्यस्थो रक्षेच्चित्तव्रणं सदा ॥ ५.१९ ॥

व्रणदुःखलवाद्भीतो रक्षामि व्रणमादरात् ।

संघातपर्वताघाताद्भीतश्चित्तव्रणं न किम् ॥ ५.२० ॥

अनेन हि विहारेण विहरन्दुर्जनेष्वपि ।

प्रमदाजनमध्येऽपि यतिर्धीरो न खण्ड्यते ॥ ५.२१ ॥

लाभा नश्यन्तु मे कामं सत्कारः कायजीवितम् ।

नश्यत्वन्यच्च कुशलं मा तु चित्तं कदाचन ॥ ५.२२ ॥

चित्तं रक्षितुकामानां मयैष क्रियतेऽञ्जलिः ।

स्मृतिं च संप्रजन्यं च सर्वयत्नेन रक्षत ॥ ५.२३ ॥

व्याध्याकुलो नरो यद्वन्न क्षमः सर्वकर्मसु ।

तथाभ्यां व्याकुलं चित्तं न क्षमं सर्वकर्मसु ॥ ५.२४ ॥

असंप्रजन्यचित्तस्य श्रुतचिन्तितभावितम् ।

सच्छिद्रकुम्भजलवन्न स्मृतावनतिष्ठते ॥ ५.२५ ॥

अनेके श्रुतवन्तोऽपि श्राद्धा यत्नपरा अपि ।

असंप्रजन्यदोषेण भवन्त्यापत्तिकश्मलाः ॥ ५.२६ ॥

असंप्रजन्यचौरेण स्मृतिमोषानुसारिणा ।

उपचित्यापि पुण्यानि मुषिता यान्ति दुर्गतिम् ॥ ५.२७ ॥

क्लेशतस्करसंघोऽयमवतारगवेषकः ।

प्राप्यावतारं मुष्णाति हन्ति सद्गतिजीवितम् ॥ ५.२८ ॥

तस्मात्स्मृतिर्मनोद्वारान्नापनेया कदाचन ।

गतापि प्रत्युपस्थाप्या संस्मृत्यापायिकीं व्यथाम् ॥ ५.२९ ॥

उपाध्यायानुशासिन्या भीत्याप्यादरकारिणाम् ।

धन्यानां गुरुसंवासात्सुकरं जायते स्मृतिः ॥ ५.३० ॥

बुद्धाश्च बोधिसत्त्वाश्च सर्वत्राव्याहतेक्षणाः ।

सर्वमेवाग्रतस्तेषां तेषामस्मि पुरः स्थितः ॥ ५.३१ ॥

इति ध्यात्वा तथा तिष्ठेत्त्रपादरभयान्वितः ।

बुद्धानुस्मृतिरप्येवं भवेत्तस्य मुहुर्मुहुः ॥ ५.३२ ॥

…

# शान्तिदेवविरचिते
# बोधिचर्यावतारे
# संप्रजन्यरक्षणं नाम पञ्चमः परिच्छेदः ।

शिक्षां रक्षितुकामेन चित्तं रक्ष्यं प्रयत्नतः ।
न शिक्षा रक्षितुं शक्या चलं चित्तमरक्षता ॥ ५.१ ॥

अदान्ता मत्तमातङ्गा न कुर्वन्तीह तां व्यथाम् ।
करोति यामवीच्यादौ मुक्तश्चित्तमतङ्गजः ॥ ५.२ ॥

बद्धश्चेच्चित्तमातङ्गः स्मृतिरज्ज्वा समन्ततः ।
भयमस्तंगतं सर्वं कृत्स्नं कल्याणमागतम् ॥ ५.३ ॥

व्याघ्राः सिंहा गजा ऋक्षाः सर्पाः सर्वे च शत्रवः ।
सर्वे नरकपालाश्च डाकिन्यो राक्षसास्तथा ॥ ५.४ ॥

सर्वे बद्धा भवन्त्येते चित्तस्यैकस्य बन्धनात् ।
चित्तस्यैकस्य दमनात्सर्वे दान्ता भवन्ति च ॥ ५.५ ॥

यस्माद्भयानि सर्वाणि दुःखान्यप्रमितानि च ।
चित्तादेव भवन्तीति कथितं तत्त्ववादिना ॥ ५.६ ॥

शस्त्राणि केन नरके घटितानि प्रयत्नतः ।
तप्तायःकुट्टिमं केन कुतो जाताश्च ताः स्त्रियः ॥ ५.७ ॥

पापचित्तसमुद्भूतं तत्तत्सर्वं जगौ मुनिः ।
तस्मान्न कश्चित्त्रैलोक्ये चित्तादन्यो भयानकः ॥ ५.८ ॥

अदरिद्रं जगत्कृत्वा दानपारमिता यदि ।
जगद्दरिद्रमद्यापि सा कथं पूर्वतायिनाम् ॥ ५.९ ॥

फलेन सह सर्वस्वत्यागचित्ताज्जनेऽखिले ।
दानपारमिता प्रोक्ता तस्मात्सा चित्तमेव तु ॥ ५.१० ॥

मत्स्यादयः क्व नीयन्तां मारयेयं यतो न तान् ।
लब्धे विरतिचित्ते तु शीलपारमिता मता ॥ ५.११ ॥

कियतो मारयिष्यामि दुर्जनान्गगनोपमान् ।
मारिते क्रोधचित्ते तु मारिताः सर्वशत्रवः ॥ ५.१२ ॥

भूमिं छादयितुं सर्वां कुतश्चर्म भविष्यति ।
उपानच्चर्ममात्रेण छन्ना भवति मेदिनी ॥ ५.१३ ॥

बाह्या भावा मया तद्वच्छक्या वारयितुं न हि ।
स्वचित्तं वारयिष्यामि किं ममान्यैर्निवारितैः ॥ ५.१४ ॥

सहापि वाक्शरीराभ्यां मन्दवृत्तेर्न तत्फलम् ।
यत्पटोरेककस्यापि चित्तस्य ब्रह्मतादिकम् ॥ ५.१५ ॥

जपास्तपांसि सर्वाणि दीर्घकालकृतान्यपि ।
अन्यचित्तेन मन्देन वृथैवेत्याह सर्ववित् ॥ ५.१६ ॥

दुःखं हन्तुं सुखं प्राप्तुं ते भ्रमन्ति मुधाम्बरे ।
यैरेतद्धर्मसर्वस्वं चित्तं गुह्यं न भावितम् ॥ ५.१७ ॥

तस्मात्स्वधिष्ठितं चित्तं मया कार्यं सुरक्षितम् ।
चित्तरक्षाव्रतं मुक्त्वा बहुभिः किं मम व्रतैः ॥ ५.१८ ॥

यथा चपलमध्यस्थो रक्षति व्रणमादरात् ।
एवं दुर्जनमध्यस्थो रक्षेच्चित्तव्रणं सदा ॥ ५.१९ ॥

व्रणदुःखलवाद्भीतो रक्षामि व्रणमादरात् ।
संघातपर्वताघाताद्भीतश्चित्तव्रणं न किम् ॥ ५.२० ॥

अनेन हि विहारेण विहरन्दुर्जनेष्वपि ।
प्रमदाजनमध्येऽपि यतिर्धीरो न खण्ड्यते ॥ ५.२१ ॥

लाभा नश्यन्तु मे कामं सत्कारः कायजीवितम् ।
नश्यत्वन्यच्च कुशलं मा तु चित्तं कदाचन ॥ ५.२२ ॥

चित्तं रक्षितुकामानां मयैष क्रियतेऽञ्जलिः ।
स्मृतिं च संप्रजन्यं च सर्वयत्नेन रक्षत ॥ ५.२३ ॥

व्याध्याकुलो नरो यद्वन्न क्षमः सर्वकर्मसु ।
तथाभ्यां व्याकुलं चित्तं न क्षमं सर्वकर्मसु ॥ ५.२४ ॥

असंप्रजन्यचित्तस्य श्रुतचिन्तितभावितम् ।
सच्छिद्रकुम्भजलवन्न स्मृतावववतिष्ठते ॥ ५.२५ ॥

अनेके श्रुतवन्तोऽपि श्राद्धा यत्नपरा अपि ।
असंप्रजन्यदोषेण भवन्त्यापत्तिकश्मलाः ॥ ५.२६ ॥

असंप्रजन्यचौरेण स्मृतिमोषानुसारिणा ।
उपचित्यापि पुण्यानि मुषिता यान्ति दुर्गतिम् ॥ ५.२७ ॥

क्लेशतस्करसंघोऽयमवतारगवेषकः ।
प्राप्यावतारं मुष्णाति हन्ति सद्गतिजीवितम् ॥ ५.२८ ॥

तस्मात्स्मृतिर्मनोद्वारान्नापनेया कदाचन ।
गतापि प्रत्युपस्थाप्या संस्मृत्यापायिकीं व्यथाम् ॥ ५.२९ ॥

उपाध्यायानुशासिन्या भीत्याप्यादरकारिणाम् ।
धन्यानां गुरुसंवासात्सुकरं जायते स्मृतिः ॥ ५.३० ॥

बुद्धाश्च बोधिसत्त्वाश्च सर्वत्राव्याहतेक्षणाः ।
सर्वमेवाग्रतस्तेषां तेषामस्मि पुरः स्थितः ॥ ५.३१ ॥

इति ध्यात्वा तथा तिष्ठेत्त्रपादरभयान्वितः ।
बुद्धानुस्मृतिरप्येवं भवेत्तस्य मुहुर्मुहुः ॥ ५.३२ ॥

…

# 13. **The Practice of Forbearance**

(*Bodhicaryāvatāra*, ch. 6)

Starting with the sixth chapter of the *Bodhicaryāvatāra*, Śāntideva dedicates a complete chapter to each of the last four perfections (*pāramitā*) of the bodhisattva's practice, i.e., forbearance or patience (*kṣānti*), zeal (*vīrya*), meditation (*dhyāna*), and wisdom (*prajñā*). The first twenty-one verses of the sixth chapter stress the importance of cultivating the kind of stoicism or mental fortitude that allows one to remain composed when faced with the vicissitudes of life, a quality referred to elsewhere as the *duḥkhādhivāsanākṣānti*. This forbearance is shown to be the antidote (*pratikāra*) to the singularly destructive emotions of anger (*krodha*) and hatred or aversion (*dveṣa*), conditioned responses arising from our inability to remain equanimous in challenging circumstances.

# 十三、**忍辱的修習**

摘自 *Bodhicaryāvatāra*《入菩提行論》第六品

寂天在《入菩提行論》第六品至第九品的四品中，順次論述了忍辱（kṣānti）、精進（vīrya）、禪定（dhyāna）、智慧（prajñā）等四個波羅蜜多（pāramitā）。本文為第六品的前二十一頌，文中詳述思惟瞋恚的過失和忍辱的功德，並強調應力勵修習「安受眾苦忍」（duḥkhādhivāsanākṣānti），即忍受寒熱飢渴等種種苦的能力，不爲一切苦難所動搖。此中，忍辱被視為對治忿怒（krodha）及瞋恚（dveṣa）這兩種破壞性情緒的方法（pratikāra）。

# शान्तिदेवविरचिते

# बोधिचर्यावतारे

# क्षान्तिपारमिता नाम षष्ठः परिच्छेदः ।

सर्वमेतत्सुचरितं दानं सुगतपूजनम् ।

कृतं कल्पसहस्रैर्यत्प्रतिघः प्रतिहन्ति तत् ॥ ६.१ ॥

न च द्वेषसमं पापं न च क्षान्तिसमं तपः ।

तस्मात्क्षान्तिं प्रयत्नेन भावयेद्विविधैर्नयैः ॥ ६.२ ॥

मनः शमं न गृह्णाति न प्रीतिसुखमश्नुते ।

न निद्रां न धृतिं याति द्वेषशल्ये हृदि स्थिते ॥ ६.३ ॥

पूजयत्यर्थमानैर्यान्येऽपि चैनं समाश्रिताः ।

तेऽप्येनं हन्तुमिच्छन्ति स्वामिनं द्वेषदुर्भगम् ॥ ६.४ ॥

सुहृदोऽप्युद्विजन्तेऽस्माद्ददाति न च सेव्यते ।

संक्षेपान्नास्ति तत्किंचित्क्रोधनो येन सुस्थितः ॥ ६.५ ॥

एवमादीनि दुःखानि करोतीत्यरिसंज्ञया ।

यः क्रोधं हन्ति निर्बन्धात्स सुखीह परत्र च ॥ ६.६ ॥

अनिष्टकरणाज्जातमिष्टस्य च विघातनात् ।

दौर्मनस्याशनं प्राप्य द्वेषो दृप्तो निहन्ति माम् ॥ ६.७ ॥

तस्माद्विघातयिष्यामि तस्याशनमहं रिपोः ।

यस्मान्न मद्वधादन्यत्कृत्यमस्यास्ति वैरिणः ॥ ६.८ ॥

अत्यनिष्टागमेनापि न क्षोभ्या मुदिता मया ।

दौर्मनस्येऽपि नास्तीष्टं कुशलं त्ववहीयते ॥ ६.९ ॥

यद्यस्त्येव प्रतीकारो दौर्मनस्येन तत्र किम् ।

अथ नास्ति प्रतीकारो दौर्मनस्येन तत्र किम् ॥ ६.१० ॥

दुःखं न्यक्कारपारुष्यमयशश्चेत्यनीप्सितम् ।

प्रियाणामात्मनो वापि शत्रोश्चैतद्विपर्ययात् ॥ ६.११ ॥

कथंचिल्लभ्यते सौख्यं दुःखं स्थितमयत्नतः ।

दुःखेनैव च निःसारश्चेतस्तस्माद्दृढीभव ॥ ६.१२ ॥

दुर्गापुत्रककर्णाटा दाहच्छेदादिवेदनाम् ।

वृथा सहन्ते मुक्त्यर्थमहं कस्मात्तु कातरः ॥ ६.१३ ॥

न किंचिदस्ति तद्वस्तु यदभ्यासस्य दुष्करम् ।

तस्मान्मृदुव्यथाभ्यासात्सोढव्यापि महाव्यथा ॥ ६.१४ ॥

उद्दंशदंशमशकक्षुत्पिपासादिवेदनाम् ।

महत्कण्ड्वादिदुःखं च किमनर्थं न पश्यसि ॥ ६.१५ ॥

शीतोष्णवृष्टिवाताध्वव्याधिबन्धनताडनैः ।

सौकुमार्यं न कर्तव्यमन्यथा वर्धते व्यथा ॥ ६.१६ ॥

केचित्स्वशोणितं दृष्ट्वा विक्रमन्ते विशेषतः ।

परशोणितमप्येके दृष्ट्वा मूर्छां व्रजन्ति यत् ॥ ६.१७ ॥

तच्चित्तस्य दृढत्वेन कातरत्वेन चागतम् ।

दुःखदुर्योधनस्तस्माद्भवेदभिभवेद्व्यथाम् ॥ ६.१८ ॥

दुःखेऽपि नैव चित्तस्य प्रसादं क्षोभयेद्बुधः ।

संग्रामो हि सह क्लेशैर्युद्धे च सुलभा व्यथा ॥ ६.१९ ॥

उरसारातिघातान्ये प्रतीच्छन्तो जयन्त्यरीन् ।

ते ते विजयिनः शूराः शेषास्तु मृतमारकाः ॥ ६.२० ॥

गुणोऽपरश्च दुःखस्य यत्संवेगान्मदच्युतिः ।

संसारिषु च कारुण्यं पापाद्भीतिर्जिने स्पृहा ॥ ६.२१ ॥

…

# शान्तिदेवविरचिते
# बोधिचर्यावतारे
# क्षान्तिपारमिता नाम षष्ठः परिच्छेदः ।

सर्वमेतत्सुचरितं दानं सुगतपूजनम् ।
कृतं कल्पसहस्रैर्यत्प्रतिघः प्रतिहन्ति तत् ॥ ६.१ ॥

न च द्वेषसमं पापं न च क्षान्तिसमं तपः ।
तस्मात्क्षान्तिं प्रयत्नेन भावयेद्विविधैर्नयैः ॥ ६.२ ॥

मनः शमं न गृह्णाति न प्रीतिसुखमश्नुते ।
न निद्रां न धृतिं याति द्वेषशल्ये हृदि स्थिते ॥ ६.३ ॥

पूजयत्यर्थमानैर्यान्येऽपि चैनं समाश्रिताः ।
तेऽप्येनं हन्तुमिच्छन्ति स्वामिनं द्वेषदुर्भगम् ॥ ६.४ ॥

सुहृदोऽप्युद्विजन्तेऽस्माद्ददाति न च सेव्यते ।
संक्षेपान्नास्ति तत्किंचित्क्रोधनो येन सुस्थितः ॥ ६.५ ॥

एवमादीनि दुःखानि करोतीत्यरिसंज्ञया ।
यः क्रोधं हन्ति निर्बन्धात्स सुखीह परत्र च ॥ ६.६ ॥

अनिष्टकरणाज्जातमिष्टस्य च विघातनात् ।
दौर्मनस्याशनं प्राप्य द्वेषो दृप्तो निहन्ति माम् ॥ ६.७ ॥

तस्माद्विघातयिष्यामि तस्याशनमहं रिपोः ।
यस्मान्न मद्वधादन्यत्कृत्यमस्यास्ति वैरिणः ॥ ६.८ ॥

अत्यनिष्टागमेनापि न क्षोभ्या मुदिता मया ।
दौर्मनस्येऽपि नास्तीष्टं कुशलं त्ववहीयते ॥ ६.९ ॥

यद्यस्त्येव प्रतीकारो दौर्मनस्येन तत्र किम् ।
अथ नास्ति प्रतीकारो दौर्मनस्येन तत्र किम् ॥ ६.१० ॥

दुःखं न्यक्कारपारुष्यमयशश्चेत्यनीप्सितम् ।
प्रियाणामात्मनो वापि शत्रोश्चैतद्विपर्ययात् ॥ ६.११ ॥

कथंचिल्लभ्यते सौख्यं दुःखं स्थितमयत्नतः ।
दुःखेनैव च निःसारश्चेतस्तस्माद्दृढीभव ॥ ६.१२ ॥

दुर्गापुत्रककर्णाटा दाहच्छेदादिवेदनाम् ।
वृथा सहन्ते मुक्त्यर्थमहं कस्मात्तु कातरः ॥ ६.१३ ॥

न किंचिदस्ति तद्वस्तु यदभ्यासस्य दुष्करम् ।
तस्मान्मृदुव्यथाभ्यासात्सोढव्यापि महाव्यथा ॥ ६.१४ ॥

उद्दंशदंशमशकक्षुत्पिपासादिवेदनाम् ।
महत्कण्ड्वादिदुःखं च किमनर्थं न पश्यसि ॥ ६.१५ ॥

शीतोष्णवृष्टिवाताध्वव्याधिबन्धनताडनैः ।
सौकुमार्यं न कर्तव्यमन्यथा वर्धते व्यथा ॥ ६.१६ ॥

केचित्स्वशोणितं दृष्ट्वा विक्रमन्ते विशेषतः ।
परशोणितमप्येके दृष्ट्वा मूर्छां व्रजन्ति यत् ॥ ६.१७ ॥

तच्चित्तस्य दृढत्वेन कातरत्वेन चागतम् ।
दुःखदुर्योधनस्तस्माद्भवेदभिभवेद्व्यथाम् ॥ ६.१८ ॥

दुःखेऽपि नैव चित्तस्य प्रसादं क्षोभयेद्बुधः ।
संग्रामो हि सह क्लेशैर्युद्धे च सुलभा व्यथा ॥ ६.१९ ॥

उरसारातिघातान्ये प्रतीच्छन्तो जयन्त्यरीन् ।
ते ते विजयिनः शूराः शेषास्तु मृतमारकाः ॥ ६.२० ॥

गुणोऽपरश्च दुःखस्य यत्संवेगान्मदच्युतिः ।
संसारिषु च कारुण्यं पापाद्भीतिर्जिने स्पृहा ॥ ६.२१ ॥

…

# 14. **Emptiness and the Four Noble Truths**

(*Mūlamadhyamakakārikā*, ch. 24)

In his seminal *Mūlamadhyamakakārikā*, the great Buddhist philosopher Nāgārjuna propounds the emptiness (*śūnyatā*) or insubstantiality (*niḥsvabhāvatā*) of all things, including the Buddha himself and his teaching. Some of Nāgārjuna's coreligionists must have considered that this radical and ostensibly nihilistic doctrine undermined the very possibility of liberation as laid out in the Buddha's central teaching on the Four Noble Truths (*catur āryasatya*). In the first six verses of the twenty-fourth chapter, Nāgārjuna voices this objection, before refuting it, in good Mādhyamika fashion, by turning the tables on his philosophical opponents, showing the absurdity of ascribing to various Buddhist categories any sort of inherent existence or intrinsic nature (*svabhāva*), which he defines as axiomatically non-fabricated (*akṛtrima*), non-dependent on anything else (*nirapekṣa paratra*), without cause or conditions (*ahetupratyaya*), and permanent (*nitya*).

Nāgārjuna's magnum opus is written in *kārikās* or "memorial verses", the preferred style for philosophical literature (*śāstra*) in India. These verse-treatises are typically read alongside a commentary in prose, sometimes written by the author himself, or under the guidance of a teacher capable of elucidating the pithy, and not uncommonly cryptic, verses. While Nāgārjuna's line of reasoning throughout the twenty-fourth chapter remains remarkably intelligible, students should try to consult the *Prasannapadā* ("Clear-Worded"), an important commentary (*vṛtti*) written by the 7th century Madhyamaka scholar Candrakīrti.

# 十四、**空性與四聖諦**

*Mūlamadhyamakakārikā*《中論》第二十四品

龍樹（Nāgārjuna）在其最重要的論作《中論》中，闡述了空性（śūnyatā）的思想，即主張一切事物沒有實體（niḥsvabhāva），甚至包括佛陀及其教法。由第二十四品可知，龍樹當時，或許佛教諸多論師認為這種學說否定了依四聖諦（catur āryasatya）修行而得解脫的可能性。對於論敵的問難，龍樹採取的主要破斥方式為基於論敵的主張進行推導，歸結出論敵主張的謬誤，而指出壞四諦、破三寶等等是主張諸法有「自性」（svabhāva）所必然導致的過失。自性為事物常住不變的本性，龍樹在《中論》說明自性為非造作的（akṛtrima）、不依賴其他事物的（nirapekṣa paratra）、無因緣的（ahetupratyaya）且恆常不變的（nitya）。

《中論》是以「論頌」（kārikā）的形式書寫，這是印度哲學論著的主要形式。這些論頌通常需要與散文注釋一起閱讀，或者經老師指導，解讀這些精簡而隱晦的頌文。值得注意的是，即使沒有注釋的幫助，龍樹在第二十四章的論述脈絡仍然是清晰可解的，但讀者應該盡可能參考由七世紀中觀論師月稱（Candrakīrti）所撰的注釋書（vṛtti）《淨明句論》（*Prasannapadā*）。

# नागार्जुनविरचितायां

# मूलमध्यमककारिकायाम्

# आर्यसत्यपरीक्षा नाम चतुर्विंशतितमं प्रकरणं ।

यदि शून्यमिदं सर्वमुदयो नास्ति न व्ययः ।

चतुर्णामार्यसत्यानामभावस्ते प्रसज्यते ॥ २४.१ ॥

परिज्ञा च प्रहाणं च भावना साक्षिकर्म च ।

चतुर्णामार्यसत्यानामभावान्नोपपद्यते ॥ २४.२ ॥

तदभावान्न विद्यन्ते चत्वार्यार्यफलानि च ।

फलाभावे फलस्था नो न सन्ति प्रतिपन्नकाः ॥ २४.३ ॥

संघो नास्ति न चेत्सन्ति तेऽष्टौ पुरुषपुद्गलाः ।

अभावाच्चार्यसत्यानां सद्धर्मोऽपि न विद्यते ॥ २४.४ ॥

धर्मे चासति संघे च कथं बुद्धो भविष्यति ।

एवं त्रीण्यपि रत्नानि ब्रुवाणः प्रतिबाधसे ॥ २४.५ ॥

शून्यतां फलसद्भावमधर्मं धर्ममेव च ।

सर्वसंव्यवहारांश्च लौकिकान्प्रतिबाधसे ॥ २४.६ ॥

अत्र ब्रूमः शून्यतायां न त्वं वेत्सि प्रयोजनम् ।

शून्यतां शून्यतार्थं च तत एवं विहन्यसे ॥ २४.७ ॥

द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना ।

लोकसंवृतिसत्यं च सत्यं च परमार्थतः ॥ २४.८ ॥

येऽनयोर्न विजानन्ति विभागं सत्ययोर्द्वयोः ।

ते तत्त्वं न विजानन्ति गम्भीरं बुद्धशासने ॥ २४.९ ॥

व्यवहारमनाश्रित्य परमार्थो न देश्यते ।

परमार्थमनागम्य निर्वाणं नाधिगम्यते ॥ २४.१० ॥

विनाशयति दुर्दृष्टा शून्यता मन्दमेधसम् ।

सर्पो यथा दुर्गृहीतो विद्या वा दुष्प्रसाधिता ॥ २४.११ ॥

अतश्च प्रत्युदावृत्तं चित्तं देशयितुं मुनेः ।

धर्मं मत्वास्य धर्मस्य मन्दैर्दुरवगाहताम् ॥ २४.१२ ॥

शून्यतायामधिलयं यं पुनः कुरुते भवान् ।

दोषप्रसङ्गो नास्माकं स शून्ये नोपपद्यते ॥ २४.१३ ॥

सर्वं च युज्यते तस्य शून्यता यस्य युज्यते ।

सर्वं न युज्यते तस्य शून्यं यस्य न युज्यते ॥ २४.१४ ॥

स त्वं दोषानात्मनीयानस्मासु परिपातयन् ।

अश्वमेवाभिरूढः सन्नश्वमेवासि विस्मृतः ॥ २४.१५ ॥

स्वभावाद्यदि भावानां सद्भावमनुपश्यसि ।

अहेतुप्रत्ययान्भावांस्त्वमेवं सति पश्यसि ॥ २४.१६ ॥

कार्यं च कारणं चैव कर्तारं करणं क्रियाम् ।

उत्पादं च निरोधं च फलं च प्रतिबाधसे ॥ २४.१७ ॥

यः प्रतीत्यसमुत्पादः शून्यतां तां प्रचक्ष्महे ।

सा प्रज्ञप्तिरुपादाय प्रतिपत्सैव मध्यमा ॥ २४.१८ ॥

अप्रतीत्य समुत्पन्नो धर्मः कश्चिन्न विद्यते ।

यस्मात्तस्मादशून्यो हि धर्मः कश्चिन्न विद्यते ॥ २४.१९ ॥

यद्यशून्यमिदं सर्वमुदयो नास्ति न व्ययः ।

चतुर्णामार्यसत्यानामभावस्ते प्रसज्यते ॥ २४.२० ॥

अप्रतीत्य समुत्पन्नं कुतो दुःखं भविष्यति ।

अनित्यमुक्तं दुःखं हि तत्स्वाभाव्ये न विद्यते ॥ २४.२१ ॥

स्वभावतो विद्यमानं किं पुनः समुदेष्यते ।

तस्मात्समुदयो नास्ति शून्यतां प्रतिबाधतः ॥ २४.२२ ॥

न निरोधः स्वभावेन सतो दुःखस्य विद्यते ।

स्वभावपर्यवस्थानान्निरोधं प्रतिबाधसे ॥ २४.२३ ॥

स्वाभाव्ये सति मार्गस्य भावना नोपपद्यते ।

अथासौ भाव्यते मार्गः स्वाभाव्यं ते न विद्यते ॥ २४.२४ ॥

यदा दुःखं समुदयो निरोधश्च न विद्यते ।

मार्गो दुःखनिरोधत्वात्कतमः प्रापयिष्यति ॥ २४.२५ ॥

स्वभावेनापरिज्ञानं यदि तस्य पुनः कथम् ।

परिज्ञानं ननु किल स्वभावः समवस्थितः ॥ २४.२६ ॥

प्रहाणसाक्षात्करणे भावना चैवमेव ते ।

परिज्ञावन्न युज्यन्ते चत्वार्यपि फलानि च ॥ २४.२७ ॥

स्वभावेनानधिगतं यत्फलं तत्पुनः कथम् ।

शक्यं समधिगन्तुं स्यात्स्वभावं परिगृह्णतः ॥ २४.२८ ॥

फलाभावे फलस्था नो न सन्ति प्रतिपन्नकाः ।

संघो नास्ति न चेत्सन्ति तेऽष्टौ पुरुषपुद्गलाः ॥ २४.२९ ॥

अभावाच्चार्यसत्यानां सद्धर्मोऽपि न विद्यते ।

धर्मे चासति संघे च कथं बुद्धो भविष्यति ॥ २४.३० ॥

अप्रतीत्यापि बोधिं च तव बुद्धः प्रसज्यते ।

अप्रतीत्यापि बुद्धं च तव बोधिः प्रसज्यते ॥ २४.३१ ॥

यश्चाबुद्धः स्वभावेन स बोधाय घटन्नपि ।

न बोधिसत्त्वचर्यायां बोधिं तेऽधिगमिष्यति ॥ २४.३२ ॥

न च धर्ममधर्मं वा कश्चिज्जातु करिष्यति ।

किमशून्यस्य कर्तव्यं स्वभावः क्रियते न हि ॥ २४.३३ ॥

विना धर्ममधर्मं च फलं हि तव विद्यते ।

धर्माधर्मनिमित्तं च फलं तव न विद्यते ॥ २४.३४ ॥

धर्माधर्मनिमित्तं वा यदि ते विद्यते फलम् ।

धर्माधर्मसमुत्पन्नमशून्यं ते कथं फलम् ॥ २४.३५ ॥

सर्वसंव्यवहारांश्च लौकिकान्प्रतिबाधसे ।

यत्प्रतीत्यसमुत्पादशून्यतां प्रतिबाधसे ॥ २४.३६ ॥

न कर्तव्यं भवेत्किंचिदनारब्धा भवेत्क्रिया ।

कारकः स्यादकुर्वाणः शून्यतां प्रतिबाधतः ॥ २४.३७ ॥

अजातमनिरुद्धं च कूटस्थं च भविष्यति ।

विचित्राभिरवस्थाभिः स्वभावे रहितं जगत् ॥ २४.३८ ॥

असंप्राप्तस्य च प्राप्तिर्दुःखपर्यन्तकर्म च।

सर्वक्लेशप्रहाणं च यद्यशून्यं न विद्यते॥ २४.३९॥

यः प्रतीत्यसमुत्पादं पश्यतीदं स पश्यति।

दुःखं समुदयं चैव निरोधं मार्गमेव च॥ २४.४०॥

आर्यसत्यपरीक्षा नाम चतुर्विंशतितमं प्रकरणं॥

# नागार्जुनविरचितायां
# मूलमध्यमककारिकायाम्
# आर्यसत्यपरीक्षा नाम चतुर्विंशतितमं प्रकरणं ।

यदि शून्यमिदं सर्वमुदयो नास्ति न व्ययः ।
चतुर्णामार्यसत्यानामभावस्ते प्रसज्यते ॥ २४.१ ॥

परिज्ञा च प्रहाणं च भावना साक्षिकर्म च ।
चतुर्णामार्यसत्यानामभावान्नोपपद्यते ॥ २४.२ ॥

तदभावान्न विद्यन्ते चत्वार्यार्यफलानि च ।
फलाभावे फलस्था नो न सन्ति प्रतिपन्नकाः ॥ २४.३ ॥

संघो नास्ति न चेत्सन्ति तेऽष्टौ पुरुषपुद्गलाः ।
अभावाच्चार्यसत्यानां सद्धर्मोऽपि न विद्यते ॥ २४.४ ॥

धर्मे चासति संघे च कथं बुद्धो भविष्यति ।
एवं त्रीण्यपि रत्नानि ब्रुवाणः प्रतिबाधसे ॥ २४.५ ॥

शून्यतां फलसद्भावमधर्मं धर्ममेव च ।
सर्वसंव्यवहारांश्च लौकिकान्प्रतिबाधसे ॥ २४.६ ॥

अत्र ब्रूमः शून्यतायां न त्वं वेत्सि प्रयोजनम् ।
शून्यतां शून्यतार्थं च तत एवं विहन्यसे ॥ २४.७ ॥

द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना ।
लोकसंवृतिसत्यं च सत्यं च परमार्थतः ॥ २४.८ ॥

येऽनयोर्न विजानन्ति विभागं सत्ययोर्द्वयोः ।
ते तत्त्वं न विजानन्ति गम्भीरं बुद्धशासने ॥ २४.९ ॥

व्यवहारमनाश्रित्य परमार्थो न देश्यते ।
परमार्थमनागम्य निर्वाणं नाधिगम्यते ॥ २४.१० ॥

विनाशयति दुर्दृष्टा शून्यता मन्दमेधसम् ।
सर्पो यथा दुर्गृहीतो विद्या वा दुष्प्रसाधिता ॥ २४.११ ॥

अतश्च प्रत्युदावृत्तं चित्तं देशयितुं मुनेः ।
धर्मं मत्वास्य धर्मस्य मन्दैर्दुरवगाहताम् ॥ २४.१२ ॥

शून्यतायामधिलयं यं पुनः कुरुते भवान् ।
दोषप्रसङ्गो नास्माकं स शून्ये नोपपद्यते ॥ २४.१३ ॥

सर्वं च युज्यते तस्य शून्यता यस्य युज्यते ।
सर्वं न युज्यते तस्य शून्यं यस्य न युज्यते ॥ २४.१४ ॥

स त्वं दोषानात्मनीयानस्मासु परिपातयन् ।
अश्वमेवाभिरूढः सन्नश्वमेवासि विस्मृतः ॥ २४.१५ ॥

स्वभावाद्यदि भावानां सद्भावमनुपश्यसि ।
अहेतुप्रत्ययान्भावांस्त्वमेवं सति पश्यसि ॥ २४.१६ ॥

कार्यं च कारणं चैव कर्तारं करणं क्रियाम् ।
उत्पादं च निरोधं च फलं च प्रतिबाधसे ॥ २४.१७ ॥

यः प्रतीत्यसमुत्पादः शून्यतां तां प्रचक्ष्महे ।
सा प्रज्ञप्तिरुपादाय प्रतिपत्सैव मध्यमा ॥ २४.१८ ॥

अप्रतीत्य समुत्पन्नो धर्मः कश्चिन्न विद्यते ।
यस्मात्तस्मादशून्यो हि धर्मः कश्चिन्न विद्यते ॥ २४.१९ ॥

यद्यशून्यमिदं सर्वमुदयो नास्ति न व्ययः ।
चतुर्णामार्यसत्यानामभावस्ते प्रसज्यते ॥ २४.२० ॥

अप्रतीत्य समुत्पन्नं कुतो दुःखं भविष्यति ।
अनित्यमुक्तं दुःखं हि तत्स्वाभाव्ये न विद्यते ॥ २४.२१ ॥

स्वभावतो विद्यमानं किं पुनः समुदेष्यते ।
तस्मात्समुदयो नास्ति शून्यतां प्रतिबाधतः ॥ २४.२२ ॥

न निरोधः स्वभावेन सतो दुःखस्य विद्यते ।
स्वभावपर्यवस्थानान्निरोधं प्रतिबाधसे ॥ २४.२३ ॥

स्वाभाव्ये सति मार्गस्य भावना नोपपद्यते ।
अथासौ भाव्यते मार्गः स्वाभाव्यं ते न विद्यते ॥ २४.२४ ॥

यदा दुःखं समुदयो निरोधश्च न विद्यते ।
मार्गो दुःखनिरोधत्वात्कतमः प्रापयिष्यति ॥ २४.२५ ॥

स्वभावेनापरिज्ञानं यदि तस्य पुनः कथम् ।
परिज्ञानं ननु किल स्वभावः समवस्थितः ॥ २४.२६ ॥

प्रहाणसाक्षात्करणे भावना चैवमेव ते ।
परिज्ञावन्न युज्यन्ते चत्वार्यपि फलानि च ॥ २४.२७ ॥

स्वभावेनानधिगतं यत्फलं तत्पुनः कथम् ।
शक्यं समधिगन्तुं स्यात्स्वभावं परिगृह्णतः ॥ २४.२८ ॥

फलाभावे फलस्था नो न सन्ति प्रतिपन्नकाः ।
संघो नास्ति न चेत्सन्ति तेऽष्टौ पुरुषपुद्गलाः ॥ २४.२९ ॥

अभावाच्चार्यसत्यानां सद्धर्मोऽपि न विद्यते ।
धर्मे चासति संघे च कथं बुद्धो भविष्यति ॥ २४.३० ॥

अप्रतीत्यापि बोधिं च तव बुद्धः प्रसज्यते ।
अप्रतीत्यापि बुद्धं च तव बोधिः प्रसज्यते ॥ २४.३१ ॥

यश्चाबुद्धः स्वभावेन स बोधाय घटन्नपि ।
न बोधिसत्त्वचर्यायां बोधिं तेऽधिगमिष्यति ॥ २४.३२ ॥

न च धर्ममधर्मं वा कश्चिज्जातु करिष्यति ।
किमशून्यस्य कर्तव्यं स्वभावः क्रियते न हि ॥ २४.३३ ॥

विना धर्ममधर्मं च फलं हि तव विद्यते ।
धर्माधर्मनिमित्तं च फलं तव न विद्यते ॥ २४.३४ ॥

धर्माधर्मनिमित्तं वा यदि ते विद्यते फलम् ।
धर्माधर्मसमुत्पन्नमशून्यं ते कथं फलम् ॥ २४.३५ ॥

सर्वसंव्यवहारांश्च लौकिकान्प्रतिबाधसे ।
यत्प्रतीत्यसमुत्पादशून्यतां प्रतिबाधसे ॥ २४.३६ ॥

न कर्तव्यं भवेत्किंचिदनारब्धा भवेत्क्रिया ।
कारकः स्यादकुर्वाणः शून्यतां प्रतिबाधतः ॥ २४.३७ ॥

अजातमनिरुद्धं च कूटस्थं च भविष्यति ।
विचित्राभिरवस्थाभिः स्वभावे रहितं जगत् ॥ २४.३८ ॥

असंप्राप्तस्य च प्राप्तिर्दुःखपर्यन्तकर्म च ।
सर्वक्लेशप्रहाणं च यद्यशून्यं न विद्यते ॥ २४.३९ ॥

यः प्रतीत्यसमुत्पादं पश्यतीदं स पश्यति ।
दुःखं समुदयं चैव निरोधं मार्गमेव च ॥ २४.४० ॥

आर्यसत्यपरीक्षा नाम चतुर्विंशतितमं प्रकरणं ॥

# 15. **Elucidating the Buddha's Teaching on Selfhood**
(*Abhidharmakośabhāṣya,* ch. 9)

The *Abhidharmakośabhāṣya*, written by the great fourth-century philosopher Vasubandhu, is arguably the most influential scholastic treatise in the history of Indian Buddhism. The work is made up of two texts: an earlier treatise composed in verse (*kārikā*) representing the positions of the Vaibhāṣika school of Abhidharma, and a prose commentary (*bhāṣya*) written by Vasubandhu himself, at a later date, from the point of view of the Sautrāntika school. A ninth chapter composed in prose called the "Refutation of the Theories of Self" (*Ātmavādapratiṣedha*) was appended to the main body of the *bhāṣya*. In this last chapter, Vasubandhu, having briefly made his case for the "selflessness" (*nairātmya*) of persons, refutes the views of the prominent Buddhist Pudgalavāda (or Vātsīputrīya) school and the non-Buddhist (*tīrthika*) Nyāya-Vaiśeṣika school.

Our text is drawn from the section of the ninth chapter in which Vasubandhu addresses the Pudgalavādins' objections to his own interpretation of the Buddha's teaching: while Vasubandhu takes the "self" to be a conceptual entity used merely to refer to particular sets or series (*saṃtāna*) of physical and mental aggregates (*skandha*), the Pudgalavādins or "Personalists" argue for the existence of a real, albeit inexpressible (*avācya*), self or person (*pudgala*) which is neither identical to nor different from the five aggregates. By postulating the existence of an agent and bearer of karmic results, the Pudgalavādins sought to provide a basis for causal continuity and personal identity persisting through the cycle of rebirths, without—in their assessment—contradicting the Buddha's teaching of no-self (*anātman*).

As is typical with polemical works of this kind, the argumentation in the ninth chapter takes the form of an imagined conversation between the opponent (*pūrvapakṣin*)—in this case, the Pudgalavādins—and the respondent (*uttarapakṣin* or *siddhāntin*), namely Vasubandhu, the author of the text. To support their views, the Pudgalavādins first adduce the Buddha's well-known refusal to answer a set of common metaphysical questions regarding the nature of the universe, personal identity, and the Tathāgata. Among this set of inquiries left undetermined (*avyākṛta*) by the Buddha was the question of whether the soul (*jīva*), another word for the self (*ātman*) or person (*pudgala*), is the same as or different from the body (*śarīra*), equated in this argument with the Buddhist notion of the five aggregates.

# 十五、**駁斥補特伽羅論者的問難**

## 摘自 *Abhidharmakośabhāṣya*《俱舍釋論》第九品

《阿毘達摩俱舍釋論》為四世紀印度論師世親（Vasubandhu）所造，可視為印度佛教史上最有影響力的阿毘達摩論書。全文由兩部分組成：第一部分是「論頌」（kārikā），由世親代表毘婆沙宗（Vaibhāṣika）的立場所撰寫；第二部分是注釋（bhāṣya），是世親本人站在經量部（Sautrāntika）的立場對論頌的說明。第九品「破我品」（*Ātmavāda-pratiṣedha*）附在注釋部分，只有長行的注釋而沒有偈頌。在此品中，世親首先簡要地論證「無我」（nairātmya），繼而破斥佛教犢子部（Vātsīputrīya）及外道正理．勝論派（Nyāya-Vaiśeṣika）等學派的我論（ātmavāda）。

本文內容為立論者（uttarapakṣin 或 siddhāntin）世親與問難者（pūrvapakṣin）犢子部論師之間的辯論：世親主張「我」是有情五蘊（skandha）相續（saṃtāna）中所安立，屬於純概念性的存在；「我」或「補特伽羅」（pudgala）只不過是五蘊身心的別名。犢子部則主張實有補特伽羅，即實有輪迴的主體，而被稱為補特伽羅論者（Pudgalavādin）。犢子部認為補特伽羅是不可言說的（avācya）「非即非離蘊我」，也就是補特伽羅與五蘊的關係，既不是合二為一，也不是相互分離。補特伽羅論者通過假定存在一個業果的承受者，來解釋因果的連續性和輪迴中的人格同一性，並認為這個「補特伽羅論」（pudgalavāda）並沒有違背佛陀的「無我」教義。

本文中，特伽羅論者為支持自己的論點，引述佛陀從來不回答「『命（jīva）』（個體或靈魂）與『身』是一是異」。這是佛陀不予以解答的形上學問題，諸如世界是不是永恆、宇宙有邊無邊、命與身的關係、如來滅後是否存在等「無記」（avyākṛta）問題。在這個論證中，犢子部所主張的「補特伽羅」相當於經中所提到的「命」，「五蘊」則相當於「身」。

# वसुबन्धुविरचितेऽभिधर्मकोशभाष्य

# आत्मवादप्रतिषेधो नाम नवमं कोशस्थानम् ।

…

यदि स्कन्धमात्रं पुद्गलः, कस्माद्भगवता स जीवस्तच्छरीरमन्यो वेति न व्याकृतम्? प्रष्टुराशयापेक्षया। स हि जीवद्रव्यमेकमन्तर्व्यापारपुरुषमधिकृत्य पृष्टवान् । स च कस्मिंश्चिन्नास्तीति कथमस्यान्यत्वमनन्यत्वं वा व्याक्रियताम्? कौर्मस्येव रोम्णोऽन्तः खरता मृदुता वा।

एष च ग्रन्थः पूर्वकैरेव निर्मोचितः। स्थविरो हि नागसेनः कलिङ्गेन राज्ञोपसंक्रम्य उक्तः—पृच्छेयमहं भदन्तम्, बहुवोल्लकाश्च श्रमणा भवन्ति। यदि यदेव पृच्छेयं तदेव व्याकुर्या इति। पृच्छेत्युक्तः पृष्टवान्—किं नु स जीवस्तच्छरीरमन्यो जीवोऽन्यच्छरीरमिति? अव्याकृतमे-

तदित्यवोचत्स्थविरः । स आह—ननु भदन्तः पूर्वमेव प्रतिज्ञां कारितो नान्यद्व्याकर्तव्यमिति? किमिदमन्यदेवोक्तमव्याकृतमेतदिति? स्थविर आह—अहमपि महाराजं पृच्छेयम्, बहुवोल्लकाश्च राजानो भवन्ति। यदि यदेव पृच्छेयं तदेव व्याकुर्या इति। पृच्छेत्युक्तः पृष्टवान्—यस्तेऽन्तःपुर आम्रवृक्षस्तस्य किमम्लानि फलान्याहोस्विन्मधुराणीति? नैव ममान्तःपुरे कश्चिदाम्रवृक्षोऽस्तीत्याह । ननु मया पूर्वमेव महाराजः प्रतिज्ञां कारितो नान्यद्व्याकर्तव्यमिति? किमिदमन्यदेवोक्तमाम्र एव नास्तीति? स आह—कथमसतो वृक्षस्य फलानामम्लतां मधुरतां वा व्याकरोमीति? एवमेव महाराज स एव जीवो नास्ति। कुतोऽस्य शरीरादन्यतामनन्यतां वा व्याकरोमीति?

कस्माद्भगवतापि नोक्तं नास्त्येवेति? प्रष्टुराशयापेक्षया। स हि यस्यापि

स्कन्धसंतानस्य जीव इत्याख्या तस्याप्यभावं प्रतीयादिति मिथ्यादृष्टिं पातितः स्यात्, प्रतीत्यसमुत्पादस्याज्ञानात्। स च तद्देशनाया अक्षमः।

इतश्चैतदेवं निश्चीयते यद्भगवतोक्तम्——अस्त्यात्मेत्यानन्द वत्ससगोत्राय परिव्राजकाय प्रश्नं पृष्टो व्याकुर्याम्, नन्वकल्पं स्याद्वचनाय सर्वधर्मा अनात्मान इति? नास्त्यात्मेत्यानन्द वत्ससगोत्राय परिव्राजकाय प्रश्नं पृष्टो व्याकुर्याम्, ननु वत्ससगोत्रः परिव्राजकः पूर्वमेव संमूढो भूयस्या मात्रया संमोहमापद्येत, अभून्म आत्मा स म एतर्हि नास्तीति? अस्त्यात्मेत्यानन्द शाश्वताय परैति, नास्त्यात्मेत्यानन्दोच्छेदाय परैतीति विस्तरः।

आह चात्र——

दृष्टिदंष्ट्रावभेदं च भ्रंशं चापेक्ष्य कर्मणाम्।

देशयन्ति जिना धर्मं व्याघ्रीपोतापहारवत् ॥

आत्मास्तित्वं ह्युपगतो भिन्नः स्याद्दृष्टिदंष्ट्रया ।

भ्रंशं कुशलपोतस्य कुर्यादप्राप्य संवृतिमिति ॥

पुनराह——

असत्त्वाद्भगवान्जीवं तत्त्वान्यत्वेन नावदत् ।

नास्तीत्यपि च नावोचन्मा भूत्प्राज्ञप्तिकोऽप्यसन् ॥

यत्र हि स्कन्धसंताने शुभाशुभफलास्तिता ।

जीवाख्या तत्र सा न स्यात्जीवनास्तित्वदेशनात् ॥

प्रज्ञप्तिमात्रं स्कन्धेषु जीव इत्यपि नावदत् ।

अभव्यः शून्यतां बोद्धुं तदानीं तादृशो जनः ॥

तथा ह्यात्मास्ति नास्तीति पृष्टो वात्सेन नावदत् ।

आशयापेक्षया प्रष्टुः सति त्वस्तीति नाह किम् ॥

…

अस्त्येव पुद्गलो यस्मात्सत्यतः स्थितितो नास्ति म आत्मेति दृष्टिस्थान-मुक्तम् । अस्तीत्यपि दृष्टिस्थानमुक्तम् । तस्मादज्ञापकमेतत् । उभयमपि त्वेतदन्तग्राहदृष्टिशाश्वतोच्छेददृष्टिसंगृहीतमित्याभिधर्मिकाः । तथैव च युक्तम्, अस्त्यात्मेत्यानन्द शाश्वताय परैति, नास्त्यात्मेत्यानन्दोच्छेदाय परैतीति वात्स्यसूत्रे वचनात् ।

यदि तर्हि पुद्गलो नास्ति, क एष संसरति? न हि संसार एष संसरतीति युक्तम् । उक्तं च भगवता—अविद्यानिवरणानां सत्त्वानां संधावतां

संसरतामिति । अथ पुद्गलः कथं संसरति? स्कन्धान्तरत्यागोपादानात् । उक्तोत्तर एष पक्षः । यथा तु क्षणिकोऽग्निः संतत्या संसरतीत्युच्यते, तथा सत्त्वाख्यः स्कन्धसमुदायस्तृष्णोपादानः संसरतीत्युच्यते ।

यदि स्कन्धमात्रमिदम्, कस्मादाह भगवान्—अहमेव स तेन कालेन तेन समयेन सुनेत्रो नाम शास्ताभूवमिति? कस्मान्न वक्तव्यं स्यात्? अन्यत्वात्स्कन्धानाम् । अथ किं पुद्गलः? स एवासौ । शाश्वतो हि स्यात् । तस्मादहमेव स इत्येकसंतानतां दर्शयति, यथा स एवाग्निर्दहन्नागत इति ।

…

# वसुबन्धुविरचितेऽभिधर्मकोशभाष्य आत्मवादप्रतिषेधो नाम नवमं कोशस्थानम् ।

…

यदि स्कन्धमात्रं पुद्गलः, कस्माद्भगवता स जीवस्तच्छरीरमन्यो वेति न व्याकृतम्? प्रष्टुराशयापेक्षया। स हि जीवद्रव्यमेकमन्तर्व्यापारपुरुषमधिकृत्य पृष्टवान् । स च कस्मिंश्चिन्नास्तीति कथमस्यान्यत्वमनन्यत्वं वा व्याक्रियताम्? कौर्मस्येव रोम्णोऽन्तः खरता मृदुता वा।

एष च ग्रन्थः पूर्वकैरेव निर्मोचितः। स्थविरो हि नागसेनः कलिङ्गेन राज्ञोपसंक्रम्य उक्तः—पृच्छेयमहं भदन्तम्, बहुवोल्लकाश्च श्रमणा भवन्ति। यदि यदेव पृच्छेयं तदेव व्याकुर्या इति। पृच्छेत्युक्तः पृष्टवान्—किं नु स जीवस्तच्छरीरमन्यो जीवोऽन्यच्छरीरमिति? अव्याकृतमेतदित्यवोचत्स्थविरः। स आह—ननु भदन्तः पूर्वमेव प्रतिज्ञां कारितो नान्यद्व्याकर्तव्यमिति? किमिदमन्यदेवोक्तमव्याकृतमेतदिति? स्थविर आह—अहमपि महाराजं पृच्छेयम्, बहुवोल्लकाश्च राजानो भवन्ति। यदि यदेव पृच्छेयं तदेव व्याकुर्या इति। पृच्छेत्युक्तः पृष्टवान्—यस्तेऽन्तःपुर आम्रवृक्षस्तस्य किमम्लानि फलान्याहोस्विन्मधुराणीति? नैव ममान्तःपुरे कश्चिदाम्रवृक्षोऽस्तीत्याह। ननु मया पूर्वमेव महाराजः प्रतिज्ञां कारितो नान्यद्व्याकर्तव्यमिति? किमिदमन्यदेवोक्तमाम्र एव नास्तीति?

स आह—कथमसतो वृक्षस्य फलानामम्लतां मधुरतां वा व्याकरोमीति? एवमेव महाराज स एव जीवो नास्ति। कुतोऽस्य शरीरादन्यतामनन्यतां वा व्याकरोमीति?

कस्माद्भगवतापि नोक्तं नास्त्येवेति? प्रष्टुराशयापेक्षया। स हि यस्यापि स्कन्धसंतानस्य जीव इत्याख्या तस्याप्यभावं प्रतीयादिति मिथ्यादृष्टिं पातितः स्यात्, प्रतीत्यसमुत्पादस्याज्ञानात्। स च तद्देशनाया अक्षमः।

इतश्चैतदेवं निश्चीयते यद्भगवतोक्तम्—अस्त्यात्मेत्यानन्द वत्ससगोत्राय परिव्राजकाय प्रश्नं पृष्टो व्याकुर्याम्, नन्वकल्पं स्याद्वचनाय सर्वधर्मा अनात्मान इति? नास्त्यात्मेत्यानन्द वत्ससगोत्राय परिव्राजकाय प्रश्नं पृष्टो व्याकुर्याम्, ननु वत्ससगोत्रः परिव्राजकः पूर्वमेव संमूढो भूयस्या मात्रया संमोहमापद्येत, अभून्म आत्मा स म एतर्हि नास्तीति? अस्त्यात्मेत्यानन्द शाश्वताय परैति, नास्त्यात्मेत्यानन्दोच्छेदाय परैतीति विस्तरः।

आह चात्र—

दृष्टिदंष्ट्रावभेदं च भ्रंशं चापेक्ष्य कर्मणाम्।
देशयन्ति जिना धर्मं व्याघ्रीपोतापहारवत्॥

आत्मास्तित्वं ह्युपगतो भिन्नः स्याद्दृष्टिदंष्ट्रया।
भ्रंशं कुशलपोतस्य कुर्यादप्राप्य संवृतिमिति॥

पुनराह—

असत्त्वाद्भगवान्जीवं तत्त्वान्यत्वेन नावदत् ।
नास्तीत्यपि च नावोचन्मा भूत्प्राज्ञप्तिकोऽप्यसन् ॥

यत्र हि स्कन्धसंताने शुभाशुभफलास्तिता ।
जीवाख्या तत्र सा न स्याज्जीवनास्तित्वदेशनात् ॥

प्रज्ञप्तिमात्रं स्कन्धेषु जीव इत्यपि नावदत् ।
अभव्यः शून्यतां बोद्धुं तदानीं तादृशो जनः ॥

तथा ह्यात्मास्ति नास्तीति पृष्टो वात्सेन नावदत् ।
आशयापेक्षया प्रष्टुः सति त्वस्तीति नाह किम् ॥

...

अस्त्येव पुद्गलो यस्मात्सत्यतः स्थितितो नास्ति म आत्मेति दृष्टिस्थानमुक्तम् । अस्तीत्यपि दृष्टिस्थानमुक्तम् । तस्मादज्ञापकमेतत् । उभयमपि त्वेतदन्तग्राहदृष्टिशाश्वतोच्छेददृष्टिसंगृहीतमित्याभिधर्मिकाः । तथैव च युक्तम्, अस्त्यात्मेत्यानन्द शाश्वताय परैति, नास्त्यात्मेत्यानन्दोच्छेदाय परैतीति वात्स्यसूत्रे वचनात् ।

यदि तर्हि पुद्गलो नास्ति, क एष संसरति? न हि संसार एष संसरतीति युक्तम् । उक्तं च भगवता—अविद्यानिवरणानां सत्त्वानां संधावतां संसरतामिति । अथ पुद्गलः कथं संसरति? स्कन्धान्तरत्यागोपादानात् । उक्तोत्तर एष पक्षः । यथा तु क्षणिकोऽग्निः संतत्या संसरतीत्युच्यते, तथा

सत्त्वाख्यः स्कन्धसमुदायस्तृष्णोपादानः संसरतीत्युच्यते।

यदि स्कन्धमात्रमिदम्, कस्मादाह भगवान्—अहमेव स तेन कालेन तेन समयेन सुनेत्रो नाम शास्ताभूवमिति? कस्मान्न वक्तव्यं स्यात्? अन्यत्वात्स्कन्धानाम्। अथ किं पुद्गलः? स एवासौ। शाश्वतो हि स्यात्। तस्मादहमेव स इत्येकसंतानतां दर्शयति, यथा स एवाग्निर्दहन्नागत इति।

…

# 16. **Refuting the Mind-Only School**

(*Bodhicaryāvatārapañjikā*, ch. 9)

The ninth chapter of the *Bodhicaryāvatāra*, composed by the eighth-century Mādhyamika master Śāntideva, is dedicated to the perfection of transcendent wisdom (*prajñāpāramitā*), which is described as the culmination of the first five perfections and the last step of the bodhisattva's path to awakening. In this chapter, Śāntideva refutes the views of a series of philosophical opponents, both Buddhist and non-Buddhist, by pointing out the inconsistencies and absurd logical consequences (*prasaṅga*) of their doctrines. The arguments take the form of a dialogue, reflecting the long-standing Indian tradition of oral debate, conducted sometimes under royal patronage or held in places like the great Buddhist university of Nālandā. A brief account of the opponent's thesis (*pūrvapakṣa*) or objection (*codya*) is first presented, followed by the author's response, along with any qualifications or rejoinders he anticipates the opponent might put forward. This ninth chapter is commonly regarded as the most important of the whole work, but also the most difficult to comprehend. Thankfully, Śāntideva's line of reasoning is made clear by the *pañjikā* or "perpetual commentary" composed by the tenth-century scholar and commentator Prajñākaramati, who provides us with detailed glosses and plainly worded paraphrases of the "root" verses (*mūla*).

Our text contains the first part of Śāntideva's refutation of the Buddhist "Mind-Only" school (Vijñānavāda or Yogācāra). While the Mādhyamikas insist that all entities are devoid of inherent existence (*svabhāva*), only existing in a conventional sense (*saṃvṛtitas*), the Yogācārins hold that the mind (*citta*)—also referred to by word such as consciousness (*vijñāna*), intellect (*buddhi*), or faulty perception (*bhrānti*)—must exist in an ultimate sense (*paramārthatas*) as the experiencer of this illusory world (*māyā*).

# 十六、**駁斥唯識論者**

摘自 *Bodhicaryāvatārapañjikā*《入菩提行論細疏》第九品

《入菩提行論》（*Bodhicaryāvatāra*）是八世紀中觀派論師寂天（Śāntideva）所造。其中第九品的主題為「般若波羅蜜多」（prajñāpāramitā），即智慧的圓滿，是布施等五波羅蜜多的上首，也是五波羅蜜多得以圓滿佛果的原因。

在這品中，寂天藉由指出論敵——佛教內部及佛教以外諸學派——所用的論理終將歸結於矛盾（prasaṅga），針對論敵提出的各式觀點逐一辯駁。其對話式論辯的模式反映了印度歷史悠久的口頭辯論傳統，或者在王室贊助下進行，或者在那爛陀（Nālandā）佛教大學等地舉行。文中，論主寂天先簡述論敵的論點（pūrvapakṣa）或問難（codya），再予

以回應。

一般而言，第九品被視為《入菩提行論》的核心、精華，但其詞句與義理卻不易理解。所幸十世紀的注釋家智作慧（Prajñākaramati）撰寫的《細疏》（pañjikā）中清楚說明了此品的論述脈絡，對論頌作出詳細的注釋。

本文內容是寂天反駁唯識論者（Vijñānavādin）的前半段。中觀派主張一切法無固有的本質（svabhāva），唯是世俗有（saṃvṛtisat），而唯識論者主張作為經驗虛幻世界（māyā）的主體——無論稱其為「心」（citta）、「識」（vijñāna）、「慧」（buddhi）或「迷」（bhrānti）——在第一義上必定是實有（paramārthasat）。

# प्रज्ञाकरमतिविरचितायां
# बोधिचर्यावतारपञ्जिकायां
# प्रज्ञापारमितापरिच्छेदो नवमः ।

…

एवं तावत्सौत्रान्तिकादिचोद्यमुदस्य योगाचारविप्रतिपत्तिनिराकरणाय तन्मतेन दूषणमुद्भावयन्नाह—यदा न भ्रान्तिरपीत्यादि ।

यदा न भ्रान्तिरप्यस्ति माया केनोपलभ्यते ॥ ९.१५ ॥

यदा सर्वं जगन्मायात्मकतया स्वभावशून्यमुपगतं मध्यमकवादिभिः, मायास्वभावसंवृतिग्राहिणी बुद्धिरपि भवतां नास्ति बाह्यवत्, तदा माया केनोपलभ्यते, केन प्रतीयते तद्ग्राहकवस्तुसज्ज्ञानमन्तरेण? नैव केनचि-

दित्यर्थः । यस्य पुनः स्वचित्तमेव परमार्थसद्ग्राह्यरूपतया भ्रान्तं तथा प्रतिभासते, न तस्यायं दोष इति भावः ॥

एतन्निराकर्तुमाह—यदा मायैवेत्यादि ।

यदा मायैव ते नास्ति तदा किमुपलभ्यते ।

यदा मायैव ग्राह्यतया हस्त्याद्याकारप्रवृत्त्या तव विज्ञानवादिनो नास्ति, चित्तमात्रं जगदभ्युपगच्छन्तो बहिरर्थाभावात्, तदा किमुपलभ्यते, तदा किमिह प्रतिभासते? बहिरर्थाभावाद्देशादिविच्छेदेन प्रतिभासो न युक्त इत्यर्थः ॥

अत्र परस्याभिप्रायमाशङ्क्यन्नाह—चित्तस्यैव स इत्यादि ।

चित्तस्यैव स आकारो यद्यप्यन्योऽस्ति तत्त्वतः ॥ ९.१६ ॥

उक्तमत्र चित्तमेव बहीरूपतया भ्रान्तं हस्त्याद्याकारं प्रतिभासत इति ॥

उक्तमेव । किं तु यद्यपि चित्तस्यैव ज्ञानस्यैव स इति देशादिविच्छेदेन ग्राह्यतया प्रतिभासमान आकारो निर्भासः, अन्य इत्यपर आन्तराद्ग्रा-हकाच्चित्ताकारात्, अस्ति विद्यते, तत्त्वतो वस्तुतः ॥

यद्यपीत्यभ्युपगम्योक्तम्, तथापि नैतत्संगच्छत इत्याह—चित्तमेव यदा मायेत्यादि ।

चित्तमेव यदा माया तदा किं केन दृश्यते ।

चित्तमेव विज्ञानमेव वेदकतया स्वीकृतम्, यदा माया नान्या, न हि वेदकचित्तव्यतिरिक्ता काचिदन्या माया नाम, तदात्मतया तस्यास्तथा प्रतिभासोपगमात्, तदा किं केन दृश्यते, किं केन प्रतीयते? दर्शनमेव हि

केवलमस्ति न दृश्यम्। दृश्यमन्तरेण दर्शनमपि न स्यात्, दृश्यापेक्षत्वात्तस्य। अतो न केनचित्किंचिद्दृश्येतेत्यान्ध्यमशेषस्य जगतः प्राप्तमिति भावः॥

ननु स्यादेवैतत्, यदि ज्ञानस्यात्मसंवेदनं न स्यात्। यावता स्वसंवेदनतया स्वरूपं संवेदयत्तदभिन्नं मायादिप्रतिभासमपि वेदयेत्। तथा च सति न काचित्क्षतिः॥ इति विज्ञानवादिनोऽभिप्रायमाशङ्क्य आह—

उक्तं चेत्यादि।

उक्तं च लोकनाथेन चित्तं चित्तं न पश्यति॥ ९.१७॥

स्वभावशून्यमेव सर्वं जगद्यदा युक्तितः प्रतिपादितम्, तदा कः कस्य स्वभावो वस्तुत इति कस्य केन वेदनं स्यात्? उक्तं च भगवता—

सर्वधर्माः शून्याः, शून्यतालक्षणं चित्तम् । सर्वधर्मा विविक्ताः, विविक्ततालक्षणं चित्तमिति ॥

किं च, उक्तं च कथितं च लोकनाथेन लोकानां सर्वसत्त्वानां नाथेन शरण्येन बुद्धेन भगवता । किमुक्तम्? चित्तं चित्तं न पश्यतीति, चित्तं स्वात्मानं न जानाति, सत्यपि वस्तुत्वे स्वात्मनि कारित्रविरोधात् । कथमिव?

न च्छिनत्ति यथात्मानमसिधारा तथा मनः ।

यथा सुतीक्ष्णाप्यसिधारा खड्गधारा तदन्यवदात्मानं स्वकायं न च्छिनत्ति न विघाटयति, स्वात्मनि क्रियाविरोधात्, तथा मनः । असि-धारावच्चित्तमपि स्वात्मानं न पश्यतीति योज्यम् । तथा हि न तदेवैकं ज्ञानं

वेद्यवेदकवेदनात्मस्वभावत्रयं युक्तम्, एकस्य निरंशस्य त्रिस्वभावता-योगात् ॥

तत्रेदमुक्तमार्यरत्नचूडसूत्रे——

स चित्तं परिगवेषमाणो नाध्यात्मं चित्तं समनुपश्यति । न बहिर्धा चित्तं समनुपश्यति । न स्कन्धेषु चित्तं समनुपश्यति । न धातुषु चित्तं समनुपश्यति । नायतनेषु चित्तं समनुपश्यति । स चित्तमसमनु-पश्यंश्चित्तधारां पर्येषते——कुतश्चित्तस्योत्पत्तिरिति । आलम्बने सति चित्तमुत्पद्यते । तत्किमन्यच्चित्तमन्यदालम्बनम्, अथ यदेवालम्बनं तदेव चित्तम्? यदि तावदन्यदालम्बनमन्यच्चित्तम्, तद्द्विचित्तता भविष्यति । अथ यदेवालम्बनं तदेव चित्तम्, तत्कथं चित्तं चित्तं पश्यति? न हि चित्तं चित्तं समनुपश्यति । तद्यथा न तयैवासिधारया

सैवासिधारा शक्यते छेत्तुम्, न तेनैवाङ्गुल्यग्रेण तदेवाङ्गुल्यग्रं स्प्रष्टुं शक्यते, एवमेव तेनैव चित्तेन तदेव चित्तं द्रष्टुमिति विस्तरः ॥

…

# प्रज्ञाकरमतिविरचितायां बोधिचर्यावतारपञ्जिकायां प्रज्ञापारमितापरिच्छेदो नवमः ।

…

एवं तावत्सौत्रान्तिकादिचोद्यमुदस्य योगाचारविप्रतिपत्तिनिराकरणाय तन्मतेन दूषणमुद्भावयन्नाह—यदा न भ्रान्तिरपीत्यादि ।

यदा न भ्रान्तिरप्यस्ति माया केनोपलभ्यते ॥ ९.१५ ॥

यदा सर्वं जगन्मायात्मकतया स्वभावशून्यमुपगतं मध्यमकवादिभिः, मायास्वभावसंवृतिग्राहिणी बुद्धिरपि भवतां नास्ति बाह्यवत्, तदा माया केनोपलभ्यते, केन प्रतीयते तद्ग्राहकवस्तुसज्ज्ञानमन्तरेण? नैव केनचि-दित्यर्थः । यस्य पुनः स्वचित्तमेव परमार्थसद्ग्राह्यरूपतया भ्रान्तं तथा प्रतिभासते, न तस्यायं दोष इति भावः ॥

एतन्निराकर्तुमाह—यदा मायैवेत्यादि ।

यदा मायैव ते नास्ति तदा किमुपलभ्यते ।

यदा मायैव ग्राह्यतया हस्त्याद्याकारप्रवृत्त्या तव विज्ञानवादिनो नास्ति, चित्तमात्रं जगदभ्युपगच्छन्तो बहिरर्थाभावात्, तदा किमुपलभ्यते, तदा किमिह प्रतिभासते? बहिरर्थाभावाद्देशादिविच्छेदेन प्रतिभासो न युक्त इत्यर्थः ॥

अत्र परस्याभिप्रायमाशङ्क्यन्नाह—चित्तस्यैव स इत्यादि ।

चित्तस्यैव स आकारो यद्यप्यन्योऽस्ति तत्त्वतः ॥ ९.१६ ॥

उक्तमत्र चित्तमेव बहीरूपतया भ्रान्तं हस्त्याद्याकारं प्रतिभासत इति ॥ उक्तमेव । किं तु यद्यपि चित्तस्यैव ज्ञानस्यैव स इति देशादिविच्छेदेन ग्राह्यतया प्रतिभासमान आकारो निर्भासः, अन्य इत्यपर आन्तराद्ग्रा-हकाच्चित्ताकारात्, अस्ति विद्यते, तत्त्वतो वस्तुतः ॥

यद्यपीत्यभ्युपगम्योक्तम्, तथापि नैतत्संगच्छत इत्याह—चित्तमेव यदा मायेत्यादि ।

चित्तमेव यदा माया तदा किं केन दृश्यते ।

चित्तमेव विज्ञानमेव वेदकतया स्वीकृतम्, यदा माया नान्या, न हि वेदकचित्तव्यतिरिक्ता काचिदन्या माया नाम, तदात्मतया तस्यास्तथा

प्रतिभासोपगमात्, तदा किं केन दृश्यते, किं केन प्रतीयते? दर्शनमेव हि केवलमस्ति न दृश्यम्। दृश्यमन्तरेण दर्शनमपि न स्यात्, दृश्यापेक्षत्वात्तस्य। अतो न केनचित्किंचिद्दृश्येतेत्यान्ध्यमशेषस्य जगतः प्राप्तमिति भावः॥

ननु स्यादेवैतत्, यदि ज्ञानस्यात्मसंवेदनं न स्यात्। यावता स्वसंवेदनतया स्वरूपं संवेदयत्तदभिन्नं मायादिप्रतिभासमपि वेदयेत्। तथा च सति न काचित्क्षतिः॥ इति विज्ञानवादिनोऽभिप्रायमाशङ्क्य आह—उक्तं चेत्यादि।

उक्तं च लोकनाथेन चित्तं चित्तं न पश्यति॥ ९.१७॥

स्वभावशून्यमेव सर्वं जगद्यदा युक्तितः प्रतिपादितम्, तदा कः कस्य स्वभावो वस्तुत इति कस्य केन वेदनं स्यात्? उक्तं च भगवता—

सर्वधर्माः शून्याः, शून्यतालक्षणं चित्तम्। सर्वधर्मा विविक्ताः, विविक्ततालक्षणं चित्तमिति॥

किं च, उक्तं च कथितं च लोकनाथेन लोकानां सर्वसत्त्वानां नाथेन शरण्येन बुद्धेन भगवता। किमुक्तम्? चित्तं चित्तं न पश्यतीति, चित्तं स्वात्मानं न जानाति, सत्यपि वस्तुत्वे स्वात्मनि कारित्रविरोधात्।

कथमिव?

न च्छिनत्ति यथात्मानमसिधारा तथा मनः।

यथा सुतीक्ष्णाप्यसिधारा खड्गधारा तदन्यवदात्मानं स्वकायं न च्छिनत्ति न विघाटयति, स्वात्मनि क्रियाविरोधात्, तथा मनः। असिधारावच्चित्तमपि स्वात्मानं न पश्यतीति योज्यम्। तथा हि न तदेवैकं ज्ञानं वेद्यवेदकवेदनात्मस्वभावत्रयं युक्तम्, एकस्य निरंशस्य त्रिस्वभावतायोगात्॥

तत्रेदमुक्तमार्यरत्नचूडसूत्रे—

स चित्तं परिगवेषमाणो नाध्यात्मं चित्तं समनुपश्यति। न बहिर्धा चित्तं समनुपश्यति। न स्कन्धेषु चित्तं समनुपश्यति। न धातुषु चित्तं समनुपश्यति। नायतनेषु चित्तं समनुपश्यति। स चित्तमसमनुपश्यंश्चित्तधारां पर्येषते—कुतश्चित्तस्योत्पत्तिरिति। आलम्बने सति चित्तमुत्पद्यते। तत्किमन्यच्चित्तमन्यदालम्बनम्, अथ यदेवालम्बनं तदेव चित्तम्? यदि तावदन्यदालम्बनमन्यच्चित्तम्, तद्द्विचित्तता भविष्यति। अथ यदेवालम्बनं तदेव चित्तम्, तत्कथं चित्तं चित्तं पश्यति? न हि चित्तं चित्तं समनुपश्यति। तद्यथा न तयैवासिधारया सैवासिधारा शक्यते छेत्तुम्, न तेनैवाङ्गुल्यग्रेण तदेवाङ्गुल्यग्रं स्प्रष्टुं

शक्यते, एवमेव तेनैव चित्तेन तदेव चित्तं द्रष्टुमिति विस्तरः ॥

…

# 17. **Defending the Mahāyāna**

(*Bodhicaryāvatārapañjikā*, ch. 9)

While systematic refutations of the Mahāyāna remain remarkably absent from non-Mahāyāna Buddhist sources, a number of Mahāyāna works, such as Nāgārjuna's *Ratnāvalī* or Vasubandhu's *Vyākhyāyukti*, include responses to attacks on the authenticity of the Mahāyāna and its scriptures. Our second text drawn from Prajñākaramati's commentary on the ninth chapter of Śāntideva's *Bodhicaryāvatāra* offers an example of such polemics.

In the second two quarters (*pāda*) of the forty-first verse, Śāntideva appeals to the authority of Mahāyāna scriptures (*āgama*), such as the *Prajñāpāramitā Sūtras*, stating that awakening (*bodhi*) is not reached without the path culminating in the realization of emptiness (*śūnyatādarśana*). Our text begins with the first two quarters of the following verse, spoken in response by the non-Mahāyānist, who do not recognize the authenticity of Mahāyāna scriptures and for whom liberation (*mukti*) is attained merely through the realization of the Four Noble Truths (*satyadarśana*).

# 十七、**辯護大乘**

摘自 *Bodhicaryāvatārapañjikā*《入菩提行論細疏》第九品

誠然在非大乘的文獻中，並無系統的理論批判大乘為非佛所說，但為數不少的大乘論著，諸如龍樹的《寶行王正論》（*Ratnāvalī*）或世親的《釋軌論》（*Vyākhyāyukti*）等，皆舉出反駁「大乘非佛說」的論證。本文選自智作慧（Prajñākaramati）所撰《入菩提行論細疏》第九品，即是此類論爭的例子之一。

在第四十一頌的後兩句（pāda）中，寂天以大乘經典為根據，主張不見空性（śūnyatā）則不能成就菩提（bodhi）。然而對非大乘人而言，解脫（mukti）是經由見四聖諦（satyadarśana）而證得。我們所選的文本從第四十二頌開始，前兩句為非大乘人對寂天所作的回應。

# प्रज्ञाकरमतिविरचितायां
# बोधिचर्यावतारपञ्जिकायां
# प्रज्ञापारमितापरिच्छेदो नवमः।

…

नन्वसिद्धं महायानं

ननु भोः शून्यतावादिन्महायानमागमत्वेन ममासिद्धमसंमतम्, तदस्योपन्यासो न साधनतया साधुः॥ अत्र परस्य समानपरिहारदूषणमाह—कथमित्यादिना।

कथं सिद्धस्त्वदागमः।

यदि महायानमसिद्धम्, कथं केन प्रकारेण त्वदीयागमो भगवद्वच-

नमिति सिद्धः? तत्र न किंचिदागमत्वप्रसाधकं प्रमाणमुत्पश्यामः ॥ परः परिहारमाह—यस्मादिति।

यस्मादुभयसिद्धोऽसौ

यस्मात्कारणादुभयस्य तव मम च सिद्ध आगमत्वेन निश्चितोऽसौ ममागमः। न हि मदागमे भवतोऽपि महायानानुयायिनो बुद्धवचनत्वेन विप्रतिपत्तिरस्ति, तस्मात्सिद्धोऽसौ। न तु महायाने मम संप्रतिपत्तिः, येनेदमेवोत्तरं भवतोऽपि स्यात् ॥ सिद्धान्तवाद्याह—

न सिद्धोऽसौ तवादितः ॥ ९.४२ ॥

इति। यद्यप्युभयसिद्धत्वं त्वदागमस्यागमसिद्धौ हेतुः, तदापि नैतद्वक्तव्यम्, असिद्धत्वात्। यस्मात्तवैव तावदसौ त्वदागमो न सिद्धः। कदा?

आदौ तत्स्वीकारात्पूर्वम् । न ह्यभ्युपगमात्प्राक्तव कथंचिदप्यसौ सिद्ध इत्युभयसिद्धत्वमसिद्धत्वादसाधनम् ॥

यद्यप्युभयसिद्धत्वमसिद्धम्, इदं तर्हि साधनमस्तु—यद्गुरुशिष्यपरंपरयाम्नायायातं बुद्धवचनत्वेन, यच्च सूत्रेऽवतरति, विनये संदृश्यते, धर्मतां च न विलोमयति, तद्बुद्धवचनं नान्यदिति । अत्राह—यत्प्रत्ययेत्यादि ।

यत्प्रत्यया च तत्रास्था महायानेऽपि तां कुरु ।

यः प्रत्ययो निबन्धनमस्या आस्थायाः, सा तथोक्ता । यत्प्रत्यया यन्निबन्धना । आस्था आदेयता आदरः । तत्र स्वागमे । तां तत्प्रत्ययामास्थामिह महायानेऽपि कुरु विधेहि, महायानेऽप्युक्तस्यास्थाकारणस्य विद्यमानत्वात् ॥

इदं पुनः सर्वप्रवचनसाधारणमव्यभिचारि लक्षणं यदुक्तमध्याशयसं-चोदनसूत्रे——

अपि तु मैत्रेय चतुर्भिः कारणैः प्रतिभानं सर्वबुद्धभाषितं वेदितव्यम्। कतमैश्चतुर्भिः? इह मैत्रेय प्रतिभानमर्थोपसंहितं भवति नानर्थोपसं-हितम्। धर्मोपसंहितं भवति नाधर्मोपसंहितम्। क्लेशप्रहायकं भवति न क्लेशविवर्धकम्। निर्वाणगुणानुशंससंदर्शकं भवति न संसारगुणा-नुशंससंदर्शकम्। एतैश्चतुर्भिः पेयालं॥ यस्य कस्यचिन्मैत्रेय एतैश्चतु-र्भिः प्रतिभाति प्रतिभास्यति वा, तत्र श्राद्धैः कुलपुत्रैः कुलदुहि-तृभिर्वा बुद्धसंज्ञोत्पादयितव्या। शास्तृसंज्ञां कृत्वा स धर्मः श्रोतव्यः। तत्कस्य हेतोः? यत्किंचिन्मैत्रेय सुभाषितं सर्वं तद्बुद्धभाषितम्। तत्र मैत्रेय य इमानि प्रतिभानानि प्रतिक्षिपेत्, नैतानि बुद्धभाषितानीति,

तेषु चागौरवमुत्पादयेत्पुद्गलविद्वेषेण, तेन सर्वं बुद्धभाषितं प्रतिभानं प्रतिक्षिप्तं भवति। धर्मं प्रतिक्षिप्य धर्मव्यसनसंवर्तनीयेन कर्मणापायगामी भवति॥

तदत्र धर्मताया अविलोमनमेव सम्यग्लक्षणमुक्तम्। उक्तं च—

यदर्थवद्धर्मपदोपसंहितं त्रिधातुसंक्लेशनिबर्हणं वचः।
भवेच्च यच्छान्त्यनुशंसदर्शकं तदुक्तमार्षं विपरीतमन्यथा॥

इति। एतन्महायाने सर्वमस्तीति कथमुपादेयं न स्यात्?

यदुक्तं न सिद्धोऽसौ तवादित इति, तत्र परो विशेषमभिधत्ते—न ब्रवीमि यदावयोर्द्वयोः सिद्धमुभयसिद्धमिति, किं तर्ह्यावाभ्यामन्येषामुभयेषां मदागमः सिद्ध इत्युपादेयः, न महायानम्, एतद्विपरीतत्वात्। तेन

नोपादेयमित्याह—अन्योभयेष्टेत्यादि।

अन्योभयेष्टसत्यत्वे वेदादेरपि सत्यता ॥ ९.४३ ॥

यद्वावयोर्विवादारूढत्वादावाभ्यामन्ये ये केचिदप्रतिपन्ना उभये, तेषामिष्टमभिमतम्, संमतमिति यावत्। तस्य सत्यत्वे यथार्थत्वेऽभ्युपगम्यमाने सति, वेदादेरपि सत्यता वेदवाक्यस्य चोदनालक्षणस्य। आदिशब्दात्कणादादिवचनस्यापि। सत्यतामृषार्थता स्यात्। तत्रापि वादिप्रतिवादिभ्यामन्योभयसंमतिः संभाव्यत इति तदप्युपादेयं भवतः स्यात्। तस्मान्नायमपि विशेषः॥

अथापि स्यात्—मदागमे बुद्धवचनत्वेऽविवादः, न तु महायाने। तेन स उपादेयो नेतरदित्याशङ्कयन्नाह—सविवादं महायानमित्यादि।

सविवादं महायानमिति चेदागमं त्यज ।

तीर्थिकैः सविवादत्वात्स्वैः परैश्चागमान्तरम् ॥ ९.४४ ॥

सविवादं सविप्रतिपत्तिकं महायानम् । केचिद्बुद्धवचनतया प्रवृत्त्यङ्गमिच्छन्ति, केचित्तद्विपरीतसमारोपान्नेच्छन्ति, इति हेतोः, चेद्यदि न ग्राह्यम्, तदागमं त्यज, स्वागममपि विजहीहि, सोऽपि प्रवृत्त्यङ्गं न स्यात् । कस्मात्? तीर्थिकैर्मीमांसकादिभिः सविवादत्वात्विप्रतिपत्तिसंभवात्परित्यागमर्हति ।

न केवलं तीर्थिकैः, अपि तु स्वयूथ्यैरित्याह—स्वैरिति । चतुर्निकायमष्टादशभेदभिन्नं भगवतः शासनम् । तत्रैकस्यैव निकायस्यानेकभेदसंभवात्स्वयूथ्यैरपि परस्परविवादः संभवति । स्वैरिति स्वनिकायान्तर्गतभे-

दान्तरावस्थितैः। परैरित्यन्यनिकायव्यवस्थितैः।

चकारः पूर्वापेक्षया समुच्चयार्थः। सविवादत्वादागमान्तरं त्यजेति संबन्धः। त्वदभ्युपगतादागमादन्य आगम आगमान्तरम्। तदपि सविवादत्वान्न स्वीकारमर्हति।

त्वदागमस्याप्यपरापेक्षया सविवादत्वं समानमिति परित्यागे तुल्य एव न्यायः।

...

# प्रज्ञाकरमतिविरचितायां बोधिचर्यावतारपञ्जिकायां प्रज्ञापारमितापरिच्छेदो नवमः ।

…

नन्वसिद्धं महायानं

ननु भोः शून्यतावादिन्महायानमागमत्वेन ममासिद्धमसंमतम्, तदस्योपन्यासो न साधनतया साधुः ॥ अत्र परस्य समानपरिहारदूषणमाह—कथमित्यादिना ।

कथं सिद्धस्त्वदागमः ।

यदि महायानमसिद्धम्, कथं केन प्रकारेण त्वदीयागमो भगवद्वचनमिति सिद्धः? तत्र न किंचिदागमत्वप्रसाधकं प्रमाणमुत्पश्यामः ॥ परः परिहारमाह—यस्मादिति ।

यस्मादुभयसिद्धोऽसौ

यस्मात्कारणादुभयस्य तव मम च सिद्ध आगमत्वेन निश्चितोऽसौ ममागमः । न हि मदागमे भवतोऽपि महायानानुयायिनो बुद्धवचनत्वेन विप्रतिपत्तिरस्ति, तस्मात्सिद्धोऽसौ । न तु महायाने मम संप्रतिपत्तिः,

येनेदमेवोत्तरं भवतोऽपि स्यात् ॥ सिद्धान्तवाद्याह—

न सिद्धोऽसौ तवादितः ॥ ९.४२ ॥

इति। यद्यप्युभयसिद्धत्वं त्वदागमस्यागमसिद्धौ हेतुः, तदापि नैतद्वक्तव्यम्, असिद्धत्वात् । यस्मात्तवैव तावदसौ त्वदागमो न सिद्धः । कदा? आदौ तत्स्वीकारात्पूर्वम् । न ह्यभ्युपगमात्प्राक्तव कथंचिदप्यसौ सिद्ध इत्युभयसिद्धत्वमसिद्धत्वादसाधनम् ॥

यद्यप्युभयसिद्धत्वमसिद्धम्, इदं तर्हि साधनमस्तु—यद्गुरुशिष्यपरंपरयाम्नायायातं बुद्धवचनत्वेन, यच्च सूत्रेऽवतरति, विनये संदृश्यते, धर्मतां च न विलोमयति, तद्बुद्धवचनं नान्यदिति। अत्राह—यत्प्रत्ययेत्यादि।

यत्प्रत्यया च तत्रास्था महायानेऽपि तां कुरु।

यः प्रत्ययो निबन्धनमस्या आस्थायाः, सा तथोक्ता। यत्प्रत्यया यन्निबन्धना। आस्था आदेयता आदरः। तत्र स्वागमे। तां तत्प्रत्ययामास्थामिह महायानेऽपि कुरु विधेहि, महायानेऽप्युक्तस्यास्थाकारणस्य विद्यमानत्वात् ॥

इदं पुनः सर्वप्रवचनसाधारणमव्यभिचारि लक्षणं यदुक्तमध्याशयसंचोदनसूत्रे—

अपि तु मैत्रेय चतुर्भिः कारणैः प्रतिभानं सर्वबुद्धभाषितं वेदितव्यम्। कतमैश्चतुर्भिः? इह मैत्रेय प्रतिभानमर्थोपसंहितं भवति नानर्थोपसं-

हितम्। धर्मोपसंहितं भवति नाधर्मोपसंहितम्। क्लेशप्रहायकं भवति न क्लेशविवर्धकम्। निर्वाणगुणानुशंससंदर्शकं भवति न संसारगुणानुशंससंदर्शकम्। एतैश्चतुर्भिः पेयालं॥ यस्य कस्यचिन्मैत्रेय एतैश्चतुर्भिः प्रतिभाति प्रतिभास्यति वा, तत्र श्राद्धैः कुलपुत्रैः कुलदुहितृभिर्वा बुद्धसंज्ञोत्पादयितव्या। शास्तृसंज्ञां कृत्वा स धर्मः श्रोतव्यः। तत्कस्य हेतोः? यत्किंचिन्मैत्रेय सुभाषितं सर्वं तद्बुद्धभाषितम्। तत्र मैत्रेय य इमानि प्रतिभानानि प्रतिक्षिपेत्, नैतानि बुद्धभाषितानीति, तेषु चागौरवमुत्पादयेत्पुद्गलविद्वेषेण, तेन सर्वं बुद्धभाषितं प्रतिभानं प्रतिक्षिप्तं भवति। धर्मं प्रतिक्षिप्य धर्मव्यसनसंवर्तनीयेन कर्मणापायगामी भवति॥

तदत्र धर्मताया अविलोमनमेव सम्यग्लक्षणमुक्तम्। उक्तं च—

यदर्थवद्धर्मपदोपसंहितं त्रिधातुसंक्लेशनिबर्हणं वचः।
भवेच्च यच्छान्त्यनुशंसदर्शकं तदुक्तमार्षं विपरीतमन्यथा॥

इति। एतन्महायाने सर्वमस्तीति कथमुपादेयं न स्यात्?

यदुक्तं न सिद्धोऽसौ तवादित इति, तत्र परो विशेषमभिधत्ते—न ब्रवीमि यदावयोर्द्वयोः सिद्धमुभयसिद्धमिति, किं तर्ह्याावाभ्यामन्येषामुभयेषां मदागमः सिद्ध इत्युपादेयः, न महायानम्, एतद्विपरीतत्वात्। तेन नोपादेयमित्याह—अन्योभयेष्टेत्यादि।

अन्योभयेष्टसत्यत्वे वेदादेरपि सत्यता ॥ ९.४३ ॥

यद्यावयोर्विवादारूढत्वादावाभ्यामन्ये ये केचिदप्रतिपन्ना उभये, तेषा-मिष्टमभिमतम्, संमतमिति यावत् । तस्य सत्यत्वे यथार्थत्वेऽभ्युपग-म्यमाने सति, वेदादेरपि सत्यता वेदवाक्यस्य चोदनालक्षणस्य । आदिश-ब्दात्कणादादिवचनस्यापि । सत्यतामृषार्थता स्यात् । तत्रापि वादिप्रति-वादिभ्यामन्योभयसंमतिः संभाव्यत इति तदप्युपादेयं भवतः स्यात् । तस्मान्नायमपि विशेषः ॥

अथापि स्यात्—मदागमे बुद्धवचनत्वेऽविवादः, न तु महायाने । तेन स उपादेयो नेतरदित्याशङ्कयन्नाह—सविवादं महायानमित्यादि ।

सविवादं महायानमिति चेदागमं त्यज ।
तीर्थिकैः सविवादत्वात्स्वैः परैश्चागमान्तरम् ॥ ९.४४ ॥

सविवादं सविप्रतिपत्तिकं महायानम् । केचिद्बुद्धवचनतया प्रवृत्त्यङ्ग-मिच्छन्ति, केचित्तद्विपरीतसमारोपान्नेच्छन्ति, इति हेतोः, चेद्यदि न ग्रा-ह्यम्, तदागमं त्यज, स्वागममपि विजहीहि, सोऽपि प्रवृत्त्यङ्गं न स्यात् । कस्मात्? तीर्थिकैर्मीमांसकादिभिः सविवादत्वात्विप्रतिपत्तिसंभवात्परि-त्यागमर्हति ।

न केवलं तीर्थिकैः, अपि तु स्वयूथ्यैरित्याह—स्वैरिति । चतुर्निकाय-मष्टादशभेदभिन्नं भगवतः शासनम् । तत्रैकस्यैव निकायस्यानेकभेदसंभ-

वात्स्वयूथ्यैरपि परस्परविवादः संभवति । स्वैरिति स्वनिकायान्तर्गतभेदान्तरावस्थितैः । परैरित्यन्यनिकायव्यवस्थितैः ।

चकारः पूर्वापेक्षया समुच्चयार्थः । सविवादत्वादागमान्तरं त्यजेति संबन्धः । त्वदभ्युपगतादागमादन्य आगम आगमान्तरम् । तदपि सविवादत्वान्न स्वीकारमर्हति ।

त्वदागमस्याप्यपरापेक्षया सविवादत्वं समानमिति परित्यागे तुल्य एव न्यायः ।

…

# 18. **Refuting the Nondualists' Notion of a Self**

(*Tattvasaṃgrahapañjikā*)

The *Tattvasaṃgraha*, written by Śāntarakṣita, the great eight-century Buddhist master and synthesizer of the Madhyamaka and Yogācāra doctrines, is a massive encyclopedic survey of a wide range of Buddhist and non-Buddhist doctrines. Śāntarakṣita's disciple, Kamalaśīla, wrote a commentary (*pañjikā*) to elucidate and expand upon the terse verses of his guru's work.

Our text is drawn from the section of Śāntarakṣita's work dedicated to refuting the different doctrines of "Self" (*ātman*) of various prominent schools. Having dealt with the Nyāya-Vaiśeṣika, Mīmāṃsā, Sāṃkhya, and Digambara-Jaina schools, Śāntarakṣita turns his attention to the Advaita-Vedānta, arguably one of the most influential schools in the history of Indian philosophy, tracing its roots to the ancient Upaniṣads, known as the "end of the Vedas" (*vedānta*), and owing much of its popularity to the works of the great eight-century thinker Śaṅkara.

Interestingly, Śāntarakṣita composed only eight verses to disprove the nondualists (*advaitin*), compared to the fifty-one and sixty-three verses dedicated to the Nyāya-Vaiśeṣika and Mīmāṃsā schools respectively, pointing to a remarkable level of philosophical proximity between the two schools. The unmistakable similarities between the Yogācāra and Advaita doctrines have been the subject of much scholarly discussion. In our text, Śāntarakṣita presents the fundamental difference, the "mistake" (*aparādha*) of the Advaita doctrine, which sets these two systems apart.

# 十八、**評破外道不二論者之我論**

摘自 *Tattvasaṃgrahapañjikā*《攝真實論細疏》

《攝真實論》（*Tattvasaṃgraha*）是八世紀印度論師寂護（Śāntarakṣita）所造。寂護將唯識派理論導入中觀教義之中，形成瑜伽行中觀派思想。本論對於佛教以外及佛教內部各學派的學說有極為廣泛的論述。《攝真實論細疏》為寂護的弟子蓮華戒（Kamalaśīla）所撰寫，充分解釋本論的偈頌並加以闡述。

本篇文本選自《攝真實論細疏》的前幾品，其中寂護評破當時主要的學派對於「我」（ātman）所持的各種學說。在反駁了正理・勝論派（Nyāya-Vaiśeṣika）、彌曼差派（Mīmāṃsā）、數論派（Sāṃkhya）、耆那教天衣派（Digambara-Jaina）之後，寂護開始評論吠檀多不二一元論派（Advaita-Vedānta）。吠檀多派可視為印度哲學史上最有影響力的一個學派，其根源可追溯到古代的《奧義書》（*Upaniṣad*）和八世紀偉大論師商羯羅（Śaṅkara）的論著。

值得注意的是，與五十一個偈頌評破正理・勝論派、六十三個偈頌評破彌曼差派相比較，寂護僅僅用八個偈頌評破不二一元論派，這可以反映不二一元論派的立場與寂護本身的思想有某種程度的相似性。瑜伽行派和不二一元論派學說之間的相似之處是許多學者關注的議題。在我們的文本中，寂護指出不二一元論者教理中的一個「過失」（aparādha）、錯誤，正是這個錯誤顯示出兩個學派在思想上的根本區別。

# कमलशीलविरचितायां
# तत्त्वसंग्रहपञ्जिकायाम्
# औपनिषदिकात्मपरीक्षा ।

अपरेऽद्वैतदर्शनावलम्बिनाश्चौपनिषदिकाः क्षित्यादिपरिणामरूपनित्यैकज्ञानस्वभावमात्मानं कल्पयन्ति । अतस्तेषामेव मतमुपदर्शयन्नाह— नित्येत्यादि ।

नित्यज्ञानविवर्तोऽयं क्षितितेजोजलादिकः ।
आत्मा तदात्मकश्चेति संगिरन्तेऽपरे पुनः ॥ ३२८ ॥

तदात्मक इति क्षित्यादिपरिणामरूपनित्यैकज्ञानात्मक इत्यर्थः । अपर इत्यौपनिषदिकाः ॥ ३२८ ॥

किमत्र प्रमाणम्? इत्याह—ग्राह्येत्यादि।

ग्राह्यलक्षणसंयुक्तं न किंचिदिह विद्यते।

विज्ञानपरिणामोऽयं तस्मात्सर्वं समीक्ष्यते॥ ३२९॥

न हि क्षित्यादयो ज्ञानव्यतिरेकेण ग्राह्यलक्षणापन्नाः सन्ति, येन ते प्रतिभासेरन्नवयविनः, परमाणूनां चासत्त्वात्। तस्मात्सामर्थ्याद्विज्ञानप्रतिभासरूपा एवामी क्षित्यादय इति व्यवसीयन्ते। अयमिति क्षित्यादिः॥ ३२९॥

तेषामित्यादिना प्रतिविधत्ते—

तेषामल्पापराधं तु दर्शनं नित्यतोक्तितः।

रूपशब्दादिविज्ञानां व्यक्तं भेदोपलक्षणात्॥ ३३०॥

एकज्ञानात्मकत्वे तु रूपशब्दरसादयः ।

सकृद्वेद्याः प्रसज्यन्ते नित्येऽवस्थान्तरं न च ॥ ३३१ ॥

अल्पापराधमिति ज्ञानमात्रस्य युक्त्युपेतस्याभ्युपगमात् । यद्येवम्, स्वल्पोऽपि किमिति तत्रापराध उच्यत इत्याह—नित्यतोक्तित इत्यादि। कस्मात्पुनर्नित्यत्वाभ्युपगमो न युक्त इत्याह—रूपशब्दादीत्यादि । नित्यता हि नाम तादवस्थ्यमुच्यते, अतादवस्थ्यं त्वनित्यता, न च रूपशब्दादिप्रतिभासिविज्ञानमेकावस्थं सर्वदानुभूयते, किंतु क्रमेण कदाचिद्रूपप्रतिभासम्, अन्यदा च शब्दादिप्रतिभासम् । तद्यदि नित्यैकज्ञानप्रतिभासात्मका अमी शब्दादयः स्युः, तदा विचित्रास्तरणप्रतिभासवत्सकृदेव प्रतिभासेरन्, तत्प्रतिभासात्मकस्य ज्ञानस्य सर्वदावस्थिततत्वात् ।

अथापि स्यात्—अवस्थान्तरमेतत्क्रमेण शब्दादिप्रतिभासं ज्ञानस्योत्पद्यते। तेन सकृदेव शब्दादिसंवेदनं न भविष्यतीत्याह—नित्येऽवस्थान्तरं न चेति। अवस्थानामवस्थातुरनन्यत्वादवस्थावदवस्थातुरपि नाशोत्पादौ स्याताम्। अवस्थातृवद्वावस्थानामपि नित्यत्वप्रसङ्गः। व्यतिरेके चावस्थानां तस्यैता इति संबन्धासिद्धिः, उपकाराभावात्। नित्यैकविज्ञानमात्राभ्युपगमविरोधश्च॥ ३३०॥ ३३१॥

किंच नित्यस्य ज्ञानात्मनः प्रत्यक्षतो वा सिद्धिर्भवेदनुमानतो वा। न तावत्प्रत्यक्षत इति दर्शयति—रूपेत्यादि।

रूपादिवित्तितो भिन्नं न ज्ञानमुपलभ्यते।

तस्याः प्रतिक्षणं भेदे किमभिन्नं व्यवस्थितम्॥ ३३२॥

न हि क्रमप्रतिभासिरूपादिसंविद्व्यतिरेकेण नित्यैकरूपमवस्थातृ ज्ञानमनुभूयते, येन प्रत्यक्षतः सिद्धिः स्यात् । तस्याश्च रूपादिसंवित्तेः क्रमेणानुभूयमानायाः प्रतिक्षणं ध्वंसे सिद्धे, किमपरमभिन्नमस्तीति वाच्यम् । तस्मादुपलब्धिलक्षणप्राप्तस्य तथाविधज्ञानात्मनोऽनुपलब्धेर-सद्व्यवहारविषयतैवेति भावः । ... ॥ ३३२ ॥

किंचास्मिन्पक्षे बन्धमोक्षव्यवस्था न प्राप्नोतीति दर्शयति—विपर्य-स्तेत्यादि ।

विपर्यस्ताविपर्यस्तज्ञानभेदो न विद्यते ।

एकज्ञानात्मके पुंसि बन्धमोक्षौ ततः कथम् ॥ ३३३ ॥

यस्य हि प्रतिक्षणध्वंसि प्रतिपुरुषमनेकमेव विज्ञानं संतानभेदि प्रवर्तत

इति पक्षस्तस्य विपर्यस्ताविपर्यस्तज्ञानप्रबन्धोत्पादवशाद्बन्धमोक्षव्यवस्था युक्तिमती। योगाभ्यासक्रमेण च परिशुद्धतरतमज्ञानोत्पादादपरिशुद्धज्ञा-नसंताननिवृत्तेरपवर्गः प्राप्यत इति सफलो मोक्षप्राप्तये प्रयासः। यस्य तु पुनर्भवतो नित्यैकज्ञानस्वभाव आत्मेति पक्षस्तस्य कथमेकज्ञानात्मके पुंसि बन्धमोक्षौ भवतः? तथा हि यदि विपर्यस्तस्वभावमेकं ज्ञानं सदा, तदापरस्यावस्थान्तरस्याभावान्न मोक्षव्यवस्था स्यात्। अथाविपर्यस्तम्, तदा नित्यं परिशुद्धस्वभावत्वान्न बन्धः स्यात्। अस्माकं तु संतानभेदेन विज्ञप्तिः संक्लिष्टा शुद्धा चेष्यत इति युक्ता बन्धनमोक्षव्यवस्था । यथोक्तम्——

संक्लिष्टा च विशुद्धा च समला निर्मला च सा।

संक्लिष्टा चेद्भवेन्नासौ मुक्ताः स्युः सर्वदेहिनः।

विशुद्धा चेद्भवेन्नासौ व्यायामो निष्फलो भवेत् ॥ इति ॥ ३३३ ॥

अथापि स्यात्—कल्पितावेव बन्धमोक्षौ न पारमार्थिकाविति। तदत्र कल्पनाया अपि निबन्धनं वाच्यम्। अनित्यज्ञानपक्षे तु निबन्धनमुपदर्शितमेव। ततश्च योऽयं भवतामपवर्गप्राप्तये संसारसमतिक्रमाय च तत्त्वभावनाप्रयत्नः स केवलमायासफल एवेति दर्शयति—किं वेत्यादि।

किं वा निवर्तयेद्योगी योगाभ्यासेन साधयेत्।

किं वा न हातुं शक्यो हि विपर्यासिस्तदात्मकः ॥ ३३४ ॥

तत्त्वज्ञानं न चोत्पाद्यं तादात्म्यात्सर्वदा स्थितेः।

योगाभ्यासोऽपि तेनायमफलः सर्व एव च ॥ ३३५ ॥

यदि तत्त्वभावनया योगी किंचिन्निवर्तयेत्प्रवर्तयेद्वा, तदा स्यादस्य सफलः प्रयासः । यावता न तावदसौ विपर्यासं निवर्तयति, यस्मादसौ विपर्यासिस्तदात्मकः नित्यज्ञानात्मकः, तस्मान्न हातुं शक्यः, नित्यस्या-विनाशितया त्यागासम्भवात् । नापि तत्त्वज्ञानं भावनया साधयति, नित्यज्ञानात्मतया सर्वदा तत्त्वज्ञानस्यावस्थिततत्वात् । तस्मान्न युक्तमेतत् ॥ ३३४ ॥ ३३५ ॥

इत्यौपनिषदिकात्मप्रीक्षा ।

# कमलशीलविरचितायां तत्त्वसंग्रहपञ्जिकायाम् औपनिषदिकात्मपरीक्षा ।

अपरेऽद्वैतदर्शनावलम्बिनाश्चौपनिषदिकाः क्षित्यादिपरिणामरूपनित्यैकज्ञानस्वभावमात्मानं कल्पयन्ति । अतस्तेषामेव मतमुपदर्शयन्नाह—नित्येत्यादि ।

नित्यज्ञानविवर्तोऽयं क्षितितेजोजलादिकः ।
आत्मा तदात्मकश्चेति संगिरन्तेऽपरे पुनः ॥ ३२८ ॥

तदात्मक इति क्षित्यादिपरिणामरूपनित्यैकज्ञानात्मक इत्यर्थः । अपर इत्यौपनिषदिकाः ॥ ३२८ ॥

किमत्र प्रमाणम्? इत्याह—ग्राह्येत्यादि ।

ग्राह्यलक्षणसंयुक्तं न किंचिदिह विद्यते ।
विज्ञानपरिणामोऽयं तस्मात्सर्वं समीक्ष्यते ॥ ३२९ ॥

न हि क्षित्यादयो ज्ञानव्यतिरेकेण ग्राह्यलक्षणापन्नाः सन्ति, येन ते प्रतिभासेरन्नवयविनः, परमाणूनां चासत्त्वात् । तस्मात्सामर्थ्याद्विज्ञानप्रतिभासरूपा एवामी क्षित्यादय इति व्यवसीयन्ते । अयमिति क्षित्यादिः ॥

३२९ ॥

तेषामित्यादिना प्रतिविधत्ते—

तेषामल्पापराधं तु दर्शनं नित्यतोक्तितः ।
रूपशब्दादिविज्ञानां व्यक्तं भेदोपलक्षणात् ॥ ३३० ॥

एकज्ञानात्मकत्वे तु रूपशब्दरसादयः ।
सकृद्वेद्याः प्रसज्यन्ते नित्येऽवस्थान्तरं न च ॥ ३३१ ॥

अल्पापराधमिति ज्ञानमात्रस्य युक्त्युपेतस्याभ्युपगमात् । यद्येवम्, स्वल्पोऽपि किमिति तत्रापराध उच्यत इत्याह—नित्यतोक्तित इत्यादि । कस्मात्पुनर्नित्यत्वाभ्युपगमो न युक्त इत्याह—रूपशब्दादीत्यादि । नित्यता हि नाम तादवस्थ्यमुच्यते, अतादवस्थ्यं त्वनित्यता, न च रूपशब्दादिप्रतिभासिविज्ञानमेकावस्थं सर्वदानुभूयते, किंतु क्रमेण कदाचिद्रूपप्रतिभासम्, अन्यदा च शब्दादिप्रतिभासम् । तद्यदि नित्यैकज्ञानप्रतिभासात्मका अमी शब्दादयः स्युः, तदा विचित्रास्तरणप्रतिभासवत्सकृदेव प्रतिभासेरन्, तत्प्रतिभासात्मकस्य ज्ञानस्य सर्वदावस्थितत्वात् ।

अथापि स्यात्—अवस्थान्तरमेतत्क्रमेण शब्दादिप्रतिभासं ज्ञानस्योत्पद्यते । तेन सकृदेव शब्दादिसंवेदनं न भविष्यतीत्याह—नित्येऽवस्थान्तरं न चेति । अवस्थानामवस्थातुरनन्यत्वादवस्थावदवस्थातुरपि नाशोत्पादौ स्याताम् । अवस्थातृवद्वावस्थानामपि नित्यत्वप्रसङ्गः । व्यतिरेके

चावस्थानां तस्यैता इति संबन्धासिद्धिः, उपकाराभावात् । नित्यैकविज्ञानमात्राभ्युपगमविरोधश्च ॥ ३३० ॥ ३३१ ॥

किंच नित्यस्य ज्ञानात्मनः प्रत्यक्षतो वा सिद्धिर्भवेदनुमानतो वा । न तावत्प्रत्यक्षत इति दर्शयति—रूपेत्यादि ।

रूपादिवित्तितो भिन्नं न ज्ञानमुपलभ्यते ।
तस्याः प्रतिक्षणं भेदे किमभिन्नं व्यवस्थितम् ॥ ३३२ ॥

न हि क्रमप्रतिभासिरूपादिसंविद्व्यतिरेकेण नित्यैकरूपमवस्थातृ ज्ञानमनुभूयते, येन प्रत्यक्षतः सिद्धिः स्यात् । तस्याश्च रूपादिसंवित्तेः क्रमेणानुभूयमानायाः प्रतिक्षणं ध्वंसे सिद्धे, किमपरमभिन्नमस्तीति वाच्यम् । तस्मादुपलब्धिलक्षणप्राप्तस्य तथाविधज्ञानात्मनोऽनुपलब्धेरसद्व्यवहारविषयतैवेति भावः । ... ॥ ३३२ ॥

किंचास्मिन्पक्षे बन्धमोक्षव्यवस्था न प्राप्नोतीति दर्शयति—विपर्यस्तेत्यादि ।

विपर्यस्ताविपर्यस्तज्ञानभेदो न विद्यते ।
एकज्ञानात्मके पुंसि बन्धमोक्षौ ततः कथम् ॥ ३३३ ॥

यस्य हि प्रतिक्षणध्वंसि प्रतिपुरुषमनेकमेव विज्ञानं संतानभेदि प्रवर्तत इति पक्षस्तस्य विपर्यस्ताविपर्यस्तज्ञानप्रबन्धोत्पादवशाद्बन्धमोक्षव्यवस्था युक्तिमती । योगाभ्यासक्रमेण च परिशुद्धतरतमज्ञानोत्पादादपरिशुद्धज्ञा-

नसंताननिवृत्तेरपवर्गः प्राप्यत इति सफलो मोक्षप्राप्तये प्रयासः । यस्य तु पुनर्भवतो नित्यैकज्ञानस्वभाव आत्मेति पक्षस्तस्य कथमेकज्ञानात्मके पुंसि बन्धमोक्षौ भवतः? तथा हि यदि विपर्यस्तस्वभावमेकं ज्ञानं सदा, तदापरस्यावस्थान्तरस्याभावान्न मोक्षव्यवस्था स्यात् । अथाविपर्यस्तम्, तदा नित्यं परिशुद्धस्वभावत्वान्न बन्धः स्यात् । अस्माकं तु संतानभेदेन विज्ञप्तिः संक्लिष्टा शुद्धा चेष्यत इति युक्ता बन्धनमोक्षव्यवस्था । यथोक्तम्—

संक्लिष्टा च विशुद्धा च समला निर्मला च सा ।
संक्लिष्टा चेद्भवेन्नासौ मुक्ताः स्युः सर्वदेहिनः ।
विशुद्धा चेद्भवेन्नासौ व्यायामो निष्फलो भवेत् ॥ इति ॥ ३३३ ॥

अथापि स्यात्—कल्पितावेव बन्धमोक्षौ न पारमार्थिकाविति । तदत्र कल्पनाया अपि निबन्धनं वाच्यम् । अनित्यज्ञानपक्षे तु निबन्धनमुपदर्शितमेव । ततश्च योऽयं भवतामपवर्गप्राप्तये संसारसमतिक्रमाय च तत्त्वभावनाप्रयत्नः स केवलमायासफल एवेति दर्शयति—किं वेत्यादि ।

किं वा निवर्तयेद्योगी योगाभ्यासेन साधयेत् ।
किं वा न हातुं शक्यो हि विपर्यासस्तदात्मकः ॥ ३३४ ॥

तत्त्वज्ञानं न चोत्पाद्यं तादात्म्यात्सर्वदा स्थितेः ।
योगाभ्यासोऽपि तेनायमफलः सर्व एव च ॥ ३३५ ॥

यदि तत्त्वभावनया योगी किंचिन्निवर्तयेत्प्रवर्तयेद्वा, तदा स्यादस्य सफलः प्रयासः । यावता न तावदसौ विपर्यासं निवर्तयति, यस्मादसौ विपर्यासिस्तदात्मकः नित्यज्ञानात्मकः, तस्मान्न हातुं शक्यः, नित्यस्याविनाशितया त्यागासम्भवात् । नापि तत्त्वज्ञानं भावनया साधयति, नित्यज्ञानात्मतया सर्वदा तत्त्वज्ञानस्यावस्थिततत्वात् । तस्मान्न युक्तमेतत् ॥ ३३४ ॥ ३३५ ॥

इत्यौपनिषदिकात्मप्रीक्षा ।

# 19. **Responding to the Realists**

(*Viṃśatikā*)

The *Viṃśatikā* ("Twenty Verses") and *Triṃśikā* ("Thirty Verses"), written by Vasubandhu probably near the end of his life, represent the crowning achievement of the master's career as one of the founding thinkers of the "Mind-Only" or Yogācāra school of Mahāyāna philosophy. While the *Triṃśikā* offers a synopsis of the Yogācāra doctrine, the *Viṃśatikā*—Vasubandhu's least scholastic and most philosophically interesting work—is primarily dedicated to defending the system against objections raised by the realists (*bāhyārthavādin*), i.e, those Buddhist and non-Buddhist thinkers who insist on the existence of some form of external world capable of functioning as a basis for our perceptions (*vijñapti*).

Our text includes the work's first four verses (*kārikā*) together with the commentary (*vṛtti*) written by Vasubandhu himself. The commentary in Sanskrit of the first two verses has been reconstructed by the French Indologist Sylvain Lévi on the basis of the Tibetan and Chinese translations.

# 十九、**駁斥外境實有論者的問難**

摘自 *Viṃśatikā*《唯識二十頌》

《唯識二十論》（*Viṃśatikā*）和《唯識三十頌》（*Triṃśikā*）均為世親（Vasubandhu）晚年之作，代表了世親作為大乘瑜伽行派創始人之一的最高成就。《唯識三十頌》是整個瑜伽行派教義的綱要書，而《唯識二十論》主要目的在於維護自宗，破斥實在論者（bāhyārthavādin）對唯識的反駁。實在論者——包含佛教和非佛教論師——主張「外境」（外在的世界）必然以某種方式存在，作為眾生產生知覺經驗的基礎。

本文內容為《唯識二十頌》的前四頌（kārikā）及注釋（vṛtti），前二頌的注釋為法國印度學家 Sylvain Lévi 根據藏譯本及漢譯本重構為梵語。

# वसुबन्धुविरचिता

# विंशतिका विज्ञप्तिमात्रतासिद्धिः ।

महायाने त्रैधातुकं विज्ञप्तिमात्रं व्यवस्थाप्यते । चित्तमात्रं भो जिनपुत्रा यदुत त्रैधातुकमिति सूत्रात् । चित्तं मनो विज्ञानं विज्ञप्तिश्चेति पर्यायाः । चित्तमत्र ससंप्रयोगमभिप्रेतं । मात्रमित्यर्थप्रतिषेधार्थं ।

विज्ञप्तिमात्रमेवेदमसदर्थावभासनात् ।

यद्वत्तैमिरिकस्यासत्केशोण्डुकादिदर्शनम् ॥ १ ॥

अत्र चोद्यते—

न देशकालनियमः संतानानियमो न च ।

न च कृत्यक्रिया युक्ता विज्ञप्तिर्यदि नार्थतः ॥ २ ॥

किमुक्तं भवति? यदि विना रूपाद्यर्थेन रूपादिविज्ञप्तिरुत्पद्यते न रूपाद्यर्थात्, कस्मात्क्वचिद्देश उत्पद्यते न सर्वत्र? तत्रैव च देशे कदाचिदुत्पद्यते न सर्वदा? तद्देशकालप्रतिष्ठितानां सर्वेषां संतान उत्पद्यते न केवलमेकस्य? यथा तैमिरिकाणां संताने केशाद्याभासो नान्येषाम् । कस्माद्यत्तैमिरिकैः केशभ्रमरादि दृश्यते तेन केशादिक्रिया न क्रियते, न च तदन्यैर्न क्रियते? यदन्नपानवस्त्रविषायुधादि स्वप्ने दृश्यते तेनान्नादिक्रिया न क्रियते, न च तदन्यैर्न क्रियते? गन्धर्वनगरेणासत्त्वान्नगरक्रिया न क्रियते, न च तदन्यैर्न क्रियते? तस्मादसदर्थावभासने देशकालनियमः संतानानियमः कृत्यक्रिया च न युज्यते ॥

न खलु न युज्यते । यस्मात्—

देशादिनियमः सिद्धः स्वप्नवत्

स्वप्न इव स्वप्नवत्। कथं तावत्? स्वप्ने विनाप्यर्थेन क्वचिदेव देशे किंचिद्भ्रमरारामस्त्रीपुरुषादिकं दृश्यते न सर्वत्र। तत्रैव च देशे कदाचि-दृश्यते न सर्वकालमिति सिद्धो विनाप्यर्थेन देशकालनियमः।

प्रेतवत्पुनः।

संतानानियमः

सिद्ध इति वर्तते। प्रेतानामिव प्रेतवत्। कथं सिद्धः? समं

सर्वैः पूयनद्यादिदर्शने॥ ३॥

पूयपूर्णा नदी पूयनदी। घृतघटवत्। तुल्यकर्मविपाकावस्था हि प्रेताः

सर्वेऽपि पूयपूर्णां नदीं पश्यन्ति नैक एव । यथा पूयपूर्णामिवं मूत्रपुरीषादिपूर्णां दण्डासिधरैश्च पुरुषैरधिष्ठितामित्यादिग्रहणेन । एवं संतानानियमो विज्ञप्तिनामसत्यप्यर्थे सिद्धः ॥

स्वप्नोपघातवत्कृत्यक्रिया

सिद्धेति वेदितव्यं । यथा स्वप्ने द्वयसमापत्तिमन्तरेण शुक्रविसर्गलक्षणः स्वप्नोपघातः । एवं तावदन्यान्यैर्दृष्टान्तैर्देशकालनियमादिचतुष्टयं सिद्धं ।

नरकवत्पुनः ।

सर्वं

सिद्धमिति वेदितव्यं । नरकेष्विव नरकवत् । कथं सिद्धं?

नरकपालादिदर्शने तैश्च बाधने ॥ ४ ॥

यथा हि नरकेषु नारकाणां नरकपालादिदर्शनं देशकालनियमेन सिद्धं। श्ववायसायसपर्वताद्यागमनगमनदर्शनं चेत्यादिग्रहणेन। सर्वेषां च नैकस्यैव। तैश्च तद्बाधनं सिद्धमसत्स्वपि नरकपालादिषु, समानस्वकर्मविपाकाधिपत्यात्। तथान्यत्रापि सर्वमेतद्देशकालनियमादिचतुष्टयं सिद्धमिति वेदितव्यं॥

किं पुनः कारणं नरकपालास्ते च श्वानो वायसाश्च सत्त्वा नेष्यन्ते? अयोगात्। न हि ते नारका युज्यन्ते, तथैव तद्दुःखाप्रतिसंवेदनात्। परस्परं यातयतामिमे नारका इमे नरकपाला इति व्यवस्था न स्यात्। तुल्याकृतिप्रमाणबलानां च परस्परं यातयतां न तथा भयं स्यात्। दाहदुःखं च प्रदीप्तायामयोमय्यां भूमावसहमानाः, कथं तत्र परान्यातयेयुः? अनारकाणां वा नरके कुतः संभवः?

. . .

# वसुबन्धुविरचिता
# विंशतिका विज्ञप्तिमात्रतासिद्धिः ।

महायाने त्रैधातुकं विज्ञप्तिमात्रं व्यवस्थाप्यते । चित्तमात्रं भो जिनपुत्रा यदुत त्रैधातुकमिति सूत्रात् । चित्तं मनो विज्ञानं विज्ञप्तिश्चेति पर्यायाः । चित्तमत्र ससंप्रयोगमभिप्रेतं । मात्रमित्यर्थप्रतिषेधार्थं ।

विज्ञप्तिमात्रमेवेदमसदर्थावभासनात् ।
यद्वत्तैमिरिकस्यासत्केशोण्डुकादिदर्शनम् ॥ १ ॥

अत्र चोद्यते—

न देशकालनियमः संतानानियमो न च ।
न च कृत्यक्रिया युक्ता विज्ञप्तिर्यदि नार्थतः ॥ २ ॥

किमुक्तं भवति? यदि विना रूपाद्यर्थेन रूपादिविज्ञप्तिरुत्पद्यते न रूपाद्यर्थात्, कस्मात्क्वचिद्देश उत्पद्यते न सर्वत्र? तत्रैव च देशे कदाचिदुत्पद्यते न सर्वदा? तद्देशकालप्रतिष्ठितानां सर्वेषां संतान उत्पद्यते न केवलमेकस्य? यथा तैमिरिकाणां संताने केशाद्याभासो नान्येषाम् । कस्माद्यत्तैमिरिकैः केशभ्रमरादि दृश्यते तेन केशादिक्रिया न क्रियते, न च

तदन्यैर्न क्रियते? यदन्नपानवस्त्रविषायुधादि स्वप्ने दृश्यते तेनान्नादिक्रिया न क्रियते, न च तदन्यैर्न क्रियते? गन्धर्वनगरेणासत्त्वान्नगरक्रिया न क्रियते, न च तदन्यैर्न क्रियते? तस्मादसदर्थाविभासने देशकालनियमः संतानानियमः कृत्यक्रिया च न युज्यते॥

न खलु न युज्यते। यस्मात्——

देशादिनियमः सिद्धः स्वप्नवत्

स्वप्न इव स्वप्नवत्। कथं तावत्? स्वप्ने विनाप्यर्थेन क्वचिदेव देशे किंचिद्भ्रमरारामस्त्रीपुरुषादिकं दृश्यते न सर्वत्र। तत्रैव च देशे कदाचिदृश्यते न सर्वकालमिति सिद्धो विनाप्यर्थेन देशकालनियमः।

प्रेतवत्पुनः।

संतानानियमः

सिद्ध इति वर्तते। प्रेतानामिव प्रेतवत्। कथं सिद्धः? समं

सर्वैः पूयनद्यादिदर्शने॥ ३॥

पूयपूर्णा नदी पूयनदी। घृतघटवत्। तुल्यकर्मविपाकावस्था हि प्रेताः सर्वेऽपि पूयपूर्णां नदीं पश्यन्ति नैक एव। यथा पूयपूर्णमिवं मूत्रपुरीषादिपूर्णां दण्डासिधरैश्च पुरुषैरधिष्ठितामित्यादिग्रहणेन। एवं संतानानियमो विज्ञप्तिनामसत्यप्यर्थे सिद्धः॥

स्वप्नोपघातवत्कृत्यक्रिया

सिद्धेति वेदितव्यं। यथा स्वप्ने द्वयसमापत्तिमन्तरेण शुक्रविसर्गलक्षणः स्वप्नोपघातः। एवं तावदन्यान्यैर्दृष्टान्तैर्देशकालनियमादिचतुष्टयं सिद्धं।

नरकवत्पुनः।

सर्वं

सिद्धमिति वेदितव्यं। नरकेष्विव नरकवत्। कथं सिद्धं?

नरकपालादिदर्शने तैश्च बाधने॥ ४॥

यथा हि नरकेषु नारकाणां नरकपालादिदर्शनं देशकालनियमेन सिद्धं। श्ववायसायसपर्वताद्यागमनगमनदर्शनं चेत्यादिग्रहणेन। सर्वेषां च नैकस्यैव। तैश्च तद्बाधनं सिद्धमसत्स्वपि नरकपालादिषु, समानस्वकर्मविपा-

काधिपत्यात्। तथान्यत्रापि सर्वमेतद्देशकालनियमादिचतुष्तयं सिद्धमिति वेदितव्यं॥

किं पुनः कारणं नरकपालास्ते च श्वानो वायसाश्च सत्त्वा नेष्यन्ते? अयोगात्। न हि ते नारका युज्यन्ते, तथैव तद्दुःखाप्रतिसंवेदनात्। परस्परं यातयतामिमे नारका इमे नरकपाला इति व्यवस्था न स्यात्। तुल्याकृति-प्रमाणबलानां च परस्परं यातयतां न तथा भयं स्यात्। दाहदुःखं च प्रदीप्तायामयोमय्यां भूमावसहमानाः, कथं तत्र परान्यातयेयुः? अनारकाणां वा नरके कुतः संभवः?

…

# 20. **On the Tathāgatagarbha**

(*Ratnagotravibhāga*, ch. 1)

The teaching on the *Tathāgatagarbha* is elaborated upon in a number of Mahāyāna sūtras, such as the *Tathāgatagarbha Sūtra*, the *Śrīmālādevīsiṃhanāda Sūtra*, or the *Mahāparinirvāṇa Sūtra*, in which it is equated with the Buddha-element (*buddhadhātu*) or "Buddha-nature" as it is commonly translated. The *Ratnagotravibhāga*, a treatise whose authorship remains uncertain, attempts to systematize this later strand of Mahāyāna teachings. The "Tathāgata-Matrix" is here described as the permanent (*nitya*), unchanging (*dhruva*), auspicious or peaceful (*śiva*), and eternal (*śāśvata*) self-nature (*svadharmatā*) of all sentient beings. While the Tibetan tradition attributes the verses of the treatise to the bodhisattva Maitreya and the commentary section to the fourth-century Yogācāra master Asaṅga, the Chinese tradition mentions a certain Sāramati (沙羅末底) as the author for the whole work.

Our text, which comprises the conclusion of the *Ratnagotravibhāga*'s first chapter, discusses three main topics: the four kinds of beings incapable of grasping the *Tathāgatagarbha*, the proper way of understanding emptiness (*śūnyatā*) in relation to the *Tathāgatagarbha*, and the purpose (*prayojana*) of this final dispensation. The text includes several short passages from the *Śrīmālādevīsiṃhanāda Sūtra* and one long passage from the *Mahāparinirvāṇa Sūtra*, both of which are only extant in full in their Tibetan and Chinese translations.

# 二十、**論如來藏**

摘自 *Ratnagotravibhāga*《寶性論》

如來藏思想由《如來藏經》（*Tathāgatagarbha Sūtra*）、《勝鬘師子吼經》（*Śrīmālādevīsiṃhanāda Sūtra*）等大乘經典開展出來。《大般涅槃經》（*Mahāparinirvāṇa Sūtra*）中，將如來藏等同於「佛界」（buddhadhātu），即「佛性」的概念。

本文選自《寶性論》第一品，《寶性論》為有組織地闡述如來藏思想的重要著作。論中描述「如來藏」為常住（nitya）、不變（dhruva）、清涼（śiva）和恆久（śāśvata）的自性（svadharmatā）。關於本論的作者，依據中國佛教的傳統說法，是堅慧（Sāramati）所作，但西藏傳統則認為偈頌是彌勒（Maitreya）菩薩所造，釋論是瑜伽行派論師無著（Asaṅga）所撰。

本文內容總結《寶性論》第一品，闡述四類眾生不能見如來藏、如何才能正確體解空性（śūnyatā）與如來藏的關係，及佛陀宣說如來藏的宗旨（prayojana），並爰引《勝鬘師子吼經》及《大般涅槃經》（此二經目前僅存藏、漢譯本）加以說明。

# रत्नगोत्रविभागे महायानोत्तरतन्त्रशास्त्रे

# तथागतगर्भाधिकारः प्रथमः परिच्छेदः ।

...

श्रद्धयैवानुगन्तव्यं परमार्थे स्वयंभुवाम् ।

न ह्यचक्षुः प्रभादीप्तमीक्षते सूर्यमण्डलम् ॥ १.१५३ ॥

समासत इमे चत्वारः पुद्गलास्तथागतगर्भदर्शनं प्रत्यचक्षुष्मन्तो व्यवस्थिताः । कतमे चत्वारः? यदुत पृथग्जनः श्रावकः प्रत्येकबुद्धो नवयानसंप्रस्थितश्च बोधिसत्त्वः । यथोक्तम्—

अगोचरोऽयं भगवंस्तथागतगर्भः सत्कायदृष्टिपतितानां विपर्यासाभिरतानां शून्यताविक्षिप्तचित्तानामिति ।

तत्र सत्कायदृष्टिपतिता उच्यन्ते बालपृथग्जनाः। तथा हि तेऽत्यन्त-सास्रवस्कन्धादीन्धर्मानात्मत आत्मीयतश्चोपगम्य अहंकारममकाराभिनि-विष्टाः सत्कायनिरोधमनास्रवधातुमधिमोक्तुमपि नालम्। कुतः पुनः सर्वज्ञविषयं तथागतगर्भमवभोत्स्यन्त इति? नेदं स्थानं विद्यते।

तत्र विपर्यासाभिरता उच्यन्ते श्रावकप्रत्येकबुद्धाः। तत्कस्मात्? तेऽपि हि नित्ये तथागतगर्भे सत्युत्तरिभावयितव्ये तन्नित्यसंज्ञाभावनावि-पर्ययेणानित्यसंज्ञाभावनाभिरताः। सुखे तथागतगर्भे सत्युत्तरिभावयितव्ये तत्सुखसंज्ञाभावनाविपर्ययेण दुःखसंज्ञाभावनाभिरताः। आत्मनि तथाग-तगर्भे सत्युत्तरिभावयितव्ये तदात्मसंज्ञाभावनाविपर्ययेणानात्मसंज्ञाभाव-नाभिरताः। शुभे तथागतगर्भे सत्युत्तरिभावयितव्ये तच्छुभसंज्ञाभावना-विपर्ययेणाशुभसंज्ञाभावनाभिरताः। एवमनेन पर्यायेण सर्वश्रावकप्रत्येक-

बुद्धानामपि धर्मकायप्राप्तिविधुरमार्गाभिरतत्वादगोचरः स परमनित्यसुखात्मशुभलक्षणो धातुरित्युक्तम्। यथा च स विपर्यासाभिरतानामनित्यदुःखानात्माशुभसंज्ञानामगोचरस्तथा विस्तरेण महापरिनिर्वाणसूत्रे भगवता वापीतोयमणिदृष्टान्तेन प्रसाधितः—

तद्यथापि नाम भिक्षवो ग्रीष्मकाले वर्तमाने सलिलबन्धनं बद्ध्वा स्वैः स्वैर्मण्डनकोपभोगैर्जनाः सलिले क्रीडेयुः। अथ तत्रैको जात्यं वैडूर्यमणिमन्तरुदके स्थापयेत्। ततस्तस्य वैडूर्यस्यार्थे सर्वे ते मण्डनकानि त्यक्त्वा निमज्जेयुः। अथ यत्तत्रास्ति शर्करं कठल्यं वा तत्ते मणिरिति मन्यमाना गृहीत्वा मया लब्धो मणिरित्युत्सृज्योत्सृज्य वापीतीरे स्थित्वा नायं मणिरिति संज्ञां प्रवर्तयेयुः। तच्च वाप्युदकं मणिप्रभावेन तत्प्रभेव भ्राजेत। एवं तेषां तदुदकं भ्राजमानं दृष्ट्वा अहो

मणिरिति गुणसंज्ञा प्रवर्तेत। अथ तत्रैक उपायकुशलो मेधावी मणिं तत्त्वतः प्रतिलभेत।

एवमेव भिक्षवो युष्माभिः सर्वमनित्यं सर्वं दुःखं सर्वमनात्मकं सर्वमशुभमिति सर्वग्रहणेन भावितभावितं बहुलीकृतबहुलीकृतं धर्मतत्त्वमजानद्भिस्तत्सर्वं घटितं निरर्थकम्। तस्माद्भिक्षवो वापीशर्करकठल्यव्यवस्थिता इव मा भूत। उपायकुशला यूयं भवत। यद्यद्भिक्षवो युष्माभिः सर्वमनित्यं सर्वं दुःखं सर्वमनात्मकं सर्वमशुभमिति सर्वग्रहणेन भावितभावितं बहुलीकृतबहुलीकृतं तत्र तत्रैव नित्यसुखशुभात्मकानि सन्तीति

विस्तरेण परमधर्मतत्त्वव्यवस्थानमारभ्य विपर्यासभूतनिर्देशो यथासूत्रमनुगन्तव्यः।

तत्र शून्यताविक्षिप्तचित्ता उच्यन्ते नवयानसंप्रस्थिता बोधिसत्त्वास्तथागतगर्भशून्यतार्थनयविप्रनष्टाः, ये भावविनाशाय शून्यताविमोक्षमुखमिच्छन्ति, सत एव धर्मस्योत्तरकालमुच्छेदो विनाशः परिनिर्वाणमिति, ये वा पुनः शून्यतोपलम्भेन शून्यतां प्रतिसरन्ति, शून्यता नाम रूपादिव्यतिरेकेण कश्चिद्भावोऽस्ति यमधिगमिष्यामो भावयिष्याम इति।

तत्र कतमः स तथागतगर्भशून्यतार्थनय उच्यते?

नापनेयमतः किंचिदुपनेयं न किंचन।

द्रष्टव्यं भूततो भूतं भूतदर्शी विमुच्यते॥ १.१५४॥

शून्य आगन्तुकैर्धातुः सविनिर्भागलक्षणैः।

अशून्योऽनुत्तरैर्धर्मैरविनिर्भागलक्षणैः॥ १.१५५॥

किमनेन परिदीपितम्? यतो न किंचिदपनेयमस्त्यतः प्रकृतिपरिशुद्धात्तथागतधातोः संक्लेशनिमित्तम्, आगन्तुकमलशून्यताप्रकृतित्वादस्य। नाप्यत्र किंचिदुपनेयमस्ति व्यवदाननिमित्तम्, अविनिर्भागशुद्धधर्मप्रकृतित्वात्। तत उच्यते—

शून्यस्तथागतगर्भो विनिर्भागैर्मुक्तज्ञैः सर्वक्लेशकोशैः। अशून्यो गङ्गानदीवालिकाव्यतिवृत्तैरविनिर्भागैरमुक्तज्ञैरचिन्त्यैर्बुद्धधर्मैरिति।

एवं यद्यत्र नास्ति तत्तेन शून्यमिति समनुपश्यति। यत्पुनरत्रावशिष्टं भवति तत्सदिहास्तीति यथाभूतं प्रजानाति। समारोपापवादान्तपरिवर्जनादविपर्यस्तं शून्यतालक्षणमनेन श्लोकद्वयेन परिदीपितम्।

तत्र येषामितः शून्यतार्थनयाद्बहिश्चित्तं विक्षिप्यते विसरति न समाधी-

यते नैकाग्रीभवति तेन ते शून्यताविक्षिप्तचित्ता उच्यन्ते। न हि परमार्थशून्यताज्ञानमुखमन्तरेण शक्यतेऽविकल्पो धातुरधिगन्तुं साक्षात्कर्तुम्। इदं च संधाय उक्तम्——

> तथागतगर्भज्ञानमेव तथागतानां शून्यताज्ञानम्। तथागतगर्भश्च सर्वश्रावकप्रत्येकबुद्धैरदृष्टपूर्वोऽनधिगतपूर्व इति विस्तरः।

स खल्वेष तथागतगर्भो यथा धर्मधातुगर्भस्तथा सत्कायदृष्टिपतितानामगोचर इत्युक्तम्, दृष्टिप्रतिपक्षत्वाद्धर्मधातोः। यथा धर्मकायो लोकोत्तरधर्मगर्भस्तथा विपर्यासाभिरतानामगोचर इत्युक्तम्, अनित्यादिलोकधर्मप्रतिपक्षेण लोकोत्तरधर्मपरिदीपनात्। यथा प्रकृतिपरिशुद्धधर्मगर्भस्तथा शून्यताविक्षिप्तानामगोचर इत्युक्तम्, आगन्तुकमलशून्यताप्रकृतित्वाद्विशुद्धिगुणधर्माणामविनिर्भागलोकोत्तरधर्मकायप्रभावितानामिति।

तत्र यदेकनयधर्मधात्वसंभेदज्ञानमुखमागम्य लोकोत्तरधर्मकायप्रकृतिपरिशुद्धिव्यवलोकनमिदमत्र यथाभूतज्ञानदर्शनमभिप्रेतम्, येन दशभूमिस्थिता बोधिसत्त्वास्तथागतगर्भमीषत्पश्यन्तीत्युक्तम्। एवं ह्याह—

छिद्राभ्रे नभसीव भास्कर इह त्वं शुद्धबुद्धीक्षणैर्
आर्यैरप्यवलोक्यसे न सकलः प्रादेशिकीबुद्धिभिः।
ज्ञेयानन्तनभस्तलप्रविसृतं ते धर्मकायं तु ते
साकल्येन विलोकयन्ति भगवन्येषामनन्ता मतिरिति॥

यद्येवमसङ्गनिष्ठाभूमिप्रतिष्ठितानामपि परमार्याणामसर्वविषय एव दुर्दृशो धातुः, तत्किमनेन बालपृथग्जनमारभ्य देशितेनेति? देशनाप्रयोजनसंग्रहे श्लोकौ। एकेन प्रश्नो द्वितीयेन व्याकरणम्—

शून्यं सर्वं सर्वथा तत्र तत्र

ज्ञेयं मेघस्वप्नमायाकृताभम् ।

इत्युक्त्वैवं बुद्धधातुः पुनः किं

सत्त्वे सत्त्वेऽस्तीति बुद्धैरिहोक्तम् ॥ १५६ ॥

लीनं चित्तं हीनसत्त्वेष्ववज्ञा-

भूतग्राहो भूतधर्मापवादः ।

आत्मस्नेहश्चाधिकः पञ्च दोषा

येषां तेषां तत्प्रहाणार्थमुक्तम् ॥ १५७ ॥

अस्य खलु श्लोकद्वयस्यार्थः समासेन दशभिः श्लोकैर्वेदितव्यः—

विविक्तं संस्कृतं सर्वप्रकारं भूतकोटिषु ।

क्लेशकर्मविपाकार्थं मेघादिवदुदाहृतम् ॥ १.१५८ ॥

क्लेशा मेघोपमाः कृत्यक्रिया स्वप्नोपभोगवत् ।

मायानिर्मितवत्स्कन्धा विपाकाः क्लेशकर्मणाम् ॥ १.१५९ ॥

पूर्वमेवं व्यवस्थाप्य तन्त्रे पुनरिहोत्तरे ।

पञ्चदोषप्रहाणाय धात्वस्तित्वं प्रकाशितम् ॥ १.१६० ॥

तथा ह्यश्रवणादस्य बोधौ चित्तं न जायते ।

केषांचिन्नीचचित्तानामात्मावज्ञानदोषतः ॥ १.१६१ ॥

बोधिचित्तोदयेऽप्यस्य श्रेयानस्मीति मन्यतः ।

बोध्यनुत्पन्नचित्तेषु हीनसंज्ञा प्रवर्तते ॥ १.१६२ ॥

तस्यैवंमतिनः सम्यग्ज्ञानं नोत्पद्यते ततः ।

अभूतं परिगृह्णाति भूतमर्थं न विन्दते ॥ १.१६३ ॥

अभूतं सत्त्वदोषास्ते कृत्रिमागन्तुकत्वतः ।

भूतं तद्दोषनैरात्म्यं शुद्धिप्रकृतयो गुणाः ॥ १.१६४ ॥

गृह्णन्दोषानसद्भूतान्भूतानपवदन्गुणान् ।

मैत्रीं न लभते धीमान्सत्त्वात्मसमदर्शिकाम् ॥ १.१६५ ॥

तच्छ्रुवाज्जायते त्वस्य प्रोत्साहः शास्तृगौरवम् ।

प्रज्ञा ज्ञानं महामैत्री पञ्चधर्मोदयात्ततः ॥ १.१६६ ॥

निरवज्ञः समप्रेक्षी निर्दोषो गुणवानसौ ।

आत्मसत्त्वसमस्नेहः क्षिप्रमाप्नोति बुद्धताम् ॥ १.१६७ ॥

इति रत्नगोत्रविभागे महायानोत्तरतन्त्रशास्त्रे तथागतगर्भाधिकारः

प्रथमः परिच्छेदः श्लोकार्थसंग्रहव्याख्यानतः समाप्तः ॥

# रत्नगोत्रविभागे महायानोत्तरतन्त्रशास्त्रे तथागतगर्भाधिकारः प्रथमः परिच्छेदः ।

…

श्रद्धयैवानुगन्तव्यं परमार्थे स्वयंभुवाम् ।
न ह्यचक्षुः प्रभादीप्तमीक्षते सूर्यमण्डलम् ॥ १.१५३ ॥

समासत इमे चत्वारः पुद्गलास्तथागतगर्भदर्शनं प्रत्यचक्षुष्मन्तो व्यवस्थिताः । कतमे चत्वारः? यदुत पृथग्जनः श्रावकः प्रत्येकबुद्धो नवयानसंप्रस्थितश्च बोधिसत्त्वः । यथोक्तम्—

> अगोचरोऽयं भगवंस्तथागतगर्भः सत्कायदृष्टिपतितानां विपर्यासाभिरतानां शून्यताविक्षिप्तचित्तानामिति ।

तत्र सत्कायदृष्टिपतिता उच्यन्ते बालपृथग्जनाः । तथा हि तेऽत्यन्तसास्रवस्कन्धादीन्धर्मानात्मत आत्मीयतश्चोपगम्य अहंकारममकाराभिनिविष्टाः सत्कायनिरोधमनास्रवधातुमधिमोक्तुमपि नालम् । कुतः पुनः सर्वज्ञविषयं तथागतगर्भमवभोत्स्यन्त इति? नेदं स्थानं विद्यते ।

तत्र विपर्यासाभिरता उच्यन्ते श्रावकप्रत्येकबुद्धाः । तत्कस्मात्? तेऽपि हि नित्ये तथागतगर्भे सत्युत्तरिभावयितव्ये तन्नित्यसंज्ञाभावनाविपर्ययेणानित्यसंज्ञाभावनाभिरताः । सुखे तथागतगर्भे सत्युत्तरिभावयितव्ये

तत्सुखसंज्ञाभावनाविपर्ययेण दुःखसंज्ञाभावनाभिरताः। आत्मनि तथागतगर्भे सत्युत्तरिभावयितव्ये तदात्मसंज्ञाभावनाविपर्ययेणानात्मसंज्ञाभावनाभिरताः। शुभे तथागतगर्भे सत्युत्तरिभावयितव्ये तच्छुभसंज्ञाभावनाविपर्ययेणाशुभसंज्ञाभावनाभिरताः। एवमनेन पर्यायेण सर्वश्रावकप्रत्येकबुद्धानामपि धर्मकायप्राप्तिविधुरमार्गाभिरतत्वादगोचरः स परमनित्यसुखात्मशुभलक्षणो धातुरित्युक्तम्। यथा च स विपर्यासाभिरतानामनित्यदुःखानात्माशुभसंज्ञानामगोचरस्तथा विस्तरेण महापरिनिर्वाणसूत्रे भगवता वापीतोयमणिदृष्टान्तेन प्रसाधितः—

> तद्यथापि नाम भिक्षवो ग्रीष्मकाले वर्तमाने सलिलबन्धनं बद्ध्वा स्वैः स्वैर्मण्डनकोपभोगैर्जनाः सलिले क्रीडेयुः। अथ तत्रैको जात्यं वैडूर्यमणिमन्तरुदके स्थापयेत्। ततस्तस्य वैडूर्यस्यार्थे सर्वे ते मण्डनकानि त्यक्त्वा निमज्जेयुः। अथ यत्तत्रास्ति शर्करं कठल्यं वा तत्ते मणिरिति मन्यमाना गृहीत्वा मया लब्धो मणिरित्युत्सृज्योत्सृज्य वापीतीरे स्थित्वा नायं मणिरिति संज्ञां प्रवर्तयेयुः। तच्च वाप्युदकं मणिप्रभावेन तत्प्रभेव भ्राजेत। एवं तेषां तदुदकं भ्राजमानं दृष्ट्वा अहो मणिरिति गुणसंज्ञा प्रवर्तेत। अथ तत्रैक उपायकुशलो मेधावी मणिं तत्त्वतः प्रतिलभेत।
>
> एवमेव भिक्षवो युष्माभिः सर्वमनित्यं सर्वं दुःखं सर्वमनात्मकं सर्वमशुभमिति सर्वग्रहणेन भावितभावितं बहुलीकृतबहुलीकृतं धर्मतत्त्वमजानद्भिस्तत्सर्वं घटितं निरर्थकम्। तस्माद्भिक्षवो वापीश-

र्करकठल्यव्यवस्थिता इव मा भूत । उपायकुशला यूयं भवत । यद्यद्भिक्षवो युष्माभिः सर्वमनित्यं सर्वं दुःखं सर्वमनात्मकं सर्वमशुभमिति सर्वग्रहणेन भावितभावितं बहुलीकृतबहुलीकृतं तत्र तत्रैव नित्यसुखशुभात्मकानि सन्तीति

विस्तरेण परमधर्मतत्त्वव्यवस्थानमारभ्य विपर्यासभूतनिर्देशो यथासूत्रमनुगन्तव्यः ।

तत्र शून्यताविक्षिप्तचित्ता उच्यन्ते नवयानसंप्रस्थिता बोधिसत्त्वास्तथागतगर्भशून्यतार्थनयविप्रनष्टाः, ये भावविनाशाय शून्यताविमोक्षमुखमिच्छन्ति, सत एव धर्मस्योत्तरकालमुच्छेदो विनाशः परिनिर्वाणमिति, ये वा पुनः शून्यतोपलम्भेन शून्यतां प्रतिसरन्ति, शून्यता नाम रूपादिव्यतिरेकेण कश्चिद्भावोऽस्ति यमधिगमिष्यामो भावयिष्याम इति ।

तत्र कतमः स तथागतगर्भशून्यतार्थनय उच्यते?

नापनेयमतः किंचिदुपनेयं न किंचन ।
द्रष्टव्यं भूततो भूतं भूतदर्शी विमुच्यते ॥ १.१५४ ॥

शून्य आगन्तुकैर्धातुः सविनिर्भागलक्षणैः ।
अशून्योऽनुत्तरैर्धर्मैरविनिर्भागलक्षणैः ॥ १.१५५ ॥

किमनेन परिदीपितम्? यतो न किंचिदपनेयमस्त्यतः प्रकृतिपरिशुद्धात्तथागतधातोः संक्लेशनिमित्तम्, आगन्तुकमलशून्यताप्रकृतित्वादस्य ।

नाप्यत्र किंचिदुपनेयमस्ति व्यवदाननिमित्तम्, अविनिर्भागशुद्धधर्मप्रकृतित्वात्। तत उच्यते—

> शून्यस्तथागतगर्भो विनिर्भागैर्मुक्तज्ञैः सर्वक्लेशकोशैः। अशून्यो गङ्गानदीवालिकाव्यतिवृत्तैरविनिर्भागैरमुक्तज्ञैरचिन्त्यैर्बुद्धधर्मैरिति।

एवं यद्यत्र नास्ति तत्तेन शून्यमिति समनुपश्यति। यत्पुनरत्रावशिष्टं भवति तत्सदिहास्तीति यथाभूतं प्रजानाति। समारोपापवादान्तपरिवर्जनादविपर्यस्तं शून्यतालक्षणमनेन श्लोकद्वयेन परिदीपितम्।

तत्र येषामितः शून्यतार्थनयाद्बहिश्चित्तं विक्षिप्यते विसरति न समाधीयते नैकाग्रीभवति तेन ते शून्यताविक्षिप्तचित्ता उच्यन्ते। न हि परमार्थशून्यताज्ञानमुखमन्तरेण शक्यतेऽविकल्पो धातुरधिगन्तुं साक्षात्कर्तुम्। इदं च संधाय उक्तम्—

> तथागतगर्भज्ञानमेव तथागतानां शून्यताज्ञानम्। तथागतगर्भश्च सर्वश्रावकप्रत्येकबुद्धैरदृष्टपूर्वोऽनधिगतपूर्व इति विस्तरः।

स खल्वेष तथागतगर्भो यथा धर्मधातुगर्भस्तथा सत्कायदृष्टिपतितानामगोचर इत्युक्तम्, दृष्टिप्रतिपक्षत्वाद्धर्मधातोः। यथा धर्मकायो लोकोत्तरधर्मगर्भस्तथा विपर्यासाभिरतानामगोचर इत्युक्तम्, अनित्यादिलोकधर्मप्रतिपक्षेण लोकोत्तरधर्मपरिदीपनात्। यथा प्रकृतिपरिशुद्धधर्मगर्भस्तथा शून्यताविक्षिप्तानामगोचर इत्युक्तम्, आगन्तुकमलशून्यताप्रकृतित्वाद्विशुद्धिगुणधर्माणामविनिर्भागलोकोत्तरधर्मकायप्रभावितानामिति।

तत्र यदेकनयधर्मधात्वसंभेदज्ञानमुखमागम्य लोकोत्तरधर्मकायप्रकृतिपरिशुद्धिव्यवलोकनमिदमत्र यथाभूतज्ञानदर्शनमभिप्रेतम्, येन दशभूमिस्थिता बोधिसत्त्वास्तथागतगर्भमीषत्पश्यन्तीत्युक्तम् । एवं ह्याह—

छिद्राभ्रे नभसीव भास्कर इह त्वं शुद्धबुद्धीक्षणैर्
आर्यैरप्यवलोक्यसे न सकलः प्रादेशिकीबुद्धिभिः ।
ज्ञेयानन्तनभस्तलप्रविसृतं ते धर्मकायं तु ते
साकल्येन विलोकयन्ति भगवन्येषामनन्ता मतिरिति ॥

यद्येवमसङ्गनिष्ठाभूमिप्रतिष्ठितानामपि परमार्याणामसर्वविषय एव दुर्दृशो धातुः, तत्किमनेन बालपृथग्जनमारभ्य देशितेनेति? देशनाप्रयोजनसंग्रहे श्लोकौ । एकेन प्रश्नो द्वितीयेन व्याकरणम्—

शून्यं सर्वं सर्वथा तत्र तत्र
ज्ञेयं मेघस्वप्नमायाकृताभम् ।
इत्युक्त्वैवं बुद्धधातुः पुनः किं
सत्त्वे सत्त्वेऽस्तीति बुद्धैरिहोक्तम् ॥ १५६ ॥

लीनं चित्तं हीनसत्त्वेष्ववज्ञा-
भूतग्राहो भूतधर्मापवादः ।
आत्मस्नेहश्चाधिकः पञ्च दोषा
येषां तेषां तत्प्रहाणार्थमुक्तम् ॥ १५७ ॥

अस्य खलु श्लोकद्वयस्यार्थः समासेन दशभिः श्लोकैर्वेदितव्यः—

विविक्तं संस्कृतं सर्वप्रकारं भूतकोटिषु ।
क्लेशकर्मविपाकार्थं मेघादिवदुदाहृतम् ॥ १.१५८ ॥

क्लेशा मेघोपमाः कृत्यक्रिया स्वप्नोपभोगवत् ।
मायानिर्मितवत्स्कन्धा विपाकाः क्लेशकर्मणाम् ॥ १.१५९ ॥

पूर्वमेवं व्यवस्थाप्य तन्त्रे पुनरिहोत्तरे ।
पञ्चदोषप्रहाणाय धात्वस्तित्वं प्रकाशितम् ॥ १.१६० ॥

तथा ह्यश्रवणादस्य बोधौ चित्तं न जायते ।
केषांचिन्नीचचित्तानामात्मावज्ञानदोषतः ॥ १.१६१ ॥

बोधिचित्तोदयेऽप्यस्य श्रेयानस्मीति मन्यतः ।
बोध्यनुत्पन्नचित्तेषु हीनसंज्ञा प्रवर्तते ॥ १.१६२ ॥

तस्यैवंमतिनः सम्यग्ज्ञानं नोत्पद्यते ततः ।
अभूतं परिगृह्णाति भूतमर्थं न विन्दते ॥ १.१६३ ॥

अभूतं सत्त्वदोषास्ते कृत्रिमागन्तुकत्वतः ।
भूतं तद्दोषनैरात्म्यं शुद्धिप्रकृतयो गुणाः ॥ १.१६४ ॥

गृह्णन्दोषानसद्भूतान्भूतानपवदन्गुणान् ।
मैत्रीं न लभते धीमान्सत्त्वात्मसमदर्शिकाम् ॥ १.१६५ ॥

तच्छ्रवाज्जायते त्वस्य प्रोत्साहः शास्तृगौरवम् ।
प्रज्ञा ज्ञानं महामैत्री पञ्चधर्मोदयात्ततः ॥ १.१६६ ॥

निरवज्ञः समप्रेक्षी निर्दोषो गुणवानसौ ।
आत्मसत्त्वसमस्नेहः क्षिप्रमाप्नोति बुद्धताम् ॥ १.१६७ ॥

इति रत्नगोत्रविभागे महायानोत्तरतन्त्रशास्त्रे तथागतगर्भाधिकारः प्रथमः परिच्छेदः श्लोकार्थसंग्रहव्याख्यानतः समाप्तः ॥

## Editions 校刊本

1. **Māra's Snare 魔王的繩索**
Raniero Gnoli, Tuppil Venkatacharya. *The Gilgit Manuscript of the Saṅghabhedavastu: being the 17th and Last Section of the Vinaya of the Mūlasarvāstivādin*. Istituto italiano per il Medio ed Estremo Oriente, 1977-78, pp. 148-149.

2. **The four Noble Truths 四聖諦**
N.H. Samtani. *The Arthaviniścaya-sūtra and its commentary (Nibandhana)*. Patna: K.P. Jayaswal Research Institute, 1971, pp. 1-3, 14-16, 34-42, 67-68.

3. **Śāriputra and the Goddess 舍利弗和天女**
*Vimalakīrtinirdeśa, A Sanskrit Edition Based upon the Manuscript Newly Found at the Potala Palace*. Tokyo: Taisho University Press, 2006, pp. 270-278, 288-294.

4. **The Parable of the Magic City 化城的譬喻**
P.L. Vaidya. *Buddhist Sanskrit Texts, 6*. Darbhanga, Bihar: The Mithila Institute, 1960, pp. 120-121.

5. **The Parable of the Skillful Doctor 良醫病子的譬喻**
P.L. Vaidya. *Buddhist Sanskrit Texts, 6*. Darbhanga, Bihar: The Mithila Institute, 1960, pp. 191-192.

6. **Isn't the Tathāgatagarbha the Same as the Ātman? 如來藏與外道之我論**
P.L. Vaidya. *Buddhist Sanskrit Texts, 3*. Darbhanga, Bihar: The Mithila Institute, 1963, pp. 33-34.

7. **In Praise of the Teaching 讚歎聖教**
D.R. Shackleton Bailey. *The Śatapañcāśatka of Mātṛceṭa. Sanskrit Text, Tibetan Translation & Commentary and Chinese Translation*. Cambridge University Press, 1951, pp. 28-39, 96-102.

8. **Hymn to the Incomparable One 讚歎世尊無與倫比**
Giuseppe Tucci. *Two Hymns of the Catuḥ-stava of Nāgārjuna*. The Journal of the Royal Asiatic Society, 1932, pp. 312-320.

9. **Hymn to the Mother of all Buddhas 讚歎諸佛之母**
Michael Hahn. "Bemerkungen zu zwei Texten aus dem Phudrag-Kanjur", *Indology and Indo-Tibetology. Thirty Years of Indian and Indo-Tibetan Studies in Bonn*. Bonn, 1988 (Indica et Tibetica 13), pp. 62-73.

10. **The Buffalo and the Monkey 水牛與猴子的故事**
P.L. Vaidya. *Buddhist Sanskrit Texts, 21*. Darbhanga, Bihar: The Mithila Institute, 1959, pp. 241-244.

11. **Encountering Old Age 王子的厭患**
E.H. Johnston. *The Buddhacarita: Or, Acts of the Buddha, Part I: Sanskrit Text*. Calcutta: Baptist Mission Press, 1935 (Panjab University Oriental Publications, 31), pp. 23-25.

12. **Guarding the Mind 心的守護**
I.P. Minayeff. "*Bodhicaryāvatāra"* in Zapiski Vostočnago Otdělenija Imperatorskago Russkago Archeologičeskago Obščestva, 4. St. Petersbourg, 1889, pp. 169-172.

13. **The Practice of Forbearance 忍辱的修習**
I.P. Minayeff. "*Bodhicaryāvatāra"* in Zapiski Vostočnago Otdělenija Imperatorskago Russkago Archeologičeskago Obščestva, 4. St. Petersbourg, 1889, pp. 178-179.

14. **Emptiness and the Four Noble Truths 空性與四聖諦**
Louis de La Vallée Poussin. *Mūlamadhyamakakārikās (Mādhyamikasūtras) de Nāgārjuna avec la Prasannapadā Commentaire de Candrakīrti*. St. Petersburg, 1913 (Bibliotheca Buddhica IV), pp. 475-515.

15. **Elucidating the Buddha's Teaching on Selfhood 駁斥補特伽羅論者的問難**
P. Pradhan. *Abhidharmakośabhāṣyam of Vasubandhu*. Patna: K.P. Jayaswal Research Institute, 1967, pp. 469-472.

16. **Refuting the Mind-Only School 駁斥唯識論者**
P.L. Vaidya: *Bodhicaryāvatāra of Śāntideva with the Commentary Pañjika of Prajñākaramati*. Darbhanga, Bihar: The Mithila Institute, 1960 (Buddhist Sanskrit Texts, 12), pp. 389-393.

17. **Defending the Mahāyāna 辯護大乘**
P.L. Vaidya: *Bodhicaryāvatāra of Śāntideva with the Commentary Pañjika of Prajñākaramati*. Darbhanga, Bihar: The Mithila Institute, 1960 (Buddhist Sanskrit Texts, 12), pp. 430-434.

18. **Refuting the Nondualists' Notion of a Self 評破外道不二論者之我論**
Embar Krishnamacharya. *Tattvasaṅgraha of Śāntarakṣita: With the Commentary of Kamalaśīla*. Baroda: Central Library, 1926 (Gaekwad's Oriental Series 30-31), pp. 123-125.

19. **Responding to the Realists 駁斥外境實有論者的問難**
Sylvain Lévi. *Vijñaptimātratāsiddhiḥ Deux traités de Vasubandhu: Viṃśatikā (La Vingtaine) accompagnée d'une explication en prose et Triṃśikā (La trentaine) avec le commentaire de Sthiramati*. Paris: Librairie Ancienne Honoré Champion, 1925, pp. 1-11.

20. **On the Tathāgatagarbha 論如來藏**
E.H. Johnston. *Ratnagotravibhāga Mahāyānottaratantraśāstra*. Patna: Bihar Research Society, Museum Buildings, 1950, pp. 74-78.